THE

ŚĀṆKHĀYANA ŚRAUTA SŪTR

TOGETHER

WITH THE COMMENTARY

OF

VARADATTASUTA ĀNARTĪYA

EDITED BY

ALFRED HILLEBRANDT, PH. D.

PROFESSOR OF SANSKRIT IN THE UNIVERSITY OF BRESLAU.

VOL. II.

THE COMMENTARY OF VARADATTASUTA ĀNARTĪYA.

PUBLISHED FOR THE BIBLIOTHECA INDICA.

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS.
1891.

PREFACE.

The edition of the Commentary on the Śāṅkhāyana Śrauta Sūtra is based upon the three Manuscripts which I have already described on page vii and 240 of the first volume. Besides the Kauṣītaki Brāhmaṇa the author quotes numerous works on different branches of Sanskrit-literature. I subjoin a list of his principal authorities:—

Aitareyinaḥ I, 4, 15	Pāṇini I, 2, 2, etc
Āçvalāyana III, 18, 21; 19, 2	Prātiçākhya I, 2, 6
Ṛgvidhāna III, 19, 3.	Manu III, 19, 2, etc
Kaṭhaka II, 1, 7	Mahābhāṣya I, 15, 14
Kātyāyana I, 3, 16; 4, 1, 8, 11, 12; 4, 11, 5, 32, etc	Mīmāṃsaka IV, 14, 18
Kauṇḍapāyinīya II, 13, 1	Maitrāyaṇīya IV, 5, 11.
Gobhilapariçiṣṭa IV, 5, 4	Yājñavalkya I, 15, 10.
Chāgaleyinaḥ VI, 1, 17	Vaijavāpa III, 18, 19.
Jaimini I, 5, 3; 16, 2; III, 19, 10	Çatapatha Brāhmaṇa
Taittirīya I, 9, 2; II, 9, etc	Çākala homa I, 2, 23
Nirukta V, 1, 1; 16, 9	Çāṅkhāyana Gṛhya Sūtra.
	Çaunaka I, 17, 11
	Suyajña I, 2, 18

A passage from our commentary (V, 8, 3) is quoted in the Commentary on the Kātyāyana Śrauta Sūtra VIII, 2, 6 (p 182).

I have added to the text a selection of various readings, though there are very few real discrepancies between the single manuscripts and most of them scarcely worth mentioning. But they might help the reader in some cases to choose a wording independent of my own opinion and, in others, to determine the value of the manuscripts. I have chosen the first three letters of the alphabet to mark the three MSS., the letter A being the representative of the Alwar-MS., the letter B of Professor Thibaut's, the letter C of that of the Royal Library of Berlin.

A. HILLEBRANDT.

BRESLAU.

ERRATA.

page	1	note	1	read	घाव°; note 4 add A.
,,	5	line	13	,,	चादेश° instead of स च
,,	8	,,	21	,,	ग्रैलौयं
,,	11	,,	15	,,	जह्कालो
,,	19	,,	13	,,	यथा प्रतिमाषम्
,,	22	,,	15	,,	प्रायेण न instead of ॰न प्राये
,,	63	,,	14	,,	यद्यन्यः ,, ,, यद्यः
,,	68	,,	9	,,	उपरि सवर्णं
,,	80	,,	10	,,	भवति
,,	110	,,	14	,,	यथाग्निमन्थनं
,,	114	,,	6	,,	धनुर्देषिया
,,	117	,,	15	,,	इस्थिरेवा°
,,	129	,,	4	,,	प्रतिपूर्वो सु°
,,	147	,,	19	,,	°योकष्नि
,,	246	,,	3	,,	इतिकार्यान्तरे
,,	281	,,	20	,,	°मके योषा
,,	290	,,	11	,,	वितष्ट
,,	301	,,	4 and 302 l. 5	——dele (•)	

I beg the reader to cancel note 1 on pp. 35-37, p. 10, and the letter C on p. 6, note 1; p. 28, note 2.

The verse तच्चस्योर् is to be inserted in Index VI the first volume.

शाङ्खायनश्रौतसूत्रभाष्यम्।

ओम्।

१

पुरुषस्य बुद्धिपूर्वकारिणो ऽभ्युदयं निःश्रेयसमुपादित्सितं तच्च विशिष्टक्रियासाध्यम्। सा च वैदिकी[1] क्रिया नान्या काचित्। कुत एतत्। प्रमाणत्वाद्वेदस्य। कथं वेदस्य प्रामाण्यम्। अपौरुषेयत्वात्। अर्थप्रत्यायकत्वात्[2]। बाधकप्रत्ययाभावात्। तत्प्रभवत्वाच्च कल्पस्य प्रामाण्यम्। स च कल्पः परिनिष्पन्नप्रयोगरूपकस्योपदेशको ग्रन्थः। पदार्थरूपोपदेशमात्रप्रयोजनो[3] वैदिक एवायमर्थ इत्यभ्युदयनिःश्रेयसार्थिभिरादर्तव्यः सकलपुरुषार्थसिद्धये। तस्यैतदादिसूत्रम्।

१. पुरुषस्याभिमतफलदायी[4] जगदुत्पत्तिबीजं यज्ञः। यद्यपि च द्रव्यदेवतात्यागात्मा तथाप्यत्र साङ्गो विवक्षितः। इदमत्र प्रधानमेतान्यङ्गानि इयमितिकर्तव्यता। एवं साध्यसाधनरूपेण मर्यादया श्रुतिसिद्धया प्रथयिष्यामः। गुरावात्मनि च बहुवचनं शिष्टैः स्मर्यते। तत्र[5] चोदयन्ति यज्ञमिति द्वितीया न प्राप्नोति। अवयवषष्ठ्या

---

[1] A सर्ववैदिकी। [2] C °प्रत्यय°। [3] A °रूपो°। [4] पुरुषार्थस्या°। [5] A तत्र।

तु भवितव्यम्। अप्रकृतत्वात्। तदयुक्तम्। कुतः। श्रुतेः। स एष सर्वकामस्य यज्ञः। स एष स्वर्गकामस्य यज्ञ इति। तस्माददोषः। यज्ञमित्येकवचनं जात्यपेक्षम्। अधिकारसूत्रमेतत्। प्रतिज्ञा च शिष्यबुद्धिसमाधानार्था।

२. यज्ञमिति द्वितीयान्तं प्रकृतमिह प्रथमया विपरिणम्यते। तदर्थः स इति निर्देशः। स यज्ञस्त्रयाणां वर्णानां भवतीति वाक्यशेषः। अथवा सच्छब्दः साधुवाची पूर्वपदम्। त्रयाणामित्युत्तरपदम्। तेनैतदुक्तं भवति। शोभनानां त्रयाणां वर्णानां यज्ञेऽधिकारः। तदेवमङ्गहीनाश्रोत्रियषण्ढशूद्रवर्जं अधिकारः सिद्धो भवति। किं पुनः कारणं अर्थिनः समर्थाश्च शूद्राः प्रतिलोमाश्च नाधिक्रियन्ते। उच्यते। श्रुतिदर्शनात्। अयज्ञियान्वा एतद्यज्ञेन प्रसृजति शूद्रांस्तदिति शतपथे।

३. ब्राह्मणस्य क्षत्रियस्य ब्राह्मणक्षत्रियौ। तयोर्यः शूद्रायां जातः[1] पुत्रस्तस्यावर्णत्वान्न प्राप्नोति। वैश्यस्य च यः करण्यामुत्पद्यते तस्य च न प्राप्नोति। तदर्थं वचनम्।

४. संयोगः संबन्धः इदमस्येति विशेषनिर्देशः। तमकृत्वा यदभिधीयते तत्साधारणं भवति। [ये तत्र प्रकृताः]। परिभाषासूत्रमेतन्न्यायप्राप्तम्। अथोदाहरणम्। दर्शपूर्णमासौ त्रयाणां वर्णानाम्। अन्वाहार्यश्चतुर्णामृत्विजाम्।

५. संयोगोऽसाधारणेन व्यपदेशः। तेन हेतुना संयुज्या-

---

[1] B C om. शूद्रायां जातः।

युज्यमानं व्यवतिष्ठते । व्यवस्थितविषयं भवति । सार्वत्रास्य¹ संयोगो ऽभिप्रेतो न शास्त्रः² । तद्यथा । पुरोधाकामयज्ञो ब्राह्मणस्य । सोमाङ्गमग्निचयनं दीक्षासंयोगात् ।

६. विशिष्टसंनिवेशः शरीरसंस्पर्शो यज्ञोपवीती शिष्टप्रसिद्धः । तथा च मनुः ।

उद्धृते दक्षिणे पाणावुपवीत्युच्यते बुधः ।
सव्ये प्राचीनमावीती निवीती कण्ठसज्जने ॥ (२,६३)

ईदृशो यज्ञोपवीती देवार्थानि कर्माणि हविःप्रक्षेपप्रभृतीनि तदङ्गानि चेत्थंभूतः करोति । कुतः । उपवीतं देवानामुपव्ययते देवलक्ष्ममेव तत्कुरुत इति वचनात् ।

७. प्राचीनावीती³ कृतापसव्य इत्यर्थः । पितॄणामिमानि पित्र्याणि । पिण्डपितृयज्ञश्राद्धादीनि । तानि प्राचीनावीती कुर्यात् । कर्मग्रहणमनुवर्तते⁴ । तेनोदीरतामिति शंसने न प्राचीनावीती⁵ । कर्तृधर्मश्चायं । प्राङ्न्यायानीत्यथ कर्मधर्मः । तेन सर्वसाधनानां दक्षिणाचारता । अतो योगभेदेनोक्तम् ।

८. येनाधिकरणेन होमादिना संयुज्येत संबध्येत तेनाचमनप्रभृति । नान्यथा । तेन च संयुक्तः प्रवृत्तकर्मा न व्यावर्तेत । व्यावर्तनं भ्रमणं तन्न कुर्यात् । तथा च कात्यायनः । स्थित्वाहुत्य वेतरचावृत्तिः ।

---

१ C सर्वे॰ । २ A नाशास्त्रः । ३ A om. च here and further on. ४ A ins. दैवार्थानि कर्माणि पित्र्याणि कर्माणि C in marg. ५ C इति पैतृकः वचन in marg. अयज्ञप्राचीनावीती B इति पैतृकः संवज्ञप्राचीनावीती वचेन

९. यज्ञं यज्ञान्तरेण । विच्छिन्दति ह वा एतद्यज्ञमिति श्रुत्यन्तरात् । अथवा तदधिकरणं होत्रादि पदार्थान्तरेण न व्यवेयात् । न च व्यवदध्यात् । चशब्दाद्गार्हपत्याहवनीयौ च ।

१०. यज्ञोपवीत्यादिका आवृतां लक्षणा । आवृच्छब्देन कर्माण्यभिधीयन्ते । लक्षणा प्रायोवृत्तिरित्यर्थः । केषांचिल्लक्षणोद्देश इति सूत्रच्छेदः । तेषामप्ययमेवार्थः ।

११. इत्यावृतामिति वर्तते । उद्दिश्यते पठ्यते । आम्नाय इत्येकोऽर्थः । य उद्देशः पाठक्रमो ब्राह्मणे सूत्रे वा तेनैव क्रमेणावृतः कर्तव्याः । न तु क्रतूनां पाठक्रमेणानुष्ठानं सर्वस्वारपराकयोर्मध्ये पाठात् ।

१२. यज्ञाधिकारोऽनुवर्तते । यज्ञे सर्वत्र अवचने उत्तरत उपाचारः । उपाचारोऽनुष्ठानम् । उत्तरतउपाचारो वै यज्ञ इति श्रुतेः । क्वचिद्वचनेऽपि स्वस्य धिष्ण्यस्य पश्चादुपविशेत् । समीप उप आङ्प्रयोगात् न दूरे ।

१३. प्रागित्यप्ययं दिक्शब्दः । न्यायशब्दो धर्मपर्यायः । आचारपर्यायो वा । यत्र देवार्थानि कर्माणि तत्र प्रागेव । कर्मणि प्राची दिगङ्गीकर्तव्या ।

१४. पित्र्याण्यमूनि पितरो वा देवता येषां तानि दक्षिणाचारेण कर्तव्यानि ।

१५. आसीन उपविष्टः । न्यायशब्द उक्तः । साकूप्यं सकूपावाचोक्तम् । तदुपविष्टेन कर्तव्यम् ।

१६. तिष्ठन्नाहाग्निमन्थनीया इत्येवमादिषु वचनेषु विकल्पो

मा भूदिति सूत्रारम्भः परिभाषाणामनित्यताज्ञापनार्थम्। तेन[१] तथा ऽत्र आश्वलायनीयो होत्रासमासः[२]।

१७. यदनादिष्टकर्तृकं याज्यं तद्धोता कुर्यात्। चकारो याज्यानुकर्षणार्थः। वचनविरोधाभ्यां मैत्रावरुणादयो ऽपि कुर्युः। सप्त होतार ऋतुशो यजन्तीति होतृशब्दप्रयोगात्।

१८. प्रभृतिशब्द आदिवचनः। चित्रशब्दमारभ्य ये ऋग्गणा ऋक्समुदायास्तेषां प्रथमायामुत्तमायां च त्रिरुक्तिः प्रत्येकं[३] कर्तव्या। किं सर्वत्र। नेत्युच्यते। अन्यत्र जपेभ्यः। जपान्वर्जयित्वेत्यर्थः। चित्रप्रभृतिष्विति गणविशेषणं कुर्वन्नेतज्ज्ञापयति। क्वचिद्द्वि[४]को ऽपि गणो ऽस्ति। किमेतस्य ज्ञापने प्रयोजनम्। आवर्तते पशुगणे मनोतेति पशुद्वये ऽपि मनोताया आवृत्तिः सिद्धा भवति।

१९. अथ ओंकार आदेशो विधीयते। स च देशत्वात्स्थानमपेक्षते। तदुच्यते। स्वराणामपि संनिविष्टानां यो ऽन्त्यः स्वरस्तदादेः स्थाने विधीयते। तत्र कदाचिदृगन्ते स्वरः केवलो भवति। कदाचित्सव्यञ्जनः। स चोभयरूपो ऽपि छन्दोमानमित्युच्यते। तत्र यदादौ व्यञ्जनं तत्तदङ्गमेव। तस्मात्परमोंकारस्य स्थानम्। अतस्तस्मिन्भवति। स च प्लुतः अपृक्त इत्यर्थः। चशब्दात्क्वचिदुत्तमादृगक्षरात्। तस्योदाहरणम्। उपांशुयाजो[५] भवति। भवतं दाशुषे मयः। ओमिति। तच्च वक्ष्यमाणेन सूत्रेण। उत्तमस्य छन्दोमान-

---

[१] B om. तेन। [२] A °सौ। [३] C प्रत्यकं प्रत्येकं। [४] A क्वचिद्विनयको ऽपि गणे। [५] A °ज

चोदाहरणम्। जिन्वतोमिति। केचित्तु पकारस्तुम्नणार्थमित्येवं व्याचक्षते।

२०. स ओकारः पूर्वसूत्रे स्थानी विहितः स मकारान्तो भवति। ओमिति।

२१. तं प्लुतं मकारान्तं च[1] प्रणव इत्याचक्षते याज्ञिकाः। प्रणवप्रयोजनं सप्रणवो द्वितीयश्चतुर्थश्चेति। केचित्तु उत्तमस्य च पञ्चोमानश्चेत्यत आरभ्य तं प्रणव इत्याचक्षत इत्येवमन्तमेकं सूत्रं प्रणवसंज्ञार्थं वर्णयन्ति। तदप्युपपद्यत एव।

२२. अवसानं विरामः। तस्मिन्नवसाने मकारान्तं प्रणवं कुर्यात् सर्वेषु ऋग्गणेषु। तद्यथा। खेषु चयेषु वाजिनोम्। सर्वग्रहणात्तृचिमगणेष्वपि। तद्यथा। उग्रन्नस्त्येकां सामिधेनीं त्रिरनूच्य। अत्रापि सर्वग्रहणाद्गणधर्मलक्षणः प्लुतः प्रणवः सिद्धो भवति। अपुरोनुवाक्यास्विति बहुव्रीहिसमासः। तेन सहेति तुल्ययोग इति वोपसर्जनस्येति च सहशब्दस्य सभावः[2]। तेनैतदुक्तं भवति। पुरोनुवाक्यासु चायं मकारान्तः। ततः संयोर्वाके न भवति। ननु पुरोनुवाक्यासु चेति च वक्तव्यं सुखावबोधार्थम्। सत्यम्। किंतु अप्राधान्यार्थं च। तस्मात्पुरोनुवाक्यानामयं गणधर्मो न भवति। अतश्च षष्ठे ऽहनि ऐन्द्रवायवस्य चतुर्णां गणत्वे ऽपि सत्यपि प्रथमोत्तमयोर्द्विर्वचनं न भवति। मकारान्तश्च प्रणवः प्रत्यृचं भवति।

२३. तेनेति व्यवहितः प्लुतः परिगृह्यते। तेन प्लुतेनोत्तरस्या ऋचः पादमर्धर्चं वा यथावचनं संधायावस्यति प्रयोक्ता। तत्संतत-

---

[1] B C om. च।
[2] पा० २.२.२८; ६.३.८२.

मित्याचष्टे । इष्टा हि तथैव संज्ञेत्यर्थः । संततमितीतिकरणः प्रदर्शनार्थः । तेन सहितं चेति । तथा च श्रुतिः । मध्य एव प्रणवः याज्यानुवचनयोर्मध्य इति च आह कौषीतकिशाखया संहितं भवतीति ।

२४. योऽयं पूर्वं उक्तो धर्मस्त्रिप्रभृतिष्वित्येवमादिषु स सर्वेषामुत्पन्नानां व्यवहितानामपि प्रौंखावो इत्यनेन भवति[१]। ये कर्मसंयोगेन चोद्यन्ते। हविर्धानप्रवर्तनादयश्च । न तु जपानामक्रियासंयोगात् ।

२५. विहूरेष्वन्तर्हितेषु च अपिशब्दादनन्तर्हितेषु च कर्माध्वर्य्वादिभिः क्रियमाणेषु गणमध्ये ऽन्तरेण प्रथमान्त्यं परिधानीयां चोत्तमान्त्यं संतानार्थः कर्ता अर्धर्चेन करणभूतेनाकाङ्क्षति । तत्कर्माध्वर्य्वादिभिः क्रियमाणं प्रतीक्षत इत्यर्थः । तद्यथा । जातायानुब्रूहीति । विहूरे उदाहरणम् । तद्यथा । समानजातीयानुवचने[२] ऽञ्जनीयायास्तृतीये वचने प्रथमे यूपे अर्धर्चावसानं[३] कृत्वा तत एवं इतरेषु यूपेषु अर्धर्चमर्धर्चमञ्जनीयाया उक्त्वा ततो यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थो ३ उच्छ्रयस्व वनस्पते समिद्धस्य श्रयमाणः पुरस्तात् जातो जायत ऊर्ध्व ऊ षु ण ऊर्ध्वो नः पाह्यंहसो नि केतुना विश्वं समत्रिणं दह । यदूर्ध्वस्तिष्ठा इत्येवमादि प्रतियूपमुक्तार्थं ।

---

१ C om. भवति । २ A समानजातीयाया अनु॰ C°॰जातीया अनु॰ । ३ B अर्धर्च ऽवसानं ।

२६. अर्धर्चावसानन्याया अर्धर्चन्याया एवंधर्मिका इत्यर्थः। याः ऋचिमा रात्रिपर्यायस्तोत्रियानुरूपाद्यास्तदर्थः सूत्रारम्भः। तत्र अभ्यासमात्रा चोदना। नावसानचोदना[1]। ननु यद्येवमर्थं सूत्रं कथं बृहतीं अस्योत्तमं पादं प्रत्यादायोत्तरस्याः प्रथमेनावसायेति। न दोषः। उदाहरणप्रपञ्चार्थत्वादस्येति। चकारः पूर्वेण सह समुच्चयार्थः।

२७. अर्धर्चन्यायाद्यदन्यत्तद्वचनाद्भवति। त्रीणि पदानि समस्य पङ्क्तीनामवस्येदित्ययं विधिः कथं नाम प्रातरनुवाक एव भवेदेवमर्थं सूत्रम्। ननु च क्व चान्यत्र प्राप्नोति। उच्यते। अस्य सूत्रकारस्य शीलिरेषा[2]। आद्ये हि दृष्टो यो धर्मः स सर्वत्र प्राप्नोति इति[3]। तद्यथा। तृणनिरसने अप उपस्पृश्येत्युक्त्वान्यत्रोपस्पृश्येत्याह नाभ्यहणं करोति।

२८. उच्चैरुच्चारणन्यायः। को ऽसौ। ऋग्वेदः। चकारो ऽन्यत्र जपेभ्य इत्यस्यानुकर्षणार्थः। अत एतदुक्तं भवति। यत्र जपवर्जमृग्वेद उच्चैर्भवतीति[4]। अतश्च ऋग्वेदविहितं यजुरुक्तप्रवरनामधेयादि सर्वमुच्चैर्भवतीति।

२९. उपांशु गार्हपत्ये पत्नीसंयाजेष्वरन्नीत्यत्र विकल्पो न भवति। भावप्रत्ययनिर्देशाच्छ्रुतिविहितं लक्षणं द्रष्टव्यम्। यथैवैवं मिथः संसृष्टयोरग्निति।

३०. समित्येकीभावमाचष्टे। स्थारः स्थानम्। एकं स्थानं

---

[1] A ०सानं। [2] B शैलिरेषा. C in marg. शैलियं। [3] B om. इति। [4] B उच्चैर्धर्मा।

मन्द्रादि कार्यम्। शब्दानां ध्वनीनामित्यर्थः। ध्यायतेनिवचनात्प्रयोक्तुः स्वयत्नुपेक्षम्[1]। चशब्दो ऽन्यत्र जपेभ्य इत्यस्यानुकर्षणार्थः।

२१. यज्ञ इत्यनुवर्तते। ऐकस्वर्यमेकश्रुतिप्रयोगः कार्यः। भावप्रत्ययनिर्देशो लक्षणान्तरप्रापणार्थः। तेनाजपन्यूङ्खमामखिति सिद्धं भवति। चकारः शब्दानामित्यस्यानुकर्षणार्थः। पृथग्योगकरणात् पूर्वसूत्रे यो विधिः स विकल्पेन भवतीति विज्ञायते।

२२. तरामितीषदर्थे। प्रणवादीनामुच्चैरेव विधानात्।

२३. पुनःप्रणववचनादेतल्लभ्यते। प्रैषव्यवहिते च। शस्त्रान्तीयाच प्रणवादुच्चैस्तरां याज्या भवति।

२४. याज्याया उच्चैस्तरां वषट्कारः कर्तव्यः।

२५. याज्यया वा समो वषट्कारः। उच्चैस्तरां नेति विकल्पः।

२६. प्रणवादयः प्रसिद्धाः। संप्रैषग्रहणं साहचर्यार्थम्। यत्र संप्रैष उच्चैस्तत्र प्रणवादयो ऽपि। अतो न पत्नीसंयाजादिषु। तत्र सर्वोपांशुत्वमेव विधानात्। उपांशुहविर्यागचोदनास्वित्यर्थः।

२७ उपांशुहविःष्विति वर्तते। उपांशुहविःषु देवतानामधेयं वक्ष्यमाणेष्वावाहनादिषूपांशु भवति। देवतानामवचनाच्च हविर्नाम। नामवचनादाख्यातमनुषतेति शब्दः। धेयवचनं प्रत्ययाभिधानार्थम्। ततो न मेधपतिः। चशब्दादृगादौ च।

२८. भूर्भुव इत्ययं मन्त्रः प्राग्याज्यायाः प्रयोक्तव्यो जपधर्मेण।

२९. पुरस्ताज्जपानन्तरं ये यजामहे। याज्यान्ते वौषट्। तत ओजः सहः सह ओजः स्वरिति उपरिष्टात्। इतीति नियमार्थम्।

---

[1] A °क्ष्य।

ततो याज्यावत्त्वे ऽपि न गणधर्मः । चतुष्टयग्रहणं परस्परानपेक्षार्थम्[1] । ततो येयजामहप्रतिषेधे सत्यपि पुरस्ताज्जपस्याप्रतिषेधः[2] । सर्वास्विति यदि नोच्येत ततो ये यजामह इत्यात्मनेपदबहुवचनं बहुयजमानके कर्मणि सत्त्रादौ व्यवतिष्ठेत । सर्वग्रहणात्तु[3] सर्वत्र भवति ।

४०. त्रीननुयाजान्यजतीत्युक्त्वा इत्यनुयाजयाज्या इति वक्ष्यति । तेषु येयजामहो न भवतीति ।

४१. वाजिनस्याग्ने वीहीत्यनुवषट्कारः । सोमस्याग्ने वीहीत्यनुवषट्कार इति वक्ष्यति । तत्र येयजामहो नास्ति । ननु च[4] अनुवषट्कारस्य याज्यासंज्ञैव नास्ति । सत्यम् । येयजामहप्रतिषेधाद्याज्यासंज्ञापि[5] भविष्यति ।

४२. वक्ष्यति । चतुर्मात्रो याज्ञिकी प्लुतिरिति । अतस्तेन प्लुतेन चतुर्मात्रेण याज्यान्तेन । वषट्कारस्य वौषट्शब्दस्येत्यर्थः । संधानमव्यवच्छेदः कार्यः । इत्थंभूतेन याज्यान्तेन संधानं विदधता प्लुतो ऽपि विहित एव । स्वरस्यायं प्लुतः । तद्धर्मत्वात् । व्यञ्जनानां च सन्ध्यन्तरविधानाद्याज्यान्ते ।

४३. अप्लुतेन[6] वा याज्यान्तेन वषट्कारस्य संधानं कार्यम् । पूर्वेण सह एकयोगे क्रियमाणे पक्षे व्याकरणसिद्धा त्रिमात्रा प्लुतिः स्यात् । तन्निवृत्त्यर्थं पृथक्सूत्रकरणम् ।

४४. तत्प्लुतसंधानम्[7] । उपांशुयाजे उपांशुयाजमात्रके । न

---

[1] BC परस्परस्यापेक्षार्थम् । [2] C जपस्यापि प्र॰ । [3] A C सर्वेच प॰ । [4] A om. च । [5] B inserts इति after ये यजामह । [6] A अप्लुतान्तेन । [7] A C प्लुति॰ ।

केवलमग्नीषोमीयवैष्णवयोः किं तर्हि सर्वत्र तनूदेवतादावपि प्लुतसंधानं नास्ति। ननु च उपांशुयाज इतीयमग्नीषोमीयवैष्णवयोः संज्ञा। तत्रैव प्लुतसंधानप्रतिषेधः प्राप्नोतीति। सत्यम्। यजतीतिवचनात्सर्वत्रोपांशुयजने प्रतिषेधः।

२.

१. आवाह्यते ऽनेनेत्यावाहनः। को ऽसौ। आकारः। तमाकारं प्लावयेत्। चतुर्मात्रं कुर्यादित्यर्थः। ननु आवहादिं प्लावयेदिति वक्तव्यम्। सत्यम्। किं तु यस्मिन्कर्मणि या यष्टुमभिप्रेतास्ता एवावाहयितव्यास्तदभिप्रायमेवमुक्तम्। अत आवह देवान्यजमानायेत्यत्र आवहादिः प्लुतो न भवति। आह। किमर्थं प्लावयेदिति ण्यन्तनिर्देशः। उच्यते। अग्निं होत्रायावह[1]। अत्र प्लुतेन सह आकारीभूतस्य[2] समानाक्षरे सस्थान इति[3] दीर्घ एव प्राप्नोति। स मा भूत्। प्लुत एव यथा स्यादिति ण्यन्तनिर्देशः।

२. यो ऽयं चतुष्टये निर्दिष्ट एकारान्तो येयजामहे एष प्लुतादिः कार्यः। न च व्यञ्जनस्य प्लुतिः। असामर्थ्यात्। अनुस्वारं मकार इति च याज्यान्तस्य वर्णान्तरोपदेशात्। तथा च। ऊकालो ऽज्झ्रस्वदीर्घप्लुतः। अचश्चेति (पा० १.२. २७. २८)। वैयाकरणाः। ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचीति शिक्षाः। पुरस्तात्पूर्वस्मिन्देशे। याज्यानामिति षष्ठीनिर्देशादुपांशुयाजे ऽपि प्रणवसंधानं भवत्येव। तथा चाश्वलायनस्य सूत्रम्। प्राणसंततः प्रणवः

---

[1] B adds इति। [2] B आकारस्य। [3] प्राति० १.१।

पुरोनुवाक्यायाज्यायागूर्वषट्काराविति । आगूःशब्दस्य तेषां येयजामहे प्रभृतः ।

३. यज्ञे भवा याज्ञिकी । कासौ प्लुतिः । प्लुतेन याज्यान्तेनेत्येवमाद्या । सा चतुर्मात्रा कार्या । या पुनराम्नायपाठे स्वनिगदोक्ता सा व्याकरणलक्षणेन त्रिमात्रा । तस्या यज्ञेऽपि प्रयुज्यमानाया न चतुर्मात्रता । किं कारणम् । यज्ञं व्याख्यास्याम इति यज्ञाधिकारे याज्ञिकीति वचनात् । अतः अध्वर्यवैषीरपा३ इति त्रिमात्रैव । अधः स्विदासी३दिति वाचःस्तोमे प्रयुज्यमाना त्रिमात्रैव । याज्ञिक्ये च[1] सा केवला न पाठे । यज्ञे च तस्याश्चतुर्मात्रता नियम्यते ।

४. याज्यान्त इति वक्ष्यमाणमिदं संबध्यते । सामर्थ्यात् । याज्यान्ते वर्तमानानां सन्ध्यक्षराणां एकारादीनां चतुर्णां मध्ये ये द्वे तालव्ये सन्ध्यक्षरे एकारस्य ऐकारस्य ते प्रत्येकं आकारस्य प्लुत इकारस्य मात्रिकः अनेन रूपेण भवतः । अभूततद्भाव इति च्विः (पा० ५. ४. ५०)। अत्रोदाहरणम् । त्वष्टारं सोमपीतया३इ वौषट् । ऐकारस्योदाहरणम् । आदिद्वसूनि प्र च वाचासा३इ वौषट् ।

५. ओष्ठः[2] स्थानं ययोस्ते ओष्ठ्यस्थाने सन्ध्यक्षरे ओकारस्य औकारस्य । तत्र ओकार आ३उ ईदृशं रूपमापद्यते । एवमौकारः । वसु देवी दधातु ना३उ वौषट् । ननु ओकार आमन्त्रितस्य प्रगृह्य इत्येवमादिना लक्षणेन सर्व एव प्रगृह्यो याज्यान्ते तस्य किं ग्रहणेन । सत्यम् । किं तु साकाङ्क्षाणामप्रगृह्यस्तदर्थं वचनम्० ।

---

[1] A याज्ञिक्येवकेवला न पाठे B क्येच । [2] A ओष्ठं B ओष्ठ्य० ।

६. प्लुतापेक्षमन्यत्वम् । प्लुतादन्यानि याज्यान्तस्याप्लुतपक्षे प्रकृत्या भवन्ति । प्रथमया प्रकृत्या यथास्वभावमित्यर्थः । अक्षराणीति वचनात् प्रातिशाख्यगतमपि विकारं नापद्यन्ते । तद्यथा । मक्ष्वित्युकारः श्रवते सर्वथाप्यपदान्तभाक् । प्लुता याहीत्यतो ऽन्येषु पदेष्वच्छेति विग्रहे[1] । इमा हरी वहतस्ता नो अच्छ वौषट् । एवं प्रयोगः । एवं मक्षुशब्दो ऽप्युदाहार्यः । आकारीभावस्याप्लुतपक्षे न भवति ।

७. प्रकृत्येति वर्तते । एकारश्च ओकारश्च प्रगृह्यौ सन्तौ प्रकृत्या भवतः । प्लुतपक्षे ऽपीति सूत्रारम्भः ।

८. सन्ध्यक्षराणां तालुस्थाने इत्यारभ्य यदुक्तं तद्याज्यान्ते भवति । वक्ष्यमाणं च । मध्ये ऽधिकारात् ।

९. यः प्रातिशाख्ये रेफीति संज्ञित उभा रेफी पञ्चमो नामिपूर्वं इत्येवमादिना प्रकरणेन[2] स याज्यान्ते वषट्कारेण सह सन्धौ रेफमापद्यते । उदाहरणम् । अभि वस्ता वामस्य देव भूरे वौँषट् ।

१०. विसर्जनीय इति वर्तते । अरिफितो विसर्जनीयो याज्यान्ते लुप्यते । अदर्शनमस्य भवतीत्यर्थः । उदाहरणम् । पुनपाना जायते देवकामा३ वौषट् ।

११. याज्यान्त इति वर्तते । याज्यान्ते वर्तमानो मकारो वषट्कारेण सह सन्धौ अनुस्वारमापद्यते । अनुस्वारः प्रातिशाख्ये प्रसिद्धः । अस्योदाहरणम् । जिह्वामग्ने चकृषे हव्यवाहां३ वौषट् ।

---

[1] प्राति० ७. १. । [2] प्राति० १. १०

१२. विसर्जनीयो रिफित इत्येवमादिभ्यो यान्यन्यानि। उक्तेभ्यो ऽन्यानि[1]। तानि प्रकृत्या भवन्ति। प्रकृतिश्चात्र प्रातिशाख्यलक्षणमभिप्रेता। अतो यथालक्षणं भवन्तीत्यर्थः। ननु सर्वोपधस्तु स्वरघोषवत्परो रेफं रेफीति[2] विसर्जनीयस्यापि प्राप्तमेव। नेत्युच्यते। कथम्। अनामिपूर्वत्वाद्याध्यान्ते विसर्जनीयस्य। कथमनामिपूर्वः। उच्यते। ऋकारादयो दश नामिनः स्वरा इति[3] दशानां नामिसंज्ञा। न तु प्लुतस्य। तस्माद्रिफितस्य सन्धिरुक्तः। ननु लुप्यते ऽरिफित इति किमर्थमुच्यते। [4]प्रातिशाख्यलक्षणेन सर्वोपधस्य प्राप्तो लोपः[5]। एवं तर्हि अनुस्वारं मकार इति किमर्थमुच्यते। अन्तःस्थासु रेफवर्जं परासु तांतामिति[6] मा भूदित्येवमुक्तम्।

१३. वषट्कारे य औकारः स चतुर्मात्रो भवति। ननु वषट्कारे औकारस्यासंभवात्कथं एवमुक्तम्। आह। वौषट्शब्दो वषट्कार इत्युच्यत इत्येतस्य ज्ञापनार्थम्। तेनोच्चैस्तरां वषट्कार इत्येवमादौ सर्वत्र वौषट्शब्दो द्रष्टव्यः। प्लुत इति वक्तव्ये चतुर्मात्र इत्युच्यते। पुरस्ताद्दीर्घमित्यत्र द्विमात्रो मा भूत्।

१४. वौषडित्यत्र द्वौ स्वरौ। तयोरौकारस्य चतुर्मात्रतोक्ता। अकारस्यानेन सूत्रेणोच्यते। आह। यद्येवं अकारस्येति[7] वक्तव्यम्। उच्यते। स्वधा नम इति वषट्कारस्य स्थाने वक्ष्यति। तत्र स्थानि-

---

[1] A °वमाद्युक्तेभ्यो योन्यन्यानि असन्नानि तानि प्र° B om. असन्नानि C in marg.
[2] प्राति° ४. ९ । [3] प्राति° १. १७ । [4] A inserts अन्तःस्थः । [5] A निल्लोपः।
[6] आश्व° १. ९. १७ । [7] A अकारस्येति वक्तव्यम् B om. अ. C आ° ।

वत्त्वावात्श्रुतिः प्रतिवर्षं मा विश्वायीति । अतश्च तथापि द्वयोरेव भवति॰।

१५. उभावप्यौकाराकारौ यथास्वं भवतः । वाशब्दो विकल्पार्थः । पक्षे पूर्वो ऽपि विधिः । ननु न वा इति सूत्रं कर्तव्यम् । नेत्युच्यते । चतुर्मात्राया एव प्रतिषेधः प्राप्नोति । न तु व्याकरणश्रुतेः । तन्निवृत्त्यर्थं प्रकृत्येति । उभावित्युच्यते । स्वधा नम इत्यत्र धा इत्यस्य श्रुत्यर्थम् । यथैवोभौ तथैवायं पक्षः स्यात् ।

१६. पक्षे औकारः प्रकृत्या भवति । वाशब्दो विकल्पार्थः ।

१७. षडित्यत्राकारः प्रकृत्या भवतीति आतूकर्ण्य आचार्यो मेने । आचार्यग्रहणं पूजार्थम् । वेत्येव हि वर्तते ।

१८. स्वमतस्थापनार्थं सुयज्ञाचार्यः श्रुतिमुदाजहार । तथैवोक्तम् । यद्ध्रस्वं तद्रथन्तरं यद्दीर्घं तद् बृहदिति । एवं बृहतो रथन्तरस्य च रूपं संपादयन् वषट्कुर्यात् । वौ इति दीर्घं चतुर्मात्रमित्यर्थः[1] । षडिति ह्रस्वं मात्रिकमित्यर्थः ।

१९. येयजामहशब्दमुच्चार्य अनन्तरं देवतादेशनं द्वितीयान्तं कुर्यात् । अपुरोनुवाक्ये प्रदाने । चशब्दः कुर्यादित्यस्यानुकर्षणार्थः । यद्यप्यार्षे देवताशब्दो विद्यते यथाग्निं स्तोमेन बोधयेति तथापि नियमतः कुर्यात् । इज्यमानाया आदेशनं द्वितीयान्तं चेत्येतदर्थसामर्थ्यात्सिद्धम् ।

२०. सप्रैषे प्रदाने देवतादेशनं न विद्यते । न कर्तव्यमित्यर्थः ।

---

[1] A चतुर्मात्रिकमि॰ ।

तुशब्दो नियमार्थः । यथापि प्रैषे देवतादेशनं नास्ति यथा धाना सोमानामिन्द्रेति तथापि याज्यायामादेशनं न भवति ।

२१. परिभाषेयं द्रव्यनियमार्था । वक्ष्यति । प्रह्वा जुहोति प्रहुताहुती जुहोति इत्येवमादौ सर्पिर्हुतं विलीनं आनीयात् । इतिकरणात् प्रत्ययान्तरेणाप्युक्ते । तद्यथा । विप्रुषां होमः । सुवमिद्धे जुहुयुरित्येवमादौ सर्वत्र ।

२२. येषां होममन्त्राणामाम्नाय एवान्ते स्वाहाकारो न पठितस्तेषां[1] अन्ते कर्तव्यः ।

२३. समिध आधीयन्ते हूयन्ते यैर्मन्त्रैस्ते समिदाधानमन्त्राः । तेषामप्यन्ते स्वाहाकारः प्रयोक्तव्यः । पूर्वसूत्रेणैव सिद्धे सूत्रारम्भो नियमार्थः । अतः शाकलहोमे[2] उदकाञ्जलींस्त्रीनप्सु जुहोतीति[3] न स्वाहाकारः ।

२४. कर्म प्रधानं मन्त्रो गुणभूतः । तस्य[4] गुणस्य भेदादनुक्तो ऽपि गुणो साहचर्यादनुमीयते । सूत्रानारम्भे एकार्थानां इदमाप इत्येवमादीनां विकल्पः स्यात् । नानार्थानामुद्ध्रियमाणामृताहुतिमित्येकस्यामेव क्रियायां मन्त्रसमुच्चयः स्यात् । स मा भूदिति सूत्रारम्भः ।

२५. कं प्रपद्ये तं प्रपद्य इत्येवमादौ मन्त्रे भिन्नवाक्ये ऽपि सूत्राम्नायोक्त इतिकरणो द्रष्टव्यो मन्त्रान्तज्ञापनाय[5] । चकारः समुच्चयार्थः । अतश्च केषांचित्स्वाहाकारः । केषांचिन्नमस्कारः । केषांचिदसिशब्दः[6] ।

---

[1] B तेषामप्यन्ते स्वाहाकारः प्रयोक्तव्यः । [2] B inserts तथा C in marg. [3] A ins. चादौ । [4] B तच । [5] B ज्ञापकः । [6] B चि ।

२६. करणशब्दो ऽत्राधिपूर्वो द्रष्टव्यः। अतो ऽधिकरणेषु होतृचमसे ऽवनयतीत्येवमादिषु कृते त्वा भक्षितमिति मन्त्रान्तेनावनयनकर्मणः संनिपातनम्। मन्त्रस्यान्तः कर्मण आदिः। एवमनुष्ठानम्। अधिकरणेष्विति वचनादाप्यायनोपस्थानपर्युक्षणादिष्वनियमो ऽधिकरणाभावात्। संनिपातनमिति। यत्रैकत्र निपातनं संभाव्यते तत्र। न तु क्रियमाणानुवादिषु। भिन्नदेशावस्थानात्कर्त्रोः।

२७. परिभाषेयमवधिनियमार्था। यदा संप्रेषितो ऽध्येषणापूर्वं[1] चोदितस्तदा होतृमैत्रावरुणादिः पठेत्। यदैवाध्वर्युराहानुब्रूहि यजेत्यथैव ते कुर्वन्ति य एवा कुर्वन्तीति शतपथे।

२८. संप्रेषित एव।

२९. इतिकरणो ऽत्र परिसमाप्त्यर्थः। यदनुक्रान्तमेतत्सर्वं प्रैषेषु भवतीत्यर्थः। ननु असंयुज्यविधानात्सिद्धम्। सत्यम्। किंतु एकादशकस्यविधानोक्ते न प्राप्नोति। तदर्थं[2] वचनम्।

३.

उक्ताः परिभाषाः। श्रुतिक्रमेणेदानीं अग्न्याधेयपुनराधेयाग्निहोत्रहोमानां क्रमः। तत्राग्न्याधेयपुनराधेययोः कंप्रपद्यादेरज्ञातस्यापठितत्वादग्न्याधेयपूर्वत्वाच्चाग्निहोत्रहोमस्य क्रमं भित्त्वा तृतीयाध्यायपरिपठितौ दर्शपूर्णमासौ श्रुतिक्रमेणैवाह।

---

[1] A अध्येषणार्थं पूर्वं चादि॰ B अध्येषणापूर्व।, [2] A ins. अर्थेयं C अर्थेन।

15904

१. वक्ष्यति पत्नीयजमानौ व्रत्यमश्नीयातामित्यादि। तत्पूर्वेद्युः कृत्वा ततः पौर्णमासेन हविषा यजते यजमानः। हविषेति जात्यपेक्षमेकवचनम्। यदनेन हविषाशास्त इति दर्शनात्। यद्दर्शपूर्णमासयोरुपवसति न ह वा अव्रतस्य देवा हविरश्नन्तीति श्रुतेः। यद्यपि श्रुतावाधानकर्म पूर्वमुक्तं तथापि पौर्णमासं प्रथमाद्ये तन्त्रं भवत्यामावास्यं द्वितीयाया इत्यनेन दर्शपूर्णमासयोः प्राथम्यं दर्शितम्[1]। अतः सूत्रकारेण दर्शपूर्णमासौ प्रथमं सूचितौ।

२. उपोष्य यजत इत्यर्थः। द्वयोरपि दर्शपूर्णमासयोरेक एवोपवासो मा भूदिति पृथक्सूत्रम्।

३. द्वे एवेति नियमार्थ आरम्भः। अतो ऽनयोरेव पूर्वोत्तरयोरुपदेशो न ज्योतिषामयनोक्तयोः। चातुर्मास्येषु चादीक्षितायनदाक्षायणयाजिनस्तिथित्रयं प्राप्नोति। सांनाय्यस्य हि[2] द्व्यहकालत्वात्। तत्र हि संस्थितायां पौर्णमासमिति (३.१३.२८) वचनात्तत्रापि[3] कथं नाम द्वे एव पौर्णमास्यौ स्यातामिति नियमः। अतस्तत्र पूर्वस्यामैन्द्रस्य दोहः पयस्या दोहश्च। अन्यथा समाप्ते वैश्वदेवे स्यात्[4]।

४. द्वे एव वक्ष्यमाणे।

५. यां तिथिमुपवसतो ऽस्तमयसमीपे पूर्णश्चन्द्रमा उदियात्। उत्सर्पेत्। यां चोपवसतो ऽस्तमितमात्र आदित्ये चन्द्रमा उत्सर्पेत्। ते पौर्णमास्यौ वेदितव्ये। कैश्चित्सूत्रकारैः तिथित्रयं पौर्णमासी-

---

[1] B inserts यतः। [2] हि om. in A; in marg. in C. [3] A तथापि। [4] C हूच।

संज्ञकमुद्दिष्टम् । ज्योतिषामयने च संवादादयं[1] लक्षणोद्देशः कृतः श्रुतिलिङ्गात् । पर्यस्तमयमस्तमित इति आदित्यविशेषणम् । कुतः । लोकप्रसिद्धेः । पूर्ण इति चन्द्रमसो विशेषणमन्यस्याव्यभिचारात् ।

६. श्वः अनन्तरे आगामिन्यहोरात्रे न द्रष्टा इति । एवं ज्ञास्यतं केनचित्प्रमाणेन । भविष्यदनद्यतने । यदि चन्द्रो न भविता । यस्मिंश्चाहनि वर्तमानेऽदर्शनं चन्द्रमसः संभाव्यते ते अमावास्ये इत्युच्येते ।

७. तत्र तस्मिन् पूर्णमासोदये अमावास्योदये च इज्यायां कर्तव्यायां कालं प्रति यथाकामी स्वेच्छया कर्ता स्यात् । ननु च पौर्णमासोदयोपदेशात् अमावास्योदयोपदेशाद्यजत इति वचनात्क्रतुयागकालं[2] प्रति स्वेच्छा सिद्धैव । किं सूत्रारम्भेण । उच्यते । अनारभ्यमाणे सूत्रे पर्वान्तेपर्वान्ते[3] द्वेद्वे इष्टी प्राप्नुतः कालस्योपस्थितत्वाद्यथाप्रतिमासम् ।

८. वक्ष्यति व्याख्यातौ दर्शपूर्णमासौ प्रकृतिरिष्टिपशुबन्धानामिति । तत्र न ज्ञायते के दर्शधर्माः के पौर्णमासधर्मा इति । आवाहनादयश्च शब्दाः साधारण्येन पठिताः । तेषां चार्षमाणानां मन्त्राणां प्रकृताविति यथापठितानां प्रयोगः प्राप्नोति । तद्विवेकार्थमिदमारभ्यते । हविर्ग्रहणमिहानुवर्तते । कः प्रकृतं हविषा यजंत इति । तत्र तृतीयैकवचनान्तं इह प्रथमाबहुवचनेन विपरिणम्यते । वक्ष्यति । उभयत्राग्नेयः पुरोडाशो ऽग्नीषोमीय उपांशुयाजो वैष्णवो वाग्नीषोमीयश्च पुरोडाशः पौर्णमासे हविष्यैन्द्राग्नो

---

[1] A विसंवादादयं । [2] B देशाद्यजत । [3] B पर्वान्ते only ।

ऽसंनयतो द्वितीयो ऽमावास्यायामेवमाद्युपदेशाद्धवींषि व्यवतिष्ठन्ते। सिद्धमेवैतदुत्तरार्थं सूत्र्यते[1] ।

९. हविःसंयुक्ताश्च ये देवताशब्दा अग्नीषोमीयप्रभृतयस्ते चावाहनादिषु यथोपदेशं भेदेन प्रयुज्यन्त इत्यर्थः। इति पौर्णमास्यामित्येवमादेः सूत्रद्वयस्यापरो व्याख्यामार्गः। एतत्पौर्णमास्यामेतदमावास्यायाम् ईदृशादुपदेशाद्व्यवतिष्ठन्ते। असंकरेण भवन्तीत्यर्थः। ननूपदेशात्प्राप्तैव व्यवस्था। सत्यं। उच्यते। शाब्देनैव संयोगेन व्यवस्था भवति। नार्थेन। उक्ता चार्थेनापि व्यवस्था। सेह नेष्यते। शाब्देनैव व्यवस्था नियम्यते। यदि पुनरार्थेनैव व्यवस्था स्यात् ततो वत्सापाकरणसंयोगात्सांनाय्यपक्ष एव अत्याशनं प्रसज्येत। राकासिनीवाल्योस्तु राका पौर्णमास्यां स्यात् सिनीवाली अमावास्यायां यथासंख्ययोगात्[2] । अतस्तन्मा भूदिति सूत्रारम्भः। श्रुतौ च संयोगः पठितः। स च व्यवस्थाहेतुर्भवति। तत्संयुक्ताश्च शब्दाः। तदिति सर्वनाम्ना पौर्णमास्यमावास्ययोर्निर्देशः। पूर्वसूत्रेण शाब्दे संयोगे प्राप्ते वचनं प्राकरणिकसंयोगप्रापणार्थम्। पौर्णमास्यमावास्याप्रकरणसंयुक्ताः कंसपद्यादयो दर्शपूर्णमासयोरेव व्यवतिष्ठेरन् ननु सर्वार्था अनारभ्यवादा इति कृत्वा तत्र[3] को दोषः स्यात्। उच्यते। अप्राकृता भवेयुः। अतश्च प्रतिषेधो ऽर्थ (९.१.४.) इत्येवमादिभिर्न निवर्तेरन्।

१०. असंयुज्य विधीयमानं साधारणमिति प्राप्ते असंदेहार्थं वचनम्। पूर्वयोर्योगयोस्तदपवादो मा भूदिति।

---

[1] A °तदुत्तरार्थं सूत्रारम्भे उच्यते B C (by alt) °त्तरार्थं। [2] C यथा° A यथासंयोगात्। [3] A om. तत्र।

११. उभयोः पौर्णमास्यमावास्याकर्मणोराग्नेयो ऽग्निदेवताकः पुरोलाशो भवति। उभयत्रेत्यधिकारार्थम्। पुरोलाशग्रहणं होतुर्नोपयुज्यत इति चेत्। उच्यते। उपयुज्यते। यत्राग्नेयः पुरोलाशस्तत्राग्निर्मूर्धा भुवो यज्ञस्येति याज्यापुरोनुवाक्यायुगलम्। यत्र पुनराग्नेयमाज्यं तत्र प्रायणीयादृष्टम्।

१२. उभयत्रेति वर्तते। अग्नीषोमीयदेवताक उपांशुयाजसंज्ञो यागो भवति। उपांशुधर्मकः। अत्युपदिष्टस्यापि आज्यहविषो ऽनुपदेशो प्रत्याशने आज्यभक्षणस्याप्रतिषेधार्थः।

१३. उभयत्रेति वर्तते। वाशब्दो विकल्पार्थः। विष्णुदेवत्यो वा उपांशुयाजो भवति। विष्णुरुपांशु यष्टव्यो ऽजामित्वायेति शाखान्तरात्।

१४. अग्नीषोमदेवत्यः पुरोलाशः पौर्णमासे हविषि भवति। हविःशब्देन कर्म लक्ष्यते। अतश्च पौर्णमासे कर्मणि भवतीत्यर्थः। चशब्द उक्तेन सह समुच्चयार्थः। ततस्तृतीयत्वं सिद्धं भवति। पौर्णमासग्रहणमुभयत्र मा भूत्। हविषीति वचनं पुरोलाशस्य पौर्णमासीविकारप्रापणार्थम्। ततश्च ऐन्द्रे पुरोलाशे पौर्णमासीविकारसिद्धिः।

१५. ऐन्द्राग्नः पुरोलाशः असंनयतः सांनाय्यमकुर्वतः। सांनाय्यमिति संज्ञते दधिपयसी उच्येते। तद्द्वितीयममावास्यायां हविर्विकल्पेन भवति। असोमयाजिनो ऽपीत्येतस्मादेव वचनात् ज्ञायते। यस्मिन्पक्षे एतच्च तस्मिन्नैन्द्राग्नो द्वितीयः। द्वितीय इति त्रयोदशा-

मावास्यायामाहुतयो हूयन्त इति चरकाणां श्रुतिरुपांशुयाजप्रतिषेधार्था। तत्पक्षेण[1] सूचितम्।

१६. इन्द्रदेवत्यं सांनाय्यं संनयतः सांनाय्येन यागं कुर्वतो द्वितीयं हविर्भवति। तदाहुर्नासोमयाजी संनयेत्तदु समेव चयेदिति शतपथे। सोमयाजी संनयेत्कामादितर इति कात्यायनस्य।

१७. महेन्द्रो देवता अस्येति माहेन्द्रं सांनाय्यम्। वाशब्दो विकल्पार्थः। सर्वत्रात्र हविरुपदेशो येन च द्रव्येण यक्ष्यमाणः स्यादिति (४.१.३) तज्जातीयाशनप्रतिषेधार्थः।

१८. अमावास्यायामिति वर्तते। विष्णुदेवत्यमुपांशुयाजं कुर्यात्। कः। असंनयन् असांनाय्ययाजी। अथ यदसंनयन् पुरोडाशावन्तरेणोपांश्वाज्यस्य यजतीति श्रुतत्वात्। तुशब्दो ऽत्र व्यवस्थितविकल्पार्थः। तेनामावास्यायां सांनाय्ययाजिनो ऽग्नीषोमौ। असांनाय्ययाजिनो विष्णुरिति। एवमेतानि प्रधानान्युक्तानि। केषांचिच्छाखिनां प्राक्सोमयागादेकपुरोडाशा पौर्णमासी। तत्राप्युपांशुयाजो ऽस्त्येव। तच्च सूत्रकाराः प्रायेण च[2] सूचयन्ति। उत्सन्नानुष्ठानत्वात्। उत्सन्नानुष्ठानं च न कर्तव्यम्। महाव्रते शिष्टदर्शनात्। तदेतत्पुराणमुत्सन्नं न कार्यमिति।

४.

१. आमन्त्रित आहूतो होता हौत्रस्य कर्मणः कर्ता। अन्तरेण मध्येन। उत्करं वेद्येकदेशं विहृतीयं प्रणीताश्चमसादिस्था आपः।

---

[1] A om. च। [2] B C om. च।

उत्करं प्रणीताश्चेति द्वितीया अन्तरान्तरेण युक्त इति। दक्षिणेन प्रपदेन दक्षिणपादाग्रतलेन बर्हिषः स्तीर्णस्याक्रमणं कुर्यादिति वाक्यशेषः। होतृग्रहणं यजमाननिवृत्त्यर्थमिति चेत्। न[1]। यजमानस्य चोत्तरार्धेयाग्निमभिव्याहृत्येति व्यपदेशात् ज्ञायते अन्यो व्याहरतीति। अतो होतृग्रहणमामन्त्रितविशेषणम्[2]। तेन होतैवामन्त्रितः। अतो ब्रह्मादीनामनामन्त्रितानामप्ययमेव सञ्चरः। तथा च कात्यायनः। प्रणीतोत्कराविष्टिष्वित्यविशेषेणाह।

२. स्तीर्णाया वेदेर्योऽन्तः पश्चाद्वर्ती तेन संमिता तुल्या पार्ष्णिः पादस्य पश्चिमो भागः कार्यः। ननु बर्हिराक्रमणमधिकृतं किं वेदिग्रहणेन। उच्यते। यत्रापि बर्हिराक्रमणप्रतिषेधस्तत्राप्येवमेव स्थानं यथा स्यादिति।

३. सव्यं पादं पश्चात्कृत्वा यथाब्दतस्तत्रैव दक्षिणेन स्थानमृजुकायावस्थानं[3] कुर्यात्। प्राचीनन्यायतताया अपवादः। स वै तिष्ठन्नन्वाहेति शतपथे।

४. अग्नये समिध्यमानायेत्यादिना निगदेन संप्रेषितः किं कुर्यादित्याकाङ्क्षित आह।

५. कं प्रपद्य इत्येवमादिकं मन्त्रं जपित्वा ततो वक्ष्यमाणं करोति। दीर्घपाठः शाखान्तरीयत्वात्। अथ यत्पुरस्तात्सामिधेनीनां जपति स्वस्त्ययनमेव तत्कुरुत इति श्रुतेः। मन्त्रस्य चेदं

---

[1] A om. न। [2] B C insert यजमाननिवृत्त्यर्थमिति after °ग्रहणम्। [3] A दक्षिणेन स्थानेन ऋजु°।

तात्पर्यं स्वस्त्ययनार्थतैव। अतो विकृतिषु मोहः। संप्रैषादिवचनं परिभाषितत्वात्। तेन यत्रापि हौत्रस्थानावृत्तिरुक्ता तत्रापि संप्रैषवशादस्यानुवचनस्यावृत्तिर्यथा स्यादेवमर्थं संप्रैषवचनम्। जपो ऽपि संप्रेषितस्यैव[1] यथा स्यादेवमर्थं च।

६. त्रिः सामिको हिंकारः कर्तव्यः। नासामा यज्ञो ऽस्तीति शतपथे। मकारहकारयोर्मध्ये ऽनुस्वार इति हिंकारलक्षणं छन्दोगानाम्।

७. हिंकारं परस्परेणासंहितं त्रिरुच्चार्य ततः प्र वो वाजा अभिद्यव इत्येतां प्राणमात्रसंहितां संदध्यात्। न तु [2]सांहितिकेन लक्षणेन। कुत एतत्। उपशब्दप्रयोगात्। मध्यमया वाचा। मध्यमेन स्थानेन। हिंकारो ऽपि मध्यमेनैव स्थानेन। कुतः। जपित्वेति [3]पूर्वत्र विशेषवचनात्। सामिधेन्यङ्गत्वाच्च हिंकारस्य। हिंकृत्य सामिधेनीरन्वाहेति। त्रिर्हिंकरोतीति श्रुतत्वात्। सामिधेन्य इति संज्ञा श्रुतिसिद्धैवेति न कृता।

८. अग्न आ याहि वीतय इति तृचः। ईळेन्यो नमस्य इति तृचः। एवमेतौ तृचौ। ननु अग्न आ याहि वीतय इत्येका। ईळेन्यो नमस्य इति द्वौ तृचौ। एवं कस्मान्न भवति। उच्यते। यद्येवमभिप्रेतं स्यात् अग्न आ याहि वीतय ईळेन्य इति षडित्येवं ब्रूयात्। एकादश सामिधेनीरन्वाहेति च श्रुतेः।

९. एकाग्रहणं तृचाधिकारनिवृत्त्यर्थम्। ननु यद्येवमभिप्रेतं स्यात्पूर्वेण सह समासं कुर्यात्। उच्यते। तं वा एतं तृचस्यान्तं

---

[1] C by alt प्रेषितः सत्ये। [2] B संहि०। [3] B पूर्वसूत्रे।

इयमन्वाहेति शतपथे । पूर्वस्तृचो द्व्यक्षरानयं तु नहि स्वपद इति समासो नाग्रसूत्रेन ।

१०. उत्तरविवक्षार्थमेवेत्युक्तम् । आवापस्थानार्थं च ।

११. यत्रयत्र साप्तदश्यं सामिधेन्यः कर्तव्याः तत्रतत्र समिध्यमानो अध्वर इत्येतास्तिस्रो ऽनुवक्तव्याः ।

१२. साप्तदश्यमनारभ्याधीतम् । तयोस्तुल्यबलयोर्विकल्पे प्राप्ते साप्तदश्यमेभ्यः प्रतिषिध्यते । तस्मात्साप्तदश्यं च सामिधेनीनां दर्शपूर्णमासादीष्टिचितायनवर्जं प्रतीयात् । आयनाभ्यामिति समासो[१] वर्जनक्रियया सह योगात् । यत्पुनः परिभाषितं साप्तदश्यं च सामिधेनीनामिष्टिपशुबन्धेष्विति तच्चोदकानारभ्यवादयोः[२] प्राप्तयोरनारभ्यवादविहितं विकृतिषु साप्तदश्यं नियम्यते । यत्पुनरयनेषु पाञ्चदश्यं पठ्यते तन्मुन्ययनतुरायणयोर्विकल्पार्थम् । आग्रयणे त्वयनसंज्ञा न भवति । इति दर्शपूर्णमासायनानीति वचनात् ।

१३. ता वै गायत्र्यो भवन्तीति श्रुतौ । विशिष्टाश्च मात्रान्तर एवमेव यथोक्ताः श्रुताः ।

१४. आ जुहोता दुवस्यतेत्यस्यास्तृतीये वचने यः प्रणवस्तेनाग्ने महाँ[३] असि ब्राह्मण भारतेति संदध्यात् । उत्तमायै तृतीये वचने प्रणवेन निगदमुपसंदधातीति श्रुतत्वात् । सामिधेन्य आग्नेय्यः स चाग्निराहवनीय इध्मसमिन्धनद्वारेण स्तूयते । तं त्वा समिद्भिरङ्गिर

---

[१] ०क्रियया A क्रिया B C । [२] C in marg पाञ्चदश्यसाप्तदश्य instead of प्राप्त । [३] C महं here and elsewhere.

इति विशेषविज्ञानात्। इत उत्तरेण चानुवचनशेषेण[१] स एव स्तूयते। इयं वा इदं सर्वं छन्दस्कृतं चाच्छन्दस्कृतं च तेन सर्वेणाग्निं स्तवानीति श्रुतेः (कौ० ब्रा० ३.२)।

१५. अग्ने महाँ[२] असि ब्राह्मण भारतेति निगदखण्डस्य प्रणवेन संधानवचनादार्षेयैः सह संधानम्। अमुतः परस्तादित्यर्थः। अर्वाञ्चि अवरोहेणेत्यर्थः[३]। यजमानस्य न होतुः। त्रीणि नाभ्यधिकानि। आर्षेयाणि ऋषिनामानि। ते च ऋषयो ये यस्य यजमानस्य पूर्वे मन्त्रदृशो यावन्तो वा प्रतिगोत्रं स्मर्यन्ते। तदभिधायिनः शब्दा अण्प्रत्यययुक्ता[४] आमन्त्रितविभक्तियुक्ताश्च उच्चारणीयाः। कुत एतत्। मानवेति प्रदर्शनात्। तद्यथा। वासिष्ठशाक्तपाराशर्येत्यादि। यद्यप्येतरेयिणामेकार्षेयस्याभ्यासेन त्रिसंख्यापूरणमुक्तमभ्यधिकसंख्यानां[५] च समासेन तथापि यथा स्मर्यमाणान्येवोच्चारयितव्यानि। स्मरणस्य दृढत्वात्। ततश्चासंहितानि असमस्तानि च वक्तव्यानि। वासिष्ठादिभिः शब्दैरग्निरेवामन्त्र्यते। तथा हि वाक्यसंयोगः। यद्येवं कथं न ह वा अनार्षेयस्य देवा हविरश्नन्तीति (कौ० ब्रा० ३.९)। नैष दोषः। यजमानस्य हि वासिष्ठत्वादग्निर्वासिष्ठ इत्युच्यते। तेनोत्पादितत्वात्।

१६. द्विगोत्रः क्रीतः स्वयमुपनीतादिः[६]। तद्यथा। शुनःशेप

---

[१] A C in marg. विशेषेण। [२] C महं। [३] A °रोहणेने(?) यस्य च देवेन इत्यनेन संधानम्। यथैतं पञ्चदशपदं निगदमुपसंदधातीति श्रुतेः। यजमानस्यार्षेयत्यर्थः। यजमा°। [४] अण्प्रत्यय° A अपत्यप्रत्यय° B C। [५] B °ख° A C °ख्या°। [६] B om. क्रीतः E. उपनतामेदिः C उपनतादिः।

आजीगर्तिः। कृत्रिमस्तु देवरातो वैश्वामित्रः। तत्पक्षो वाऽत्र-स्वार्षे। तथा च मनुः।

गोत्ररिक्थे जनयितुर्न हरेद्दत्त्रिमः क्वचित्।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥(९.१४२)

१७. अब्राह्मणस्य यजमानस्य यो होतेत्येवं मा विह्वायीति। यजमानाधिकारोऽनुवर्तते। क्षत्रियादेर्यजमानस्य पुरोहितप्रवर-कीर्तनेनाग्निं ब्रूयात्। प्रवरग्रहणादाग्नीध्रुक्तं स्वार्षेयेण भवति।

१८. मानव एवं वा सर्वेषां यजमानानां ब्रूयात्।

१९. देवेद्ध इत्येवमादिकं घृताहवन इत्येवमन्तं निगदस्वरूपमुक्त्वा विरमेत्। तस्य सप्त पदानि समस्यावस्येदिति (कौ० ब्रा० ३.२) श्रुतेः। देवेद्ध इत्यग्नेः स्वाभाविको गुणः। तेन पिच्छायामनूहः।

२०. अथ चत्वारीति श्रुतेः। (कौ० ब्रा० ३.२)

२१. अथ चत्वारीति श्रुतत्वात्। चमसो देवपानो देवांस्त्वं परिभूरसीति स्वाभाविकौ गुणौ। अतो न पिच्छायामूहः।

२२. विग्रह्यो नानावाचौ। नाना विरमन् प्रतिवाक्यं देवता आवाहयति। अथ यद्भवयाह देवता आवाहयतीति श्रुतेः। आवाहयतीति ण्यन्तनिर्देशाद्देवता इति च द्वितीयानिर्देशाद्वक्ष्यमाण-मन्त्रवाक्यार्थ उपवर्णितः। अतश्च योऽयं पूर्वप्रक्रान्त आहवनीयो ऽग्निः स एवाध्येष्यते। तत आहवनीयत्वे ऊहः सिद्धः।

५.

१. देवानिति पित्र्यायामनूहः सामान्यवचनात् । तथाकारस्य श्रुतिः प्राप्नोति चेत् । न । देवशब्देनात्र यागाभावात् ।

२. यत्राज्यभागयोरभावस्तत्र कथं नाम नैतौ शब्दावुच्येतामिति संज्ञाकरणम् । अग्न इत्येतदामन्त्रितमावाहनानां प्रथमस्य पदस्य[1] भवतीति सवनीय आग्नेये श्रुतिपाठो ज्ञापकम् । अथावाहन आवह देवान्यजमानायाग्निमग्न आवह वनस्पतिमावहेति तत्राज्यभागयोरभावे ऽप्यामन्त्रितप्रयोगात्[2] ।

३. अथ ये पौर्णमासीदेवतावाचिनः शब्दास्ते पौर्णमास्यां प्रयोक्तव्याः । नामावास्यायाम् । ये ऽमावास्यादेवतावाचिनः शब्दास्ते ऽमावास्यायां प्रयोक्तव्याः । न पौर्णमास्याम् । अर्थाभिधानेन मन्त्रा उपकुर्वन्ति नान्यथेति । तथा चोक्तम् । यथार्थं वा शेषभूतसंस्कारादिति जैमिनिना । अनेनाप्युक्तमेव । इति पौर्णमास्यामित्यमावास्यायामित्युपदेशाद्व्यवतिष्ठन्ते तत्संयुक्ताश्च शब्दा इति ।

४. देवाँ आज्यपाँ[3] इत्यत्र नकारलोपः[4] । नकार आकारोपधः पदान्तो ऽपि स्वरोदयो लुप्यत (प्रातिशा ४, २६) इत्यादौ लक्षणस्य प्रदर्शितत्वात्[5] । यत्र वैश्वदेवं हविस्तत्र विश्वान्देवाँ आवहेत्येतत्सिद्धं भवति । पृषदाज्यपानिति पशौ प्राप्नोतीति चेत् । न । यत्र देवानामाज्यपानां प्रिया धामानीति प्रैषे ज्ञापकादनूहः ।

---

[1] A om पदस्य । [2] B चामन्त्रिताग्निशब्दप्रयोगात् । [3] C देवं चाज्यपं । [4] B C om नकारलोपः । [5] A inserts प्रयाजानुयाजार्थे चाहवनीयाभावे वा प्रतिषेधः । C ins. कृते ।

५. अथ यदग्निं होत्रायावाहयति स्विष्टकृतं तदावाहयतीति श्रुतेः। पित्र्यायां कव्यवाहनविशिष्टे ऽग्नौ। अग्निं कव्यवाहनं होत्रायावहेत्यूहः।

६. ननु अस्याकारस्य श्रुतिर्न प्राप्नोति। स्वस्य महिम्नो यागाभावात्। उच्यते। यदेव वाचाम्वाह वाचा यजति तेनो हैवास्य स्वो महिमेष्टो (कौ० ब्र० ३. ३) भवतीति यागानुप्रवादात् श्रुतो भवति।

७. शब्दस्वरूपप्रदर्शनार्थ इतिकरणः। तेनाचाप्याकारस्य श्रुतिर्नास्ति। समाप्तमनुवचनम्। वरुणप्रघासे आहवनीयौ द्वौ भवतः। तत्र यदाध्वर्युरग्निभ्यां समिध्यमानाभ्यामिति संप्रेष्यति ततः संप्रेषवशादूहः। स उच्यते। अग्नी सहान्तौ स्थो ब्राह्मणौ भारतौ। चोदनासंदेहत्वात्प्रवरनाम्नामनूहः। देवेद्धौ मन्विद्धावृषिष्टुतौ विप्रानुमदितौ कविशस्तौ ब्रह्मसंशितौ घृताहवनौ। प्रणौ यज्ञानां रथ्यावध्वराणामतूर्तौ होतारौ तूर्णी हव्यवाहौ। आस्पात्रे जुह्वौ देवानां चमसौ देवपानावरां इवाग्नी नेमी देवान्युवां परि भुवौ स्थः। आवहतं देवान्यजमानाय अग्निमग्नी आवहतं सोममावहतं अग्निमावहतं सोममावहतं सवितारमावहतं सरस्वतीमावहतं पूषणमावहतं इन्द्राग्नी आवहतं वरुणमावहतं मरुत आवहतं कमावहतं देवाँ आज्यपाँ[1] आवहतं अग्निं होत्रायावहतं स्वं महिमानमावहतं आ च वहतं जातवेदसौ सुयजा च यजतम्।

८. उपविश्येति वचनमूर्ध्वजानुविशेषणार्थम्। दक्षिणेन प्राङ्-

---

[1] C देवं चाज्यपं।

शेनेति उभाभ्यां मा भूत्। ननु एकवचनमप्यस्ति किं दक्षिणेनेति वचनेन । सत्यम्। अस्ति जातावप्येकवचनम्। अत उभाभ्यामेवित्याशङ्क्येत । भूमिमन्वारभ्येति वचनाद्बहिरपनीयेति गम्यते ।

९. अस्यै प्रतिष्ठाया मा छित्सि इत्येवमादिर्मन्त्रः । अस्मिन्मन्त्रे पञ्चदशेन वज्रेणेति सामिधेनीसङ्ख्याभिप्रायो विकल्पः । अतः साप्तदश्ये सप्तदशेन । उपसत्सु नवकेन । एवं यावती सङ्ख्या तावतिथेन वज्रेणेति ब्रूयात् ।

६.

१. अमुकशर्मा होता मानुष इत्येवमध्वर्युणोक्तः। अस्मिन्नवधाविदमाह ।

२. मानुष इत्येवमन्तेन मन्त्रेण प्रवृतः देव सवितरित्येवमादिकं मन्त्रं जपति[1] किमर्थं मानुष इत्युक्तः प्रवृतो जपत्वित्युभयम् । उच्यते । प्रवृत इति वदन् प्रवरणनिमित्तत्वं जपस्य दर्शयति । पशौ च यजमानस्यापि प्रवरणमस्ति। सोमे च मैत्रावरुणादीनाम् । तेषामप्ययं मन्त्रो मा भूदिति विशेषवचनं मानुष इत्युक्त इति ।

३. उपोत्थाय तस्मिन्नेव प्रदेशे अध्वर्योर्दक्षिणमंसं दक्षिणेन प्रादेशेन अन्वारभ्य स्पृष्ट्वा सव्येन च वामहस्तप्रादेशेन आग्नीध्रस्य दक्षिणमंसमेवं युगपदन्वारभ्य इन्द्रमन्वारभामह इत्येवमादिकं मन्त्रं जपति ।

४. षण्मोर्वीरित्येवमादिकं मन्त्रं अवसृज्य विसृज्यांसौ जपति ।

---

[1] A ins. जप ।

प्राप्तमेवैतत् । शास्त्रपर्यायमुच्यते । किमुक्तं भवति । अध्वर्यू संप्रैष॰ तिष्ठति (५.१५.६) इत्युक्ते¹ षण्मोर्वीरिति जपित्वा तिष्ठति ।

५. ऐन्द्रीमावृतमित्येवमादिना मन्त्रेणावर्तते² । दक्षिणं बाहुमन्विति बाहुवचनात्तत्रैव स्थित आवर्तते ।

६. आवर्तनादनन्तरं होतृषदनाच्छुष्कं तृणमादाय उभयतो मूलतो ऽग्रतश्च छित्त्वा ततो निरस्तः परावसुरित्येवमादिना मन्त्रेण निरस्येत् । दक्षिणापरं दिगन्तरालं प्रति । ननु छेदनक्रियया निरसनमन्त्रस्य किमर्थं व्यवधानं सूचितम् । उच्यते । समानं होषा तृणनिरसनमित्यत्र तदन्तर्भूतयोस्तृणादानच्छेदनक्रिययोर्ग्रहणं यथा स्यादिति । अङ्गुष्ठोपकनिष्ठिकाभ्यां होतृषदनात्तृणमिति सूत्रान्तरम् ।

७. तृणनिरसनमन्त्र आभिचारिकस्तदुच्चारणे ऽन्यत्रवचनादपामुपस्पर्शनं सिद्धम् । तदुच्यते । पित्र्यायां मन्त्रोत्सर्गे ऽपि यथा स्यात् । अब्ग्रहणं च वषट्कृत्योपस्पर्शनम् । उत्तरौष्ठ उत्तरमुपस्पृश्येत्येवमादौ यथा स्यात् ।

८. होतृषदनमिति प्रकृतं तृणमिति च । होतृषदने ऽशुष्कं तृणं निदध्यात् । शुष्काशुष्कविशेषणं शाखान्तरात् । स्वशाखायां तु ब्रह्मत्वप्रकरणे । अथ यद्ब्रह्मसदनात्तृणं निरस्यति शोधयत्येवैनत्तत् इति (कौ॰ ब्रा॰ ६.१२) अविशेषेण³ शोधनश्रुतेः ।

९. होतृषदनाधिकारो ऽनुवर्तते । होतृषदन उपविशेत् ।

---

१ A C जप्त्वा । २ A inserts दक्षिणं बाहुमन्वा॰ । ३ C om. अवि ।

इदमहमर्वावसोरित्येवमादिना मन्त्रेण। स्थवादिनिर्देशः क्रमार्थः। सीदामीति मन्त्रवर्णादुपवेशने सिद्ध उपविश्येति वचनं होतृषदन उपवेशनार्थम्। इतरथा ऊर्ध्वजानुरुपविशेत् तथा दृष्टत्वात्।

१०. उपस्थ उत्सङ्गः। उपेत्य यस्मिन् पुत्रादयस्तिष्ठन्ति। स च समजानोरुपविष्टस्य[1] भवति। तं दक्षिणोत्तरिणं दक्षिणावयवोन्नततरं कृत्वा प्राञ्चौ पाणी प्राचीं दिशं प्रत्यञ्चितौ प्रगुणाङ्गुली प्रगृह्य हस्तसंपुटं कृत्वा। यद्यप्येवमेव परिभाषितं तथापि लोके ऊर्ध्वावपि पाणी संपुटीकृतौ क्रियेते। तन्निवृत्त्यर्थं प्राञ्चाविति।

११. नमो द्यावापृथिवीभ्यामिति मन्त्रं पठन् गार्हपत्याहवनीयाववीक्षेत।

१२. उदग्गच्छन्नेष वामाकाश इति पठेत्। आहेति ब्रुवन्[2] दर्शयति नायं जपः। अतश्च पित्र्यायामनुत्सर्गः।

१३. विश्वे देवा इति यद्यपि सूक्तादिस्तथाप्येकां प्रतीयादन्यत्रेति वचनादेका। तदद्य वाचः प्रथमं मसीय। नमो महद्भ्यो नमो अर्भकेभ्यः। अत्र प्रथमोत्तमयोर्न त्रिर्वचनम्। न चैकस्वर्यम्। अन्यत्र जपेभ्य इति (१.१.१८) वचनात्।

१४. [3]अवसायेत्यत्रावाच्यम् उत्तरत्रोपांशुत्ववचनमुच्चैस्त्वोपांशुत्वयोः[4] संततासंभवादिति चेत्। न। सर्वोपांशुत्वसंभवोऽस्ति।

---

[1] A C आम्नात। [2] A एतदेव इशं°। [3] A inserts into the text of the Sūtra after वोचं the following words मं। सृगादापनादि मन्त्रयेति सूत्रे भाष्यकारैरुपसदिष्ट्यादौ सतुरत्नमालाकारैश्चोक्तत्वात इतः सृगादापनत्वादित्यर्थः। [4] A °शुवचनादुच्चैरुपांशुवचनत्वयोः।

तत्र संधानं मा भूदित्युच्यते अवसायेति। अत्र द्वियजमानके बहुयजमानके च ऊहः प्राप्नोति। स उच्यते। साधु वां यजमानौ देवता। साधु वो यजमाना देवता। पित्र्यायां च। अग्निः कव्यवाहनो होता[1] वेत्त्वग्निः कव्यवाहनो होत्रं[2] वेत्तु प्रावित्रं साधु ते यजमान देवता।

१५. अनुख्यैरित्यर्थः। अत्रापि द्वियजमानके। यावग्निं होतारमवृणाथाम्। बहुयजमानके। ये ऽग्निं होतारमवृणध्वं। पित्र्यायाम्। यो ऽग्निं कव्यवाहनं होतारमवृथाः। एवमूहः कर्तव्यः।

१६. घृतवतीमित्येवमादिना मन्त्रेणाध्वर्युः स्रुचौ ग्राहयित्वा ततः पञ्च प्रयाजान्यजति। स्रुचावादाप्येति वचनं स्रुगादापनसंज्ञार्थम्। स्रुचाविति द्विवचनं विवक्षितम्। अत एकस्रुक्के नायं मन्त्रः। वरुणप्रघासेषु स्रुग्बहुत्वे ऽपि भवति। उत्तरस्यां वेदौ होतृकर्मेति (३.१४.१५) वचनात्। अत एवाध्वर्युपदस्यानूहः। आदाप्येति ल्यबा निर्देशो ऽङ्गाङ्गिसंबन्धज्ञापनार्थम्। अतः प्रयाजानुयाजान्वा परिहाप्येत्येवमादौ (८.२५.२) नायं भवति। ईळामग्ने देवानिति पित्र्यायामनूहः। सर्वत्रास्यार्थस्याविशेषात्। तथा च शतपथे। मनुष्या वा ईळेन्याः पितरो नमस्या देवा यज्ञिया इति। पञ्चेति कर्मभेदार्थम्। अतः प्रयाजानामन्तरालेषु होतुर्न वाग्यमः। द्विगोत्रस्यापि पञ्चैव न षट्। प्रयाजानिति शास्त्रसंव्यवहारार्थम्। पञ्च यजति इति नियमात्। द्विगोत्रस्य समस्य यागः। ख्यातामुभे वाश्विनुयाज्याधर्मः श्रुतेरिति दर्शनात्।

---

१ C om. होता। २ C om. होत्रं।

७.

१. समिधः समिधो अग्न आज्यस्य व्यन्त्वित्यनया य इज्यते स प्रथमः प्रयाजः। आग्नेयाः प्रयाजाः। सौचीकस्याग्निः। प्रयाजान्मे अनुयाजांश्च केवलानिति लिङ्गात्। अतश्च नाहवनीयः। तेनाहवनीयविकारे ऽप्यत्राग्निपदस्यानूहः। ननु होतृविशिष्टोऽग्निः स्विष्टकृत्। कथमेतत् ज्ञायते। अथ यदग्निं होत्रायावाहयति स्विष्टकृतं तदावाहयति तथा नात्राग्निं होत्रादित्याह पशवो वै प्रयाजा रुद्रः स्विष्टकृदिति श्रुतेः (कौ० ब्रा० ३. ३. ४)। अयं च सौचीको होतृविशिष्टः। होत्रादहं वरुण बिभ्यदायमिति लिङ्गात्। ततः पित्र्यायां कव्यवाहनेत्यूहः प्राप्नोति। उच्यते। अन्य एव कव्यवाहनो ऽग्निर्न सौचीकः। कथं ज्ञायते। मन्त्रवर्णात्। यो अग्निः क्रव्यात्प्रविवेश वो गृहमिमं पश्यन्नितरं जातवेदसम्। तं हरामि पितृयज्ञाय देवमिति तस्माद्व्यपदेशादन्यः कव्यवाहनः। अतः पित्र्यायामनूहः। प्रथमग्रहणस्य प्रयोजनमुच्यते। इति प्रयाजयाज्या (१,७,६) इत्यत्रेतिकरणः प्रकारार्थः। एवंप्रकाराः प्रयाजयाज्या इति। किमेवं सिध्यति। उच्यते। केषांचिदध्वर्यूणां मित्रविन्दा दशप्रयाजा। तत्र त्वष्टा संनियतस्थानः। तस्य प्राथम्यं मा भूदिति प्रथमवचनम्।

२. तनूनपादग्न आज्यस्य वेत्वनया[1] द्वितीयः प्रयाजः। द्वितीय इत्यस्ति वसिष्ठादीनामयं चोत्तरश्च विकल्पेन।

३. नराशंसो अग्न आज्यस्य वेत्वनया याज्यया द्वितीयः प्रयाजो

---

[1] A ins. द्वितीयया।

भवति । वसिष्ठादीनाम् । अत्रापि द्वितीय इत्यनुच्यमाने पूर्वेण सह विकल्पः स्यात् । वसिष्ठशुनकानां नराशंसो ऽत्रीणां चैक इति कात्यायनवचनात् । अत्रीणां नराशंसो विकल्पः । तैः सह समासो वध्र्यश्वानां विकल्पार्थः । कण्वानां तनूनपान्नराशंसावुभौ पठ्येते । तत्र पक्षे समुच्चयः । पक्षे ऽन्यतरेण प्रयोगः । तथैव संकृतीनामपि यथा स्यादेवमर्थः समासः । राजन्यानामसमासात्पूर्वेषां समासे तुल्यधर्मता सिद्धा । अतश्च यथोक्तो ऽर्थः ।

४. इळो अग्न आज्यस्य व्यन्त्वित्येतया याज्यया तृतीयः प्रयाजो भवति । येषां तनूनपान्नराशंसावुभावाम्नातौ तेषामुभयोर्भिन्नाभिन्नयोः पाठसामान्यात् प्रयोग आशङ्क्येत[1] । तन्निवृत्त्यर्थं तृतीयवचनम् ।

५. बर्हिरग्न आज्यस्य वेत्वित्यनया याज्यया चतुर्थः प्रयाजो भवति । चतुर्थ इति संव्यवहाराय संज्ञा । वक्ष्यति । चतुर्थोत्तमावन्तरेण चत्वार (३.१३.१८.) इति । तत्रास्य ग्रहणं यथा स्यात् ।

६. स्वाहाग्निमित्येवमादिकया याज्यया उत्तमः प्रयाजः । व्यवस्था तु देवतापदानां चोदनोपदेशात् । अग्नेर्होतुः स्वस्य च महिम्नो निगमप्रतिषेधार्थं[2] व्यवायप्रतिषेधार्थं च दण्डकपाठः । आवाहनदृष्टत्वात्प्राप्नोति[3] । अन्यथास्य प्रकृतिरित्याख्येति वचनात् (१.१६.२) । इति प्रयाजयाज्याः । इतिशब्दः प्रकारे । ततो

---

[1] A· B C आशङ्क्येत । [2] A निगद B निगम॰ C निगदम॰ । [3] B आवहने ॰प्राप्तिः ।

मिषविन्द्रायां त्वष्टा अग्न आज्यस्य वेतु इति नवमो दशमो वा शाखान्तरात्। स्वाहा देवा आज्यपा जुषाणा अग्न आज्यस्य व्यन्त्विति हैक आहुः। अस्य[१] प्रतिषेधार्थं इति प्रयाजयाज्या इति नियमवचनम्।

८.

१. अग्निर्वृत्राणि जङ्घनत् त्वं सोमासि सत्पतिरित्येतावाज्यभागौ पौर्णमास्यां भवतः। अथ यत्पौर्णमास्यां वार्त्रघ्नावाज्यभागौ भवत (कौ० ब्रा० ३.५.) इति श्रुतेः। ऋगुद्देशेनाज्यभागसंज्ञा। ततः श्रूयमाणं प्राकृतं नामधेयमन्यस्मिन्द्रव्ये प्रकृतिं निवर्तयतीति (९.१.२) सवन्तावाज्यभागौ इत्येवमाद्युच्यमाने उभयोरेव निवृत्तिर्भवति। यद्यपि सामान्यान्नियम (१.१६.१८) इति सिध्यति तथाप्येवं सति प्रतिपत्तिगौरवं स्यात्। वार्त्रघ्नावितीयमनुगता संज्ञा। ततः सार्वकामिक्यां केषांचिदेव तावन्यावाज्यभागौ[२] भवतः। पाप्मोपघाते सति कामो लभ्यते। अभिचारे च। तत्र हन्तेरर्थवत्त्वात्। शुद्ध्यर्थायामिष्टौ च। तत्रापि पाप्मा वै वृत्रो यो भूतेर्वारयित्वा तिष्ठति कल्याणात्कर्मणः साधोरिति श्रुतेः[३]।

अभिशंस्तो मृषा कृच्छ्रं चरेदाग्नेयमेव वा।
निर्वपेत पुरोलाशं वायव्यं पशुमेव च॥

इत्येवमादौ शुद्ध्यर्थे वार्त्रघ्नौ भवतः। अन्वर्थसंज्ञाविज्ञानात्।

---

[१] B inserts इति after आहुः Cf. कौ०ब्रा० १.४। [२] A ०चिदेनावाज्यभागौ।
[३] शतपथब्रा० ११.१.५.७।

२. अग्निः प्रत्नेन मन्मना सोम गीर्भिष्ट्वा वयमित्येतावमावास्यायाम् । आमावास्ये कर्मणि । वृधन्वन्ताविति संव्यवहारार्थं संज्ञा । अन्वर्थसंज्ञा च । तत्र हविषि एते एव । पुरोनुवाक्याग्रहणं च न[1] कृतं याज्यासंनिधिसिद्धेः ।

३. आग्नेयसौम्ययोर्यथासङ्ख्येन ।

४. अग्निर्मूर्धा दिवः ककुदित्याग्नेयस्य पुरोलाशस्य पुरोनुवाक्या । अग्नेरिति नोक्तं पुरोलाशस्यैवैतौ यथा स्याताम् । ततो हविर्यज्ञसोमेषु पुरोलाशानामेवैते भवतः । पशुषु तु विपर्यासः कर्तव्यो यातयामत्वदोषात् ।

५. भुवो यज्ञस्य रजसश्च नेता एषा याज्या । आग्नेयस्येति वर्तते ।

६. अग्नीषोमाविमं सु मे एषा उपांशुयाजस्य पुरोनुवाक्या भवति । यथा पूर्वत्र तद्धितेन निर्देशस्तथेह[2] न कृत उपांशुयाजचोदनायामेव भावार्थम् ।

७. उपांशुयाजस्य जुषाणावित्येवमादिका याज्या ।

८. इदं विष्णुर्वि चक्रमे पुरोनुवाक्या । वषट् ते विष्णवास आ कृणोमीति याज्या । वैष्णवस्योपांशुयाजस्य । तद्धितनिर्देशो नियमार्थ इत्युक्तम् । अत्र पुरोनुवाक्या याज्येति नोक्तम् । पूर्वत्र द्विरुक्तं पारिभाषिकमिति न्यायः सिद्धः । अतः प्रतीकग्रहणं याज्यापुरोनुवाक्यानामिति (१.१७.१) अविशेषे सत्यपि पूर्वा पुरोनुवाक्या ततो याज्या ।

९. वैष्णवस्येति वर्तते । जुषाणो वा निगदो वैष्णवस्य याज्या-

---

[1] A B C om. न । [2] A निर्देशस्त्वितः ।

त्वेन भवति । कथमेतत् ज्ञायते याज्यात्वेन भवतीति । नन्वयं विकल्पः पूर्वेण याज्यानुवाक्यायुगलेन युक्तः । नेत्युच्यते । एकत्वाभिगदस्य याज्यात्वेन च दृष्टत्वात् याज्यात्वमध्यवसीयते । जुषाणो विष्णुराज्यस्य हविषो वेत्वित्येवं प्रयोगः सामर्थ्यात् ।

१०. अग्नीषोमा सवेदसा पुरोनुवाक्या । युवमेतानि दिवि रोचनानीति याज्या । कस्य । अग्नीषोमीयस्य पुरोलाशस्य । पुरोलाशस्तद्धितवाच्यस्तस्य चोक्तं प्रयोजनम् ।

११. इन्द्राग्नी अवसा गतं पुरोनुवाक्या । प्र चर्षणिभ्यः पृतना हवेषु याज्या । तद्धितनिर्देशः पुरोलाशाभिधायी उक्तप्रयोजनः ।

१२. एन्द्र सानसिं रयिं पुरोनुवाक्या । प्र ससाहिषे पुरुहूत शत्रून् याज्या । इति सांनाय्यस्य । सांनाय्यस्येति वचनं नियमार्थम् । अतो नान्यस्यैन्द्रस्य[1] हविषः ।

१३. महाँ इन्द्रो य ओजसा महाँ इन्द्रो नृवदा चर्षणिप्रा इत्येते याज्यानुवाक्ये माहेन्द्रस्य सांनाय्यस्य ।

१४. इन्द्रं वो विश्वतस्परि पुरोनुवाक्या । मादयस्व हरिभिर्ये त इन्द्रेति याज्या । एते याज्यानुवाक्ये इन्द्रस्य न महेन्द्रस्य । किंविशिष्टस्येन्द्रस्य । अप्रतिनिधेः । कीदृशः प्रतिनिधिः कीदृशो वाप्रतिनिधिः । उच्यते । यः कस्यचित् स्थाने सादृश्येन भवति स प्रतिनिधिरित्युच्यते । तद्यथा । अयमेवामावास्यायामिन्द्रश्चन्द्रमसः प्रतिनिधिः । कथमेतत् ज्ञायते । इन्द्रश्चन्द्रप्रतिनिधिरिति

---

[1] A om. ऐन्द्रस्य ।

श्रुत्यर्थवादात् । अथ यदमावास्यायामिन्द्रं यजत्येतज्ज्योतिर्वा अमावास्या न ह्यत्र चन्द्रो दृश्यत (कौ० ब्रा० ३. ६) इति । किमेतेन सूत्रेण सिद्धम् । अतः सांनाय्यालाभे सायंदोहस्थाने वा पुरोडाश इत्येवमादौ एन्द्र सानसिं रयिं प्र ससाहिष इति याज्यापुरोनुवाक्ये सिद्धे भवतः । कथं नामाप्नुतः । सांनाय्यस्येति नियमात् । अतो ऽप्रतिनिधेरिति देवताविशेषणत्वादैन्द्रं पञ्चशरावमोदनं निर्वपेत्पुरोडाशं वेति भेदेनाप्युपपातात्तत्प्रतिनिधिः प्रायश्चित्तं[1] वेति । यथास्तु तथास्तु । एन्द्र सानसिं प्र ससाहिष इत्येते[2] भवतः । ननु दृष्टचन्द्रायां प्रतिनिधिकार्याभावात् नैते प्राप्नुतः । उच्यते । सांनाय्यस्येति वचनाद्भविष्यत इति । अमावास्याव्यतिरेकेणैन्द्रस्य हविषः सांनाय्यवर्जितस्य इन्द्रं वो विश्वतो मादयस्व हरिभिरित्येते याज्यानुवाक्ये भवतः । सत्त्रविषये तु यः कात्यायनपठित ऐन्द्रः पञ्चशराव ओदनो वा[3] तस्यामावास्यायामपीन्द्रं वो विश्वतो मादयस्व हरिभिरिति[4] । तत्र हि सत्यासंभवात् । ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्पुरोडाशं वा यद्योदनीयन्ति यद्यपूपीयन्तीति श्रुतेः (कात्या० १२. २. १२)। यदि यजमाना बुभुक्षया ओदनमिच्छन्ति यदि पुरोडाशमिच्छन्ति तत ऐन्द्रः पञ्चशराव ओदनो वा[5] । अतो ऽसौ न चन्द्रप्रतिनिधिः ।

---

[1] °कात्या० २५. ४. १—५ । [2] B adds तु । [3] B in marg. पुरोडाशो वा । [4] B एते । [5] B adds पुरोडाशो वा ।

९.

१. पिप्रीहि देवाँ उशतो यविष्ठ एषा स्विष्टकृतः पुरोनुवाक्या भवति । पुरोनुवाक्याग्रहणं निगदव्यपेतत्वादृचः संदेहव्युदासार्थम् ।

२. अत्र प्रयोगः । ये यजामहेऽग्निं स्विष्टकृतमिति । किं कारणम् । अथ यदग्निं स्विष्टकृतमन्ततो यजतीति श्रुतेः । प्रैषे च तथा दृष्टम् । होता यक्षदग्निं स्विष्टकृतमिति । तथा च संप्रैषः । अयाळग्निरिति पदद्वयस्यार्थः इष्टवानग्निर्वक्ष्यमाणा देवताः स्विष्टकृदभिधानं चैतत् । कुतः । एष ह वै देवेभ्यो हविः प्रयच्छतीति श्रुतेः । अतश्च स्विष्टकृद्विकार ऊहः । तद्यथा पित्र्यायाम् । ये स्वधामहेऽग्निं कव्यवाहनमयाळग्निः कव्यवाहन इति । अवसाननियमार्थो दण्डकपाठः । तद्धैके देवतां पूर्वां कुर्वन्त्ययाड्कारादिति । तद्व्युदासार्थश्च दण्डकपाठः । अनुयाजवदप्रयाजमुदयनीयं तैत्तिरीयाणाम्[1] । अतश्च तेषामुदयनीये प्रयाजा न सन्ति । अनुयाजास्तु विद्यन्ते । तत्र भविष्यत्स्वप्यनुयाजेषु अयाड् देवानामाज्यपानां प्रिया धामानीत्येवमेव प्रयोगः । अयाळिति लुङ्छन्दसि कालत्रयेऽपि विधानात् । अग्नेः कव्यवाहनस्य होतुः प्रिया धामानीति पित्र्यायामूहः । जातवेदा इति गुणपदं वरुणस्यापि तुल्यम् । अतश्चावभृथेऽप्यूहः । ये यजामहेऽग्नीवरुणावयाष्टामग्नीवरुणावग्नेः प्रिया धामान्ययाष्टां सोमस्य प्रिया धामान्ययाष्टां वरुणस्य प्रिया धामान्ययाष्टां देवानामाज्यपानां प्रिया धामानि

---

[1] B adds कर्म ।

यक्षतामग्नीवरुणयोर्होत्रोः प्रिया धामानि यक्षतां स्वं महिमानमायजतामेज्या इषः कृणुतां तावध्वरौ जातवेदसौ जुषेतां हविरित्यूहः। अग्ने यदद्य विशो अध्वरस्य होतः एषा सह निगदेन याज्या।

३. वषट्कृत्येति क्त्वाप्रत्ययो ऽङ्गार्थतां स्विष्टकृतो ज्ञापयितुम्। अतो ऽन्यत्रापि यत्रयत्र स्विष्टकृदर्थवादस्तत्रतत्र वषट्कृत्योपस्पर्शनमपाम्। अप उपस्पृशेत्यन्वयदृष्टत्वात्। अथ यदप उपस्पृशति शान्तिर्वै भेषजमापः शान्तिरेवैषा भेषजमन्ततो यज्ञे क्रियत (कौ० ब्रा० ३. ६.) इति श्रुतेः।

१०.

१. इडोपह्वानं करिष्यतः। भाविनीडोपह्वान इत्यर्थः। पाणेर्दक्षिणस्य या प्रदेशिनी अङ्गुष्ठादनन्तराङ्गुलिस्तस्यां प्रदेशिन्यामनक्ति अक्षयत्यध्वर्युः[1]।

२. उत्तमे च पर्वणि मध्यमे च। तस्या एव प्रदेशिन्या द्वे स्थाने अध्वर्युणाभ्यक्ते। तयोर्यत्पूर्वं तद्वाचस्पतिना ते हुतस्य प्राश्नामीषे प्राणायेत्यनेन[2] मन्त्रेणाधरौष्ठे निलिम्पेत्। यद्द्वितीयमञ्जनं तन्मनसस्पतिना ते हुतस्य प्राश्नाम्यूर्ज उदानायेत्युत्तरौष्ठे निलिम्पेत्। आध्वर्यवस्याङ्गुलिपर्वाञ्जनस्योपदेशो निराकाङ्क्षार्थः।

---

[1] C प्र० A प्रक्षामत्य०। [2] B प्राणायेति पूर्वमञ्जनमधरौष्ठे।

३. अपामुपस्पर्शनं कृत्वा ततो ऽन्यत्। शाखान्तर एवमेव विहितत्वात्।

४. दक्षिणेन हस्तेन उत्तरेलां धारयन्। इलामुपह्वयत इति संबन्धः। उत्तरेलाग्रहणं शास्त्रसंव्यवहारार्थम्। उत्तरेलां प्राश्नेत्येवमादिषूपस्थितं द्रष्टव्यम्।

५. धारयन्निलामुपह्वयत इति संबन्धः। असंकुचिताङ्गुलिना दक्षिणेन पाणिना उत्तरेलां धारयति। सव्येनेलापात्रीम्। सव्येन होतृचमसं च पात्रीं च संयच्छतीति सोमे दर्शनात्।

६. क्रमार्थं वचनम्। हस्तेन चत्वार्यवदानान्यध्वर्युर्ददाति। पञ्चमं होता स्वयं गृह्णीयात्।

७. अपित्वेलामुपह्वयत इति संबन्धः। स्वयमित्यप्यत्रोपयुज्यते। आत्मनो मुखसंमितां हृदयसंमितां वा। न यजमानस्य। धारयन् किं करोतीत्यत आह।

११.

१. उपहूतं बृहदित्येवमादिकं जपं अपित्वेलामुपह्वयते। अपित्वेति वचनादुपांशुप्रयोगः। अनैकस्वर्यं च।

१२.

१. इलोपहूतेत्येवमादिस्तस्मिन्नुपहूत[1] इत्येवमन्तो निगद इलोपह्वानसंज्ञस्तेनोपह्वानं कृत्वा।

---

[1] B ॰त्येवमादिर्मन्त्र॰।

२. अनन्तरमिडां जिघ्रेत् ।

३. अन्तरितं इडामध्ये इडोपह्वानसंज्ञकस्य निगदस्य[1] मध्ये चतुरवानिति उच्छ्वसिति । तत्र मैत्रावरुणीति प्रथम उच्छ्वासो निराकाङ्क्षत्वात्[2] । वर्धामिति द्वितीय उच्छ्वासः । पुत्रे इति तृतीयः । अन्ते चतुर्थः ।

४. यदा इडामध्ये चतुरवाननं तदा ब्रह्म देवकृतमुपहूतमिति द्वितीयः । यज्ञपतिमन्त्रस्यानेकयजमानकेऽप्यनूहो देवताभिधानमिति संदेहात् । उपहूताविमौ यजमानौ द्वियजमानके । उपहूता इमे यजमाना इति बहुयजमानके । सर्वस्वार (१५. १०. १) उत्तरस्यां देवयज्यायामित्यस्यानुत्सर्गः[3] । अस्त्रियज्ञे तु दीक्षणीयापुरुषसंस्काराग्नीर्वर्जमिति कात्यायनवचनात्सर्वाग्निषामभावः (२५. १३. ४३) । अपरे पुनः [4]क्रतुवैगुण्यभयात्प्रयोगमिच्छन्ति ।

५. इडासीत्येवमादिना मन्त्रेणोत्तरेडां संप्राश्य भक्षयित्वेत्यर्थः । क्रमार्थः क्त्वाप्रत्ययः ।

६. इतरा या पात्र्यामस्ति तां यजमानपञ्चमा ऋत्विजः प्राश्नन्ति । यजमानो ब्रह्मा होताध्वर्युराग्नीध्रश्चेति वाजिने पठिताः । पञ्चैव । न मैत्रावरुणः प्रतिप्रस्थाता वा । प्राश्येत्यनुवर्तमाने पुनर्वचनं मन्त्रप्रतिषेधार्थम् ।

७. भक्षणानन्तरं तावद्वाग्यमो होतुर्यावन्मार्जनं न[5] कृतम् । ब्रह्मयजमानयोस्त्वन्यत एव वाग्यमः सिद्धः ।

---

[1] B om. निगदस्य । [2] A ins ब्रह्म देवकृतमुपहूत इति द्वितीय and alters द्वितीयः । तृतीयः to तृतीयः । चतुर्थः resp. । [3] A ॰त्सर्गः । [4] C क्रतु॰ । [5] B C (orig) om. न ।

८. इदमाप प्र वहतेत्यादिना तृचेन यथाम्नायपठितेनोपांशुप्रयोगेण मार्जयन्त इलाभक्षयितारः। इलाङ्गत्वान्मार्जनस्य। मार्जनं मूर्धन्यवसेको गृह्योक्तत्वात्। अद्भिश्च मार्जनं शान्तिर्वै भेषजमाप इति लिङ्गात्[1]। अन्तर्वेद्यवस्थिते पवित्राभ्यां संयुक्ते पात्रे। पवित्रवतीति मतुप्निर्देशाद्गुणभूते पवित्रे। अतस्तदभावे ऽपि पत्नीसंयाजनेषु मार्जनम्।

९. कृते मार्जने पवित्रप्रतिपत्त्यनन्तरमध्वर्योर्भागपरिहरणं[2] स्वश्रुतिविहितम्। तदस्माकमवधित्वेनोपदिष्टम्। यजमानभागस्याप्यत्र परिहरणमस्त्येव। न तु प्रोषिते। ब्रह्मणस्तु सर्वदा भवतीति सर्वत्र निर्दिष्टम्[3]। एतस्मिन्नवधावन्वाहार्यसंज्ञकमोदनं दक्षिणाग्निपक्वमाहरन्ति। बहुवचनमविवक्षितम्। अवधित्वेनोद्दिश्यमानत्वात्।

१०. यास्वपीष्टिषु भागपरिहरणं अन्वाहार्यहरणं च नास्ति तास्वप्येष एव दक्षिणाकालः। सर्वासामिष्टीनामिति वचनात्। न तु पशौ सत्यपि भागपरिहरणे।

११. आदिष्टदक्षिणास्वन्वाहार्यो न भवति। आदिष्टदक्षिणा आग्रयणमित्रविन्दाप्रभृतयः।

१२. एषा त इत्येवमादिना शस्त्रेण समिधमाग्नीध्रप्रक्षिप्तां होतानुमन्त्रयते। अनेकस्वर्यमुपांशु च प्रयोगः। अथ यत्समिधमनुमन्त्रयत इध्मस्य वा एषैकातिशिष्टा भवति। तस्मादेनामनुस्तौतीति (कौ० ब्रा० ३.७) श्रुतेः। यदीध्मानुवचने ऊहस्ततो ऽत्रापि।

---

[1] A C (see h) वचनात् instead of लिङ्गात्। [2] A C om परि। [3] B सर्वत्र भवतीति नि० C has सर्वदा in marg।

स उच्यते। एते वामग्नी समिधौ ताभ्यां वर्धेथां चा च प्यायेथाम्। अनुमन्त्र्येति क्त्वाप्रत्ययो ऽनुयाजाङ्गप्रज्ञापनार्थः।

१२. त्रीननुयाजसंज्ञकान्वक्ष्यमाणान्यजति याज्याधर्मेण पठति। त्रिग्रहणं कर्मत्रयप्रदर्शनार्थम्[1]। अनुयाजानिति शास्त्रसंव्यवहारार्थम्।

१३.

१. अयं प्रथमो ऽनुयाजः।

२. अयं द्वितीयः।

३. विरम्येत्यर्थः।

४. इति एता एव[2] सर्वत्र। ततः पित्र्यावभृथयोरनूहः। न च तनूनपाद्याजिनो विकार इतीतिकरणस्य[3] नियमार्थत्वात्।

१४.

१. अध्वर्युणा सूक्ता ब्रूहीत्येवमन्तेन निगदेन संप्रेषितो वक्ष्यमाणं सूक्तवाकमाहेति वाक्यशेषः। ननु संप्रेषितो ऽन्वाहेति परिभाषितमेव। सत्यम्। निमित्तार्थस्तु संप्रेषपाठः। सामिधेनीसंप्रेषवत्। वक्ष्यति। अप्रत्तदेवते दृष्टे नावृत्तिरस्ति हौत्रस्य। तथा नावृत्तिः प्रत्तदोषे ऽस्ति। अत्र हौत्रावृत्तिप्रतिषेधे ऽपि[4] संप्रेष आवृत्तेर्निमित्तं भवति। ततः संप्रेषवशादावृत्तिर्भवति।

२. अग्ने त्वं सूक्तवागसीत्येवमन्तं निगदखण्डमुक्त्वा विरमेत्।

---

[1] C om. त्रय। [2] A एताहम। [3] A विकार इतिक०। [4] C ins. इति।

३. यजमान द्यावापृथिवी स्तामित्येवमन्तं निगदखण्डमुक्त्वा विरम्य ततो ऽनन्तरम् ।

४. अभयंकृतावित्येवमन्तं निगदखण्डमुक्त्वा विरम्य ततो ऽनन्तरम् ।

५. तयोराविदीत्येवमन्तं निगदखण्डमुक्त्वा विरम्य ततो ऽनन्तरम् ।

६. अवचने ऽप्यवसानं वाक्यपरिसमाप्तेः। एवमुत्तरेष्वपि द्रष्टव्यम्।

७. हविरजुषतेति हविःशब्दः प्रायेण प्रधानवाची दृष्टः। तदाशङ्कया उदर्कस्यापि पाठः। अग्निरिदमिति च केषांचित्। तन्निवृत्त्यर्थं च दण्डकपाठः। स्वस्य च महिम्नः प्रतिषेधार्थम् ।

८. प्रधानहविर्निगमनम्। उक्तं दण्डकपाठप्रयोजनम् ।

९. अक्रातामित्यन्यत्रापि। द्विदेवत्य एवमेव यथा स्यादिति सकलपाठः। ननु कीदृशो ऽन्यथा प्राप्नोति। उच्यते। अकृषातामिति। किं कारणम्। ऊहस्याच्छान्दसस्मरणात्। अक्रातामिति तु च्छान्दसम् ।

१०. यथेष्टं व्यवस्था ।

११. पूर्ववद्विचारः ।

१२. यथेष्टं व्यवस्था ।

१३. यथेष्टं व्यवस्था ।

१४. अत्रापि अक्रतेत्येवमेव बहुदेवते नियमो[१] यथा स्यात् । अकृषतेति लाक्षणिको मा भूदिति सानुषङ्गः पाठः ।

---

[१] C निगमो।

१५. स्विष्टकृन्निगमनमेतत्। अतश्च पित्र्यायामूहः। अग्निः कव्यवाहनो होत्रेण· हविरजुषतावीवृधत महो ज्यायो ऽक्रतेति।

१६. अत्राप्यवसानं कविनामधेयग्रहणात्।

१७. असावसौ इति एवं प्रथमया विभक्त्या युक्ते नामनी यजमानस्य। न होतुः। अभिव्याहृत्य। अभीतिवचनाच्चोपनामकेन। विस्पष्टं निरवकाशम्[1]। तथा च श्रुतिः। उच्चैर्गृह्णीयाच-घण्याचार्यः स्यात् इति। नामनी इति शाखान्तरात्। असावसाविति वीप्सानिर्देशः प्रथमानिर्देशश्च समासप्रतिषेधार्थं पृथगवसानार्थं च। ननु कतमे द्वे नामनी। उच्चैर्गृह्णीयादिति वचनादुपनामकस्याप्राप्तिरेव। गुह्यनाम्नोऽपि। तदस्य पिता माता च विद्यातामिति नियमादिहाप्राप्तिः। नामकरणे पूर्वं तु दैवतं सर्वत्रेति[2] तुशब्दप्रयोगात्। सर्वत्रेति वचनादिह नक्षत्रदेवताश्रयं पूर्वं व्यावहारिकमुत्तरम्।

१८. अभिव्याहृत्येति क्त्वाप्रत्ययदर्शनात् द्वितीयेन नाम्ना उत्तरां देवयज्यामित्येवमादेर्निगदखण्डस्य संधानम्। अथ पत्न्याशिषो वदतीति वचनात्पत्न्याशिषः पठित्वावसानम्।

१९. अवसानमत्र वाक्यपरिसमाप्तेः। अत्र सूक्तवाके ऽग्निशब्दो होतृशब्दरहितः। ततश्चाहवनीय उच्यत· इति शङ्का। संप्रैषे· तु दैव्या होतारा इति दर्शनात्स्विष्टकृतो ऽभिधानमिति शङ्का। एवमयं चोदनासंदेहः। तस्मादेषामग्निपदानां विकारेष्वप्यनूहः।

---

[1] B C निरवकाशकम्। [2] आ॰ गृ॰ १. १५।

२०. एनमित्यस्य पदस्य स्थाने न इति वा प्रक्षिपेत्।

२१. इष्टं च वीतं चेत्यारभ्य नमो देवेभ्य इत्यवस्येत्। ननु संज्ञाकरणं विना कथमस्य शास्त्रे संव्यवहारः। स्विष्टकृन्निगदे सूक्तवाके च (१.१६.१०.) अन्यत्र चाग्नीषोमीयात्सूक्तवाके नामग्रहणं (६.१.२४.) इत्यादिषु। उच्यते। संप्रैषोच्चारणसामर्थ्याद्यथा सामिधेनीनाम्। सूक्तवाकमन्त्राणामूह उच्यते। द्वियजमानके। ओमन्वती वामस्मिन्यज्ञे यजमानौ द्यावापृथिवी स्ताम्। बहुयजमानके। ओमन्वती वो ऽस्मिन्यज्ञे यजमाना द्यावापृथिवी स्ताम्। अस्यामृधदिति ऋधिर्धातुर्दिवादौ स्वादौ च पठ्यते। ततश्चोदनासंदेहादनूहः। द्वियजमानके। आशासाते इमौ यजमानौ। बहुयजमानके। आशासत इमे यजमानाः। स्वयमपि सत्त्रादिषु यजमानस्य हौत्रं कुर्वतो ऽहं यजमान इति न भवति। स्वरिमान्यजमानानिति महाव्रते दर्शनात्। द्वियजमानके। अग्निशर्मप्रजापतिशर्माणौ। देवदत्तयज्ञदत्तावुत्तरां[1] देवयज्यामाशासाते भूयो हविष्करणमाशासाते आयुराशासाते सुप्रजास्त्वमाशासाते दिव्यं धामाशासाते। यदनेन हविषाशासाते तदश्यास्तां तदृध्यास्तां तदाभ्यां देवा रासन्तां तदग्निर्देवो देवेभ्यो वनुतां वयमग्नेः परि मानुषाः। अथ बहुयजमानके। अग्निशर्मप्रजापतिशर्मसोमशर्माणो देवदत्तयज्ञदत्तविष्णुमित्रा[2] उत्तरां देवयज्यामाशासते भूयो हविष्करणमाशासत आयुराशासते सुप्रजास्त्वमाशासते दिव्यं धामाशासते। यदनेन

---

[1] A ०दत्तशर्माणौ। [2] A ०मित्रशर्माण।

हविषाशासते तदश्यासुस्तदृध्यासुस्तदेभ्यो देवा रासन्तां तदग्निर्देवो देवेभ्यो वनुतां वयमग्नेः परि मानुषाः।

२२. स्तीर्णे बर्हिषि अञ्जलिमुभयहस्तसंयोगं निधायावस्थाप्य जपति नम उपेत्यन्तं मन्त्रम्। अथ बर्हिषि प्राञ्चमञ्जलिं निधाय जपति नम उपेतीति श्रुतेः।

२३. शंयोर्ब्रूहीत्येवमन्तेन निगदखण्डेन संप्रेषितो ऽध्वर्युणा होता तच्छंयोरावृणीमह इत्येतामृचमुक्त्वोपस्पृशेत्। परिभाषिते ऽपि संप्रैषवशात्कथं नाम होतावृत्तिः स्यात्[1]। शंयोर्वाक इति शास्त्रसंव्यवहारार्थं संज्ञाकरणम्। पुरा शंयोर्वाकात् शंय्वन्ता वेत्येवमाद्यर्थम्। उक्त्वोपस्पृशेति क्त्वाप्रत्ययः शंयोर्वाकस्योपस्पर्शनमङ्गमित्येतस्य ज्ञापनार्थम्।

२४. अग्निर्होता वेत्वित्यादि स्रुगादापनम्। तत आरभ्य मन्द्रया वाचा तावद्यावदुत्तम आज्यभाग इष्टः। जपानामयं नियमो न भवत्यप्राप्तत्वात्। अग्निमन्थन एषवामाकाशादीनामनियमः प्राक् स्रुगादापनात्।

२५. प्रधानयागादारभ्य परं मध्यमया मध्यमेन स्थानेन।

२६. अनुयाजेभ्य आरभ्य उत्तमया वाचा उत्तमेन स्थानेन। अनुयाजप्रसवस्यानुयाजाङ्गत्वादुच्चैः।

---

[1] A ins. इति पुनर्वचनम्।

१५.

१. उपांशु मृदुना शब्देन पत्नीसंयाजसंज्ञकैर्यागैश्चरन्ति पत्न्याग्नीध्राध्वर्यवः। होतुरपि तद्देशगमनं तथैव च क्रियेत्येवमर्थमिदमुक्तम्।

२. सोमाद्यास्तिस्रो देवता यजति। ते वै चत्वारो भवन्तीति श्रुतेः।

३. राका च सिनीवाली च राकासिनीवाल्यौ द्वे देवते। उभयपदार्थप्रधानत्वाद्द्वन्द्वस्य। प्रजाकामस्येति प्रजोत्पत्तिमिच्छतो यजमानस्य। ननु षष्ठीनिर्देशः किमर्थम्। उच्यते। यजतीति पूर्वसूत्रे परस्मैपदनिर्देशाद्धोतुर्यजमानार्थं प्रजामिच्छत इत्याशङ्क्येताध्वर्युं मृतमिच्छन्निति यथा। पूर्वं गृहपतेरिति राकासिनीवाल्योर्यागक्रमात् पाठक्रमश्च सर्वत्र विवक्षित इत्येतज्ज्ञायते। गृहपतिरित्येकदेशनिर्देश उपलक्षणत्वात्।

४. यजतीत्युक्तम्। कथमित्याकाङ्क्षिते याज्यानुवाक्याः प्रतीकग्रहणेन पठति। ताश्चैता ऋचो द्वादश षण्णां यागानां प्रत्येकं यथासङ्ख्येन द्वे द्वे भवतः। सोमस्य याज्यापुरोनुवाक्यायुगलम्। आ प्यायस्व समेतु ते पुरोनुवाक्या सं ते पयांसि समु यन्तु वाजा इति याज्या। आ प्यायस्व मदिन्तमेत्येषा न भवति। गायत्रीरहितत्वात्। अप्राथम्याच्च। एवमपि सति ग्रावस्तोत्रे सकलपादपाठः। अनेनैव क्रमेण तत्र तिस्रो मा भूवन्निति। ननु आप्यायितवतीनामिति तत्रोक्तेः कथं संदेहः। आपोहिष्ठीयाभिरितिवदाशङ्क्येत[1]।

---

[1] B इति यद्यदा०।

सोमाप्यायने तु सोम विश्वेभिरंशुभिरिति लिङ्गात् सुतरामाशङ्क्येत। तस्मात्सकलपादपाठः। त्वष्टुर्याज्यानुवाक्यायुगलम्। इह त्वष्टारमग्रियं पुरोनुवाक्या। तन्नस्तुरीपमध पोषयित्नु याज्या। ननु तन्नस्तुरीपमद्भुतमिति प्रथमा। कस्मादतिक्रम्यते। उच्यते। त्रिष्टुप् याज्या कर्तव्या। न च सा त्रिष्टुप्। यत्र पुनस्त्रिष्टुबपि पुरोनुवाक्यात्वेन विनियोक्तुमिष्यते तत्र सकलपादपाठः संदेहव्युदासार्थः। तद्यथा। पिशङ्गरूपः सुभरो वयोधाः तन्नस्तुरीपमध पोषयित्नु देवस्त्वष्टा सविता विश्वरूप इति पुरोनुवाक्या इति। अग्नीषोमीयप्रकृतित्वात् त्वाष्ट्रस्य तुल्यप्रतीकत्वात् प्राथम्याच्च। तन्नस्तुरीपमद्भुतमिति मा भूदिति सकलपादपाठः। एवं वैश्वामित्रीणां पत्न्यौ यातयामत्वे वासिष्ठौ[1] प्रयुज्यते। देवानां पत्नीनां याज्यापुरोनुवाक्यायुगलम्। देवानां पत्नीरुशतीरवन्तु नः पुरोनुवाक्या। उत ग्ना व्यन्तु देवपत्नीरिति याज्या। यदि देवानां पत्न्यौ राकामहं सिनीवालीति हूयेत इत्युच्येत ततः पाठक्रमनियम[2] एवाङ्गीकृतः स्यात्। ततो देविकाहविःषु विपर्यासो न स्यात्। प्रत्येकं प्रतीकग्रहणाद्यत्र[3] यातयामदोष[4] उत्प्रेक्ष्यते तत्र[5] विपर्यासः सिद्धो भवति। राकाया याज्यानुवाक्यायुगलम्। राकामहं सुहवां सुष्टुती हुवे पुरोनुवाक्या। यास्ते राके सुमतयः सुपेशस इति याज्या। सिनीवाल्या याज्यानुवाक्यायुगलम्। सिनीवालि पृथुष्टुके पुरोनु-

---

[1] B. ins ध्यामा। [2] C. om नियम। [3] A यत्रयत्र। [4] A ०यामत्व दोष। [5] A तत्रतत्र।

वाक्या। या सुबाहुः स्वङ्गुरिरिति याज्या। अग्नेर्गृहपतेर्याज्यानुवाक्यायुगलम्। अग्निर्होता गृहपतिः स राजा पुरोनुवाक्या। वयमु त्वा गृहपते जनानामिति याज्या। वयमु त्वा गृहपत इत्यत्र इतिकरणो नियमार्थः। अत्रैवैता भवन्ति। अन्यथा[1] प्रथमोपदिष्टत्वात् सर्वत्र प्राप्नुयुः।

५. यथा ह त्यद्वसवो गौर्यं चित्। एतामेव ऋचं जपित्वा नान्यत्किंचित् तत इलामुपह्वयते। इलोपहूतेत्येवमादिना निगदेन। अथ यदृचं जपति स्वस्त्ययनमेव तत् कुरुत इत्यर्थवादान्तरादर्शनाद्वैतावानेव जपो नोपहूतं स्यादिति।

६. अत्र पत्नीसंयाजेलायां उपहूतोऽयं यजमान इत्यस्य स्थाने उपहूतेयं यजमानीति वा विकारो भवति। ननु यजमानशब्दोऽकारान्तस्ततो यजमाना एव प्राप्नोति। तद्यथा। पचमाना ब्राह्मणीति। सत्यम्। पुंयोगादाख्यायामिति (पा० ४. १. ४८) वचनाद्यजमानीति भवति। तत ईकारं पठन् सूत्रकार एतज्ज्ञापयति यजमानप्रयुक्तो याग इति। किमेतस्य ज्ञापने प्रयोजनम्। सत्रेषु मृते यजमाने न परिसमाप्तिः पत्नी जीवतीति कृत्वा। अतश्च नेदिष्ठिना सहेतरे यजमानाः परिसमापयन्ति। मृतभर्तृकायास्तु तदन्तकर्म। ननु ये च यज्ञपतिं वर्धानित्यत्र कथं। उच्यते। विभाषा सपूर्वस्येति (पा० ४, १, २ ४)। ईकारस्य पक्षे विधानादेवमपि साधुः प्रयोगः। यथा ग्रामस्य पतिर्ब्राह्मणीति (पा० ४..१. २ ३)। द्विपत्नीके। उपहूते इमे यजमान्यौ। बहुपत्नीके। उपहूता इमा

---

[1] A अन्यत्र।

यजमान्यः । ननु प्रकृतावूहो न प्राप्नोति । उत्तरस्यां तत्रावूहनवचनात् । सत्यम्° । किं तु प्रकृतौ यथार्थानां[1] न नियमः । अयथार्थानां[2] तु प्रकृतौ विकृतौ च सर्वत्रोहः कर्तव्यः । विकारग्रहणाच्च । अश्वमेधे दर्शपूर्णमासादिभिः संस्कृतास्ततो जाया उपक्लृप्ता भवन्ति । तत्र संस्कारत्वादूहः । पत्नीः संनह्येति च शाखान्तरे प्रैषपाठात्[3] ।

७. येयमनन्तरेला एतदन्ताः पत्नीसंयाजाः । पत्नीसंयाजा इत्यधिकारे पुनः पत्नीसंयाजा इति वचनं नियमार्थम् । तेन इष्टीनामिलान्तत्व उक्ते पूर्वा इला प्रत्येतव्या । उत्सृजन्तः कर्माणि यन्तीति ज्ञापकम् ।

८. शंयोर्वाकः शंयुस्तदन्ताः पत्नीसंयाजा वा भवन्ति । अस्मिन्नपि पक्षे इला कर्तव्यैव । कुत एतत् । पूर्वविधानादिलायाः ।

९. प्र त्वा मुञ्चामि वरुणस्य पाशादित्येवमादिना मन्त्रेण पत्नीसंनहनं योक्त्रं नान्यत् । पत्नीसंयाजप्रकरणात्[4] । तद्विमुञ्चति । वेदं विमुच्य पूर्वतरम् । ननु क्रियामन्त्रयोर्मध्ये वेदं विमुच्येति किमर्थम् । उच्यते । साहचर्यार्थम् । अतश्च यत्र वेदविमोकप्रतिषेधस्तत्र योक्त्रविमोकप्रतिषेधोऽपि भवति । तद्यथा । दीक्षणीयाप्रभृत्यानूबन्ध्यायाः संस्थानाच्च वेदे पत्नीं (८. १२. ९) वाचयतीत्येवमादिषु योक्त्रविमोकप्रतिषेधः सिद्धो भवति ।

१०. अञ्जलिरुभयहस्तसंनिवेशः । तस्मिन्नञ्जलौ पत्नीसक्ते योक्त्रं वेदं च विमुक्तं कृत्वा वक्ष्यमाणं करोति । पत्न्याः संनिधानाभावे

---

[1] °A प्रकृतौ यथार्थानां समवेतार्थानां तु न नियमः । [2] A यथार्थायथा॰ C (sec. m.) adds यथार्थानाम् । [3] C प्रैषाभावात् । [4] A ॰याजा इति करणात् ।

अनालम्भुकत्वे वा तद्देशे। तदा च न मन्त्रः[1]। कुत एतत्। अग्निहोत्रहोमे अञ्जलौ च पत्न्याः सं त्वा सृजामि प्रजया धनेनेत्यञ्जलाविति (२. १०. ५) यत्नात्। पत्न्यनेकत्वे ऽप्येकस्याः[2] परार्थत्वात्। संभवे सति एवंरूपाणि क्रत्वर्थानि ज्येष्ठा पत्नीति[3]। कुतः। सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा इति[4] स्मरणात्।

११. अद्भिः परिषिञ्चन्निति वचनात्सर्वत्र परिषेको ऽनिर्दिष्टद्रव्यको ऽद्भिः कर्तव्यः। अन्यदृष्टं सर्वत्र भवतीति। वेदयोक्त्रे इति यदि नोच्येत वेदस्यैव केवलस्य स्यात्। अनन्तरत्वात्। जपतीति वचनादुपांशुप्रयोगः। अनैकस्वर्यं च।

१२. एवमन्तं मन्त्रं वेदयोक्त्रे परिषिञ्चञ्जपेत्।

१३. घृतवन्तं कुलायिनमित्येवमादिकं मन्त्रं वेदे अञ्जलौ स्थिते ऽपनीय योक्त्रं होता पत्नीं वाचयति। भाणयतीत्यर्थः। शक्तौ सत्यामर्धर्चमर्धर्चं भाणयेत्। अर्धर्चन्यायास्त्वृच इति वचनात्। अशक्तौ तु यथाकथंचित्। वाचनस्य प्राधान्यात्।

१४. सा पत्नी तृणानि वेदादुत्कृष्य अन्तरेण मध्य ऊरू न्यस्यत इति। प्रक्षिपतीत्यर्थः। उपसर्गादस्यत्यूह्योरित्यात्मनेपदम्[5]। न्यस्यत इति। कर्त्रभिप्रायेण क्रियाफलार्थं वा। ततश्चानेका अपि कुर्युः।

१५ तन्तुं तन्वन्रजसो भानुमन्विहि इत्यनेन मन्त्रेण गार्हपत्यादुत्तरतः। आ बर्हिषः स्तीर्त्वा यावद्बर्हिराहवनीयान्तं स्तीर्णं तावत्। उत्तरेण गार्हपत्यमित्यसति पत्नीदेशादेव प्राप्नुयात्।

---

[1] B C °कत्वेन न तद्देशे। कुत°। [2] A ins. एव। [3] B C ज्येष्ठपत्नीभि or °त्नीभि। [4] याज्ञवल्क्य १. ८८। [5] See Mahabhashya ed. Kielhorn I. 232.

१६. आपृणो ऽसीत्येवमादिना मन्त्रेण वेदशेषं वेदस्यावशिष्टं यत्तदुपतिष्ठते। वेदाधिकारे ऽपि पुनर्वेदवचनमास्तरितृविकल्पे ऽपि होतुरुपस्थानार्थम्। कथं वास्तरितृविकल्पः। उच्यते। तमा वेदेरास्तृणातीति शतपथे पत्न्या आस्तरितृत्वविधानात्।

१७. एतेनाग्ने ब्रह्मणा वावृधस्व अयाड् यज्ञं जातवेदा आभ्यामृग्भ्यामाहवनीयमुपस्थाय। उपस्थानं नाम भक्तिनम्रेण मनसाभिलषितार्थसिद्धये देवतोपधावनं तत् कृत्वा ततः।

१८. प्रथमे उपस्पर्शने उपस्पृश्य। द्रव्यमुक्तं आपः ता उपस्पृश्य। ननु अनन्तर आहवनीयो ऽधिकृतस्तमुपस्पृशेत्कस्मान्न[1] भवति। उच्यते। वेदशेषमुपस्थायेति प्रकृते पुनराहवनीयमुपस्थायेति वचनात्। अथ यदप उपस्पृशति शान्तिर्वै भेषजमापः शान्तिरेवैषा भेषजमन्ततो यज्ञे क्रियत इति श्रुतेः। उत्सृज्यते होता। व्यवायादिष्वनादृतो[2] भवतीत्यर्थः।

१६.

१. व्याख्यातावङ्गप्रधानद्वारेणोक्तौ दर्शपूर्णमासौ। व्याख्यातव्यान्यपि दर्शपूर्णमासयोरङ्गानि सन्ति। तद्यथा। प्रथमप्रयोगे ऽन्वारम्भणीया। अनुनिर्वाप्यः पिण्डपितृयज्ञस्य केषांचित्। तेषामपि विकृतावतिदेशः प्राप्नोति। तन्निवृत्त्यर्थं व्याख्यातवचनम्। दर्शपूर्ण-

---

[1] A स्पृशेति। [2] B °हितो A C ष C (sec. h) ह।

मासाविति च व्याख्यातयोः संज्ञाकरणं शास्त्रसंव्यवहारार्थम् । वक्ष्यति । पूर्वा दर्शपूर्णमासाभ्यामन्वारम्भणीयेष्टिरित्येवमादिषु अनयोरुपस्थानं यथा स्यात्[1] । न च कौण्डपायिनामयनीययोर्ग्रहणमनयोरेव धर्माम्नानात् । दर्शशब्देनामावास्यमुच्यते । तस्य पूर्वनिपातः समासे ऽल्पाच्तरत्वात् । अनुष्ठाने तु पौर्णमासं प्रथमम् । कुत एतत् । यद्यपरपक्षे भक्तं नीयान्मास्य यज्ञविकर्षः स्यादिति[2] ज्ञापकात् । प्रकृतिराद्या प्रकृतिर्मूलं[3] योनिरित्यनर्थान्तरम् । केषां प्रकृतिः । इष्टिपशुबन्धानां इष्टीनां पशुबन्धानां च इष्टिरिति प्रयाजानुयाजाद्यङ्गकलापसहितं यागकर्मोच्यते । पशुबन्धशब्देनापि श्रौतः पशुयागः । अतश्च न शाखापशूनां दर्शपूर्णमासौ प्रकृतिः । अपरे तु वर्णयन्ति । व्याख्यातवचनं शिष्यबुद्धिसमाधानार्थम् । अतश्च याः काश्चिदिष्टयस्तासां प्रथमप्रयोगे दर्शपूर्णमासाङ्गत्वादन्वारम्भणीयेष्ट्या भवति । न च पिण्डपितृयज्ञो दर्शस्याङ्गम् । न्यायान्तरमेतद्व्याख्यातम् ।

२. व्याख्यातो ऽग्निष्टोमः प्रकृतिर्द्वादशाहस्यैकाहानां (९.१.१) चेत्यग्निष्टोमः स्वधर्मैर्द्वादशाहमन्वेति । व्याख्यातो द्वादशाहः प्रकृतिः सत्राहीनानामिति द्वादशाहः स्वधर्मैरहीनमन्वेति । अग्निष्टोमश्च चोदकपरंपरयान्वेति । तत्राग्निष्टोमस्यापि प्रकृतित्वं यथा स्यादिति सूत्रारम्भः । किं सिद्धमिति चेत् । श्रूयमाणं प्राकृतं नामधेयमन्यस्मिन्द्रव्ये प्रकृतिं (९. १. २) निवर्तयतीत्याग्निष्टोमिकस्याप्यहीने निवृत्तिः सिद्धा भवति । अत्रोदाहरणम् । संपातौ तु निविद्धाने

---

[1] A om. यथा । [2] कौषीतकि ब्रा० ४.१. । [3] B C कृतिमूलं ।

इति (१६. २०. १५.) श्रूयमाणे अनिष्ठाउपौषेन्द्रस्य नु सौर्यायौत्येतयोर्निवृत्तिः सिद्धा भवति। कस्य पुनरन्वयो येनैवमुच्यते । अन्वयस्य प्रकृतिरित्याख्येति। फलस्य नान्वयः । कर्मनिबन्धनत्वात् । तत्र यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेत्यस्य नियमस्य विकृतिष्वनन्वयः। दर्शपूर्णमासकर्मनिबन्धनत्वात् । यत्र दर्शपूर्णमासौ तत्रायं नियमो न च विकृतिषु दर्शपूर्णमासौ । किं तर्हि तद्धर्मता । तथा च जैमिनिः । कर्मणस्त्वप्रकृतित्वात्फलनियमकर्तृसमुदायस्यानन्वयात्तद्बन्धनत्वादिति ।

३. येयं प्रकृतिरुक्ता दर्शपूर्णमासाख्या । अस्यामेव तावच्चिन्त्यते। किं प्रधानं कानि चाङ्गानीति । किमेतया चिन्तया प्रयोजनम् । प्रधानविनाशे आवृत्तिः । अङ्गविनाशे नावृत्तिः । प्रकृतौ चैतच्चिन्त्यमानं विकृत्यर्थमपि भवतीत्ययमवसरः । अन्तरेणाज्यभागौ स्विष्टकृतं च यदिज्यते तत्प्रधानमिति संबन्धः । यत्रायं प्रदेशः स्विष्टकृदाज्यभागयोरन्तरावर्तौ समावाप इत्याचक्षते। जैमिनिप्रभृतयः सूत्रकाराः । अनया संज्ञया व्यवहरन्ति । अस्य तु प्रयोजनं । अनिर्दिष्टस्थानमस्मिन् देशे¹ श्रोप्यत इति । तेन संज्ञानमिति च जपेरन् (३. ६. ३)। अग्ने वायो विद्युदित्येवमादि (४. ८. ४) प्रधानानन्तरं प्राक् स्विष्टकृतो भवति ।

४. यानि सामिधेन्यनुवचनादीनि आज्यभागान्तानि यानि च स्विष्टकृत्प्रभृतीनि परतस्तानि² तदङ्गानि । तदिति सर्वनाम्ना

---

[1] B प्रदेशे। [2] A om. तानि।

आवापिकं[1] प्रधानं निर्दिश्यते। तस्य इतराण्यङ्गानि। उक्तमङ्गचिन्ताप्रयोजनम्।

५. तेषामङ्गानामभिन्नकाले प्रधानप्रयोजने विभवः शक्तिरस्ति। शक्नुवन्ति हि सकृत्कृतान्युपकर्तुमित्यर्थः। तद्यथा। पौर्णमासे प्रधानबहुत्वे ऽपि कालाभेदात्सकृदङ्गानि। तुरायणे च कालभेदात्पृथक्।

६. यत्सकृत्कृतं[2] बहूनामुपकरोति तत्तन्त्रमित्युच्यते। अतश्च लक्षणसूत्रमेतत्। तेन दीक्षणीयादि सकृदहर्गणे।

७. यत्र तद्धितेन वा चतुर्थ्या वा मन्त्रवर्णेन वा देवताभिः संयुक्तः शब्दः श्रूयते। किंविशिष्टाभिर्देवताभिः। उच्चावचाभिर्बह्वीभिरल्पाभिर्वा। तत्र सर्वत्र प्रदानं[3] प्रत्येतव्यम्। प्रदानं याग इष्टिरित्येको ऽर्थः। प्रधानप्रक्षेपस्य[4] चेयं संज्ञा। प्रदानमावर्तते। तस्य प्रदानं स्विष्टकृदिडां चेति (१५.२.१७) शास्त्रसंव्यवहारार्थम्। ननु उच्चावचाभिरिति न वक्तव्यम्। पक्षान्तरस्यासंभवात्। उच्यते। प्रदानाभिप्रायमेतत्। तद्यथा। मित्रविन्दायां बह्वीनामेकं प्रदानम्। पशुदेवतायामेकस्या एव प्रदानद्वयं[5] च। तस्मात्प्रदानविशेषणमुच्चावचाभिरिति। ननु पशुभिलस्वरुः पञ्चपशुर्विशाखयूप इति देवतासंयोगाभावात् प्रदानं न प्राप्नोति। उच्यते। समाप्ते श्येनीपृषतीभ्यामिति समाप्तिवचनाद्भविष्यति। विशाखयूपे च यूपवचनात्। यथा लोके किशोरेण सह वडवेत्युक्ते धेनुर्वडवेत्यनुक्तमपि ज्ञायते श्रूयत इति

---

[1] A आवापादिकम् C (sec. h.) आग्नेयादिकम्। [2] C ins. च। [3] B (orig.) प्रधा॰। [4] B ॰क्षेपतस्य C ॰क्षेपस्य, त over the line. [5] B चयं instead of द्वयं।

वचनाच्छाखान्तरश्रुतस्यापि देवतासंयोगस्य परिग्रहः पशुविषयश्च देवतासंयोगः शतपथश्रुतौ[१]। मन्त्रलिङ्गेभ्यो निर्वपतीति च प्रदानलिङ्गुद्देशेन[२] विहितत्वात्। कुतः। शतपथे तमेते चत्वार ऋत्विजः प्राश्नन्तीति प्राशनवचनात्। तथा तेभ्यो ऽध्वर्युश्चतुष्प्राश्यं ब्रह्मौदनं निर्वपतीति च।

८. तत्र तस्मिन्प्रदानस्य नानारूपे श्रवणे यो विकारो भवति स उच्यते। याया देवता विकृतौ चोदिता तद्दैवते याज्यापुरोनुवाक्ये एव भवतो नान्ये। एकमपि वैकृतं प्रधानं बहूनां प्राकृतानां निवृत्तिं करोति। प्रधानत्वसामान्यात्।

९. इदं चान्यत्। निगमस्थानेषु वक्ष्यमाणेषु देवतादेशनसूक्तवाकादिषु[३] च सा देवता या यत्र चोदिता। न पर्यायेणात्मैकत्वरूपेण वा नैरुक्तवत्। अतश्च येनैवाभिधानेन चोदिता तेनैवोपलक्ष्यते। प्रकाश्यत इत्यर्थः।

१०. निगमस्थानशब्दव्युत्पत्तिरादरार्था। स चादरः प्रायश्चित्तविशेषार्थः। ततश्चावाहनादीनामन्यथाकरणेन मन्त्रानुजपमात्रं प्रायश्चित्तम्। अपि च। यस्मादिज्यमाना एव निगच्छन्ति तस्मान्निगमस्थानानीतिवचनात्त्विष्टकृद्यागाभावे अग्निं होत्रायावहेत्येतत्पदं न भवति॰। कुतः संदेहः। होतृत्वकार्ययोगादग्नेर्होतुः। आवाहनादीनि वर्जयित्वान्यत्रानिज्यमानस्यापि शब्दोच्चारणमस्त्येव। तद्यथा। अग्निर्होता वेत्वग्निर्होत्रमित्यादौ। वनस्पतिप्रैषे च। यथाग्नेर्होतुः प्रिया धामानि। सूक्तवाकप्रैषे च। अग्निमद्य होतारम-

---

[१] B ॰पथे श्रुतः। [२] A ॰पदृशेन B ॰लिङ्गमुद्देशेन। [३] A B देशेन।

वृणीतेति। उत्तमे प्रयाज इत्यत्र उत्तमशब्दो यदि न क्रियेत ततः प्रयाज इज्यमाना निगच्छन्तीति त्वष्टृवनस्पत्योः प्रयाजेष्विज्यादर्शनात् तयोरेव निगमनानि स्युः। स्विष्टकृन्निगद इति निगदवचनं संज्ञार्थम्। देवतावचनं चोदितदेवतार्थम्। ततो ऽग्न्यावाहितस्येज्यमानस्यापि न निगमाः। ननु पर्यग्निकृतस्य त्वाष्ट्रस्येज्यमानाभावान्निगमाभावः प्राप्नोति। तथा तत्रैव वनस्पतेः स्विष्टकृदित्वं भवतु। उच्यते। पर्यग्निकृतमुत्सृजन्ति (९.२७.५) इति सिद्धे न संस्थापयन्तीति वचनं सर्वधर्मप्रापणार्थम्। ततो भवत्येवावाहनम्। तथा[1] देवतादेशनादिष्वपि निगमस्थानसंज्ञा। हेत्वारम्भात्। अत उपांशुहविःषु तेषामप्युपांशुता भवति। न च त्वाष्ट्रे दृष्टत्वादन्येषां कपिञ्जलादीनां पर्यग्निकृतानां त्वाष्ट्रधर्माः अनुक्रामन्तश्च विकारान्व्याख्यास्याम इत्युत्तरसूत्रे यत्नात्।

११. ग्रन्थमनुसरन्तो विकारानुक्रमेभ्यो विकारेभ्यो ये अन्यथा भवन्ति तान्व्याख्यास्यामः। असंमोहेन प्रदर्शयिष्यामः। ये चोक्तास्ते च सन्ति याश्चानुक्रमिष्याम इति चशब्दः। तद्देवते याज्यापुरोनुवाक्ये इत्युक्तम्।.. अनुक्रामन्तो ऽन्यथा वदिष्यामः। तद्यथा। एन्द्र याहि हरिभिः सखे विष्णो वितरं वि क्रमस्वेत्यत्र न विकल्पः। इज्यमाना देवता निगच्छन्तीत्युक्तम्। तदन्यथाप्यनुक्रामन्तो वर्णयिष्यामः। यथा। इन्द्रं वसुमन्तमावहेत्यादौ। अनिरुक्तेषु पर्यायेणापि देवतानामेत्येवमादिश्रुतेर्वचनादन्यथा वक्ष्यामः।

१२. वक्ष्यति। अग्नये पवमानायेष्टिः पौर्णमासीविकारः। तत्र

---

[1] A B तेषाम्।

वार्त्रघ्नावाज्यभागौ प्रतीयाज्जानीयादित्यर्थः[1] । सामिधेनीस्विष्टकृत्प्रतिषेधार्था इयं परिभाषा । अन्यथा चोदितेन सह विकल्पः स्यात् । ननु वार्त्रघ्नौ वृधन्वन्ताविति सर्वत्र वक्तव्यं किं पौर्णमासीविकारो ऽमावास्याविकार इति वचनेन । उभयसंज्ञार्थम् । किं कृतं भवति । पौर्णमासं प्रथमार्थे तन्त्रं भवतीत्यस्याप्ययमेवार्थ इति ज्ञापितं भवति ।

१३. प्रतीयादिति वाक्यशेषः ।

१४. पौर्णमासीविकार इत्युक्ते वार्त्रघ्नौ । अमावास्याविकारे वृधन्वन्तौ इति वचनात्[2] अनुक्ते न किंचित्प्राप्नोतीति तदर्थं वचनम् । विकल्पभूतौ विकल्पेन भवत इत्यर्थः ।

१५. देवतया हेतुभूतया प्रतीयात् । कथम् । यत्राग्निर्देवतात्वेन श्रूयते ऽग्नीषोमौ वा तत्र वार्त्रघ्नौ । यत्रेन्द्र इन्द्राग्नी वा तत्र वृधन्वन्तौ ।

१६. इयमपि हेतावेव पञ्चमी । हविषा वा हेतुभूतेन हविषा वा लिङ्गेन प्रतीयात् । कथम् । औषधद्रव्यं पौर्णमासे[3] । सांनाय्यद्रव्यममावास्यायाम् ।

१७. प्रतीयादिति वर्तते । यत्र हेतुसंनिपातः । तद्यथा । ऐन्द्रमेकादशकपालं पुरोलाशं निर्वपेदाग्नेयं पय इति । तत्र हविषो बलीयस्त्वम् । तत्र ऐन्द्रे पुरोलाशे वार्त्रघ्नौ । आग्नेये पयसि वृधन्वन्तौ ।

१८. सर्वार्था इयं परिभाषा । आज्यभागार्थायास्तु विकल्पस्यानवकाशः स्यात् । अत्रोदाहरणानि । विराजौ (६. १३. २३)

---

[1] C ins. -- वाचनं । तेषां देवतात्वमन्त्रादिष्वपि लिङ्गमव्याप्तात्संज्ञा । [2] B नियमाद् instead of वचनाद् । [3] B पौर्णमासं resp. आमावास्यम् ।

स्विष्टकृत इत्युक्तेरृक्सामान्यादृगेव[1] नियम्यते। न निगदः। अतो निगदानिवृत्तिः। कयाशुभीयेन जनिष्ठाउग्रीयस्य निवृत्तिः। सूक्तेन सूक्तस्यैव सामान्यात्। बहुदेवतस्य प्रकृत्यभिसंगमने[2] तत्र ऐन्द्राग्नं याज्यानुवाक्यायुगलम्। इन्द्राग्नी वै सर्वे देवा इत्यर्थवादसामान्यात्। अन्याय इति चेत्। उच्यते। असत्यां गतौ येन केनचित्सामान्येन व्यवस्था युक्ता।

१९. तदन्यत्र सायनाभ्यां दर्शपूर्णमासाभ्यामित्यत्र (१.४.१२) वस्तुवृत्तेनोक्तं न शब्दतः। तदिहानूद्यत एवासंदेहार्थम्। उत्तरसूत्रार्थं च। चशब्द इष्टिपशुबन्धाधिकारानुकर्षणार्थः।

२०. अविकल्पार्थं सूत्रम्। इष्टिपशुबन्धेष्वेव वचनादन्यत्[3]। सोमे तु सत्यपि वचने दीक्षणीयादिषु विकल्पो भवति। तथा च शतपथे। तस्य सप्तदश सामिधेन्यो भवन्ति। उपसत्सु तु यावद्दादिष्टं कुर्यादिति यत्रास्य विकल्पः। नामाधर्मातिदेश इति न्यायाचातुर्मास्यसोमेषु। पित्र्यायामेकैव सामिधेनी। अतश्च मित्रविन्दायां पञ्चदशैव सामिधेन्यः। शाखान्तरे तु सहस्रं सामिधेनीनामाम्नातम्। तेन सह विकल्पो न भवति। ननु विश्वजिति[4] केषांचिदेकविंशतिः सामिधेन्यः शाखान्तरे। तथा इष्टकापशौ शतपथे। तस्यैकविंशतिः सामिधेन्यस्तेषां चतुर्विंशतिः सामिधेन्य इति तत्र कथम्। उच्यते। अस्माकं तत्र विशेषाभावात्साप्तदश्येन सह विकल्पः।

---

[1] A °त्युक्ते चकसा° B °त्युक्ते ऋक्सा°। [2] A शाकना° C शाकनामंगमन-सैन्द्राग्नं या°। [3] A C (in marg.) ins. इष्टिपशुबन्धेष्विति वचनात्। [4] A ins. विषुवति।

२१. काम्यासु कामसंबन्धेन चोदितासु। तद्यथा। सार्वकामिक्यग्नये कामाय इत्येवमाद्यासु स्त्रीलिङ्गनिर्दिष्टासु उपांशुहविष्ट्वं कार्यम्। यज्ञाथर्वणं वै काम्या इष्टयस्ता उपांशु कर्तव्या इति श्रुतेः। लिङ्गदर्शनाच्च। अथो सर्वे वै कामा विभक्तिषु तस्मादुपांशु भवन्तीति स्वश्रुतौ (२.५)।

२२. अकाम्यास्वपि दीक्षणीयाद्यासु तथा अनिर्दिष्टेष्वपि च तद्यथा सौर्यस्योपांशु प्राजापत्यस्योपांशु इत्यादिषु। ग्रन्थमनुसरन्तो व्याख्यास्यामः। अविकल्पार्थो ऽयं योगः। देवत उच्चैरुपांशुतायां (१२.१.२) चेत्युक्ते ऽपि स्वमतपरिग्रहार्थं वचनम्।

१७.

१. हविषां विधानप्रक्रमे[1] प्रतीकग्रहणमृगादिग्रहणं याज्यापुरोनुवाक्यानां प्रत्येतव्यम्। एतासामृचां प्रतीकानि विभक्तय इति श्रुतौ प्रयोगदर्शनात्। एतदुक्तं भवति। यागचोदनाप्रक्रमे[2] यत्प्रतीकग्रहणं तद्याज्यापुरोनुवाक्यानां प्रतीयात्। यद्यन्यः प्रयोजनान्तरसंबन्धो नास्ति। अथोदाहरणानि। सोमं त्वष्टारं देवानां पत्नीरग्निं गृहपतिमिति यजतीति प्रकृत्याह। आ प्यायस्व सं ते पयांसीह त्वष्टारं तं नस्तुरीपमित्यादि। तथाग्नये ऽग्निमत इति प्रकृत्या[3]ग्निमग्निं हवीमभिरित्यादि। तथा प्रायणीयेष्टिः। पथ्यां स्वस्तिमग्निं सोममित्याद्यनुक्रम्य स्वस्ति नः पथ्यासु स्वस्तिरित्यग्ने नयाग्ने

---

[1] A •प्रधान• B •विप्रदान•। [2] A •प्रकरणे B याज्याचो•। [3] B ins. चाह।

त्वं पारयेत्यादि। न चेदन्यो ऽर्थसंयोग इति कस्मात्। उच्यते। आग्नेयौ वा द्वयोः पूर्वाज्येन तनूदेवताः पुरस्तात्पुरोळाशस्याग्निं पवमानं पावकं च शुचिं चोपरिष्टाद्विश्वेभिरग्ने अग्निभिरग्ने विश्वेभिरग्निभिरिति (२.३.९.१०) स्विष्टकृदर्थेन संयोगात्प्रधानश्चैते न भवतः। अग्ने जुषस्वेत्याहुतौ हूयमानायाम्। उपप्रियमित्याहवनीये हूयमानायामिति नैते याज्ये। अग्नीषोमप्रणयनसंयोगात्।

२. द्विप्रभृतिषु [1]यजतिषु देवतालिङ्गरहितेष्वपि चोदनानुपूर्व्येण याज्यापुरोनुवाक्ये भवतः। तद्यथा। दूतं वो विश्ववेदसमिति द्विदेवत्यानामिति (१४.५१.१४) चोदनाग्रहणे असति यागानुपूर्व्येण स्यात्। को दोष इति चेत्। उच्यते। पशुपुरोळाशे ऽक्रियमाणे ये एव पशुपुरोळाशस्य प्राप्ते ते एव प्राप्नुतः पशोः। तन्मा भूदिति चोदनाग्रहणम्।

३. न केवलं चोदनानुपूर्वेण व्यवस्था किं तर्हि दैवतेन प्राधान्यस्तुतिभाजा शब्देन। चोदितदेवतापर्यायेणापीत्यर्थः।

४. लिङ्गमुच्यते। लिङ्गमात्यन्तसहचरितं[2] यदुच्चार्यमाणं लिङ्गिनं प्रत्याययति। यथा। धूमकेतुः पुरुषश्च इत्यग्नेः। तेन लिङ्गेन। न केवलं पूर्वैरेव कारणैर्व्यवस्था।

५. उपसर्जनमुपसर्गो गुण इत्यर्थः। अतश्च सगुणासु देवतासु चोदितासु अनधिगच्छन् अप्राप्नुवन् तल्लिङ्गे सगुणे देवतालिङ्गे दैवतेन देवताशब्देन केवलेन तुष्येत्। आत्मनस्तुष्टिं कुर्यात्। नन्वे तु

---

[1] A om. यजतिषु। [2] A लिङ्गिमोत्य° B लिङ्गेमोत्यय° C लिङ्गिमात्यन्तं।

न कुर्यात्। यत्र सूत्रकारेण याज्यापुरोनुवाक्ये नोक्ते तत्रैवं कुर्यात्। तद्यथा। विश्वेभ्यो देवेभ्यो वार्षिकेभ्यो आगतेभ्यः सप्तदशेभ्यो वैरूपेभ्य इत्यादौ।

६. उपसृष्टाः सगुणा एव निगमस्थानेषु भवन्ति। तद्यथा। अग्निं तपस्वन्तं जनद्वन्तं पावकवन्तमावहेति।

७. अभीक्ष्णं पुनःपुनर्या वा चिद्देवता तस्यैतस्यै देवतायै हविश्चोद्यते। एकस्मिन्नेव कर्मणि। तद्यथा। आग्नेयं कृष्णग्रीवमालभेत सौम्यं बभ्रुम्। आग्नेयं कृष्णग्रीवमिति चरकाणाम्। तत्र प्रथमस्याग्नेयस्याग्ने नयेति षट्कः। द्वितीयस्या ते वत्सो मनो यमदित्यग्नये कामाय षट्क उक्तः। ननु सगुणा एताः। उच्यते। निर्गुणस्य चोदितस्य गुणो भवन्नपि न दुष्यति। यथा प्र तत्ते अद्य शिपिविष्टेति। देवतायै हविश्चोद्यत इति देवतावचनात्काये प्राजापत्याः प्राजापत्य इतरे। को वै प्रजापतिरित्यर्थवादात्। तथा प्रजापतिर्वै क इति च। हविश्चोद्यते तत्रेति वचनाद्यस्मिन्नेव हविषि पूर्वमुपदेश औषधमाज्यं वा तत्र व्यवस्था। प्रथमोपदिष्टे प्रथमचोदनायामुपदिष्टे इत्यर्थः। याज्यानुवाक्ये इति। ननु याज्यैव केवला। यातयामत्वदोषाशङ्कया ते इति वचनाद्विपर्यासेनापि ते एव। वर्षीयसी (१.१७.११) तु याज्येति तत्र तुशब्दान्नियमः। सर्वत्र प्रतीयात्। सर्वत्रैव जानीयात्।

८. इदं चान्यदुच्यते। इष्टयो बहुप्रकाराः शाखान्तरेषु कामविशेषसंयुक्ताः पठ्यन्ते। तासु पृथक्त्वतः नानात्वेन न शक्या विगणयितुं ततस्तान्यानपि धर्मान्यथोक्ताननुतिष्ठेत्। तद्यथा। स यदि

वृष्टिकामः स्याद्दीक्ष्या वा यजेत दर्शपूर्णमासयोर्वैवं ब्रूयाद्वृष्टिकामो वा अस्मीति तथोक्त्वा अध्वर्युं ब्रूयात्पुरोवातं च विद्युतं च मनसाध्यायेति अभ्राणि मनसाध्यायेत्याग्नीध्रं स्तनयित्नुं च वर्षं च मनसाध्यायेति होतारं सर्वाण्येतानि मनसाध्यायेति ब्रह्माणमित्येवमादयो धर्माः शाखान्तरीया ग्राह्या इत्येवमर्थः सूत्रारम्भः।

९. तत्र तेष्वपि शाखान्तरेषु या अनादिष्टयाज्यापुरोनुवाक्या देवताः तासु गायत्रीत्रिष्टुभौ। गायत्री पुरोनुवाक्या त्रिष्टुब्याज्या इत्येतया व्यवस्थया। तद्देवते या देवता चोदिता। न तु भक्तिमात्रेण। यथा। आग्नेयी गायत्रीति।परीच्छेत्। सर्वतोऽन्विच्छेत्।

१०. गायत्रीत्रिष्टुभोरलाभे उष्णिहं बृहतीं च परिहाप्य अन्यानि प्राकृतानि विराडष्टमानि छन्दांसि ग्रहीतव्यानि। कुतः[1]। विराडष्टमानि ह वा एतं छन्दांसि गोपायन्ति योऽसौ तपति तां ते संपदं मोहयन्ति येऽतिच्छन्दोभिर्यजन्तीत्यपरेण दर्शनात्। नौष्णिहा वषट्कुर्यान्न बृहत्या वषट्कुर्यादिति चरकाणाम्[2]। अभावेऽन्यथापि शुनासीराविमामिति यत्नात्।

११. पुरोनुवाक्यातो याज्या वर्षीयसी गुरुतरा कर्तव्या। तुशब्दो नियमार्थः। तेन यत्र विपर्यासेन लघीयसी तत्र न विपर्यस्येत् यद्यपि अभीक्ष्णचोदना[3] ये ते इति परिभाषणात्। तथा च महिम्नो याज्यापुरोनुवाक्याविपर्यासे[4] सूत्रकारेणैव कृतो यतः

---

[1] B om. the words from अलाभे to कुतः C orig. from विराड॰ to कुतः।
[2] B कुर्यादिति च कारणम्। C कुर्यादिति च। विराडष्टमानि छन्दांसि ग्रहीतव्यानि। कुतः कारणम्।
[3] B अभीक्ष्णचोदनायां यो न इति परिभाषणात् C अभीक्ष्णदेवतासु।
[4] C om. याज्यापुरोनुवाक्या।

उत्तरस्य सहितो याज्यापुरोनुवाक्ये विपर्यस्येदिति (१६.७.१२)। विच्छन्दसो न विपर्यासो भवति। त्रिष्टुप्जगत्योश्च त्रिष्टुप् वर्षीयसी। शौनकवचनात् गुर्वक्षराणां गुरुत्वेपि सर्वं गुर्वक्षरं त्रैष्टुभमेव विद्यादिति (३.१८.३३)।

१२. पूर्वोक्ताभावे सति समे वा। तुल्यप्रमाणे कल्पयितव्ये।

१३. यत्र ययोर्याज्यापुरोनुवाक्ययोरेतेषां वक्ष्यमाणानां लक्षणानां किंचिद्भवेत्। पुरोनुवाक्यालक्षणान्यप्यसंभवे याज्यायां ग्राह्याणि। याज्यालक्षणान्यपि पुरोनुवाक्यायाम्। कथं नाम स्युरित्येवमर्थः सूत्रारम्भः। किंचित्स्यादिति वचनात् हुवे ह्वयामि आहुवामहे पिब पाहि अपाः एवमादि। न तु यथापठितान्येव ग्राह्याणि।

१४. हुवे हवामहे श्रुध्यागच्छेदं बर्हिर्निषीद देवतानामेति पुरोनुवाक्यालक्षणानि। हुवे हवामहे एते एव कर्तृवचने। नान्ये लक्षणत्वेन ग्रहीतव्ये ददामि ब्रवीमीति। कुतः। किंचिद्वचनात्सिद्धे तुल्यार्थयोः पाठात्। आगच्छेति सोपसर्गमतः पुनःपाठः। निषीदेति सोपसर्गमेकं लक्षणम्। देवतानामेति। नामधेयमिति नोक्तं पर्यायान्तरस्यापि ग्रहणार्थम्। न चेह्य इतीत्यधिकारेऽपि सति लक्षणानीति वचनात्पाठ्युकान्यप्येतानि लक्षणानि।

१५. अद्धि पिबेत्येतेषां न स्वरूपेण ग्रहणम्। किं तर्हि उपलक्षणमात्रेण। कुतः। लक्षणाधिकारे पुनर्लक्षणानीति वचनात्। अतश्च कश्चिद्धातुव्यत्ययो भवति। न चैतद्लाक्षणिकं नैगमेषु तत्रतत्र ग्रहणात्। तथा च श्रुतिः। आहुतीवृधमित्यभिरूपा (८.८)। जुषस्व

प्रतिहर्यत्यभिरूपा। देव याज्येत्यभिरूपा। हविष्मती हविषः। बंहिष्ठमिति बहुल इव हि पुरोलाशः। प्र बाहवा सिसृतं जीवसे न (कौ॰ ब्र॰ १८.१३) इति हविषो बाहवेति तद्धविषो ऽङ्गानां रूपं इत्येवमादीन्याह। किमेवं सिद्धमिति चेत्। उच्यते। गायत्रः सर्वस्तार इति प्राकृतानां स्थाने तल्लिङ्गयुक्ता गायत्र्यः कर्तव्याः। तच्च केनचित्सामान्येन लिङ्गं सिद्धं भवति।

१६. पूर्वस्मिन् प्रदेशे लक्षणं यस्याः स्यात् सा पुरोनुवाक्या समृद्धलक्षणा।

१७. उपरिलक्षणं यस्याः सा उपरिष्टाल्लक्षणा। द्वितीये ऽर्धर्चे [1]वा पादे लक्षणं यस्याः सा याज्या समृद्धा। प्रदेशविशेषस्योक्तस्याभावे अनियम इति[2] पृथक्सूत्रारम्भात्।

१८. अनधिगच्छन्नलभमानस्तद्देवते। तदिति सर्वनाम्ना चोदितायाः परामर्शः। सा देवता अनयोरिति अतद्गुणसंविज्ञानो[3] बहुव्रीहिः। तेनैतत्सिद्धं भवति। ऋगन्तरस्थेनापि देवतापदेनोपलक्षिते याज्ये। यथाभितष्टीयभूतांशादिषु। अधिगमानधिगमौ च बह्वृचशाखाविषयौ। तथा दैवते दर्शनात्। तच्च दाशतयीप्रधानेव देवताचिन्ता[4]। यतः नम्राभ्यां यजेत्। नम्राभ्यां नमनशीलाभ्यां पुनःपुनःप्रयोगे ऽप्ययातयामाभ्यामित्यर्थः। यजेदिति वचनादिष्टिपशुसोमेषु सर्वत्र।

१९. इतिशब्द एवशब्दस्यार्थे। ऊहेदेव। न विकल्पं कुर्यात्।

---

[1] C ins. ऽन्ये। [2] A om इति। [3] B om. वि A ॰गुणं। [4] A चिन्तयतः B चिन्तयेतः।

स्तु विकारो न विद्यत इत्यनेन ऊहेद्यथार्थं प्रापयेदित्यर्थः । द्विदेवतबहुदेवतेषु हविःषु । अनयोर्ऋचोर्गुणिपदस्याभावात्कदाचिदाहवनीयो हविर्वहनार्थमभ्यर्थ्यत इति संदेहः स्यात्तदर्थं द्विदेवतबहुदेवतेष्विति वचनं । अहेळता मनसेत्यनयोर्वा अनूहार्थम् । मनसा देवानां वाचा पार्थिवानामिति लोकप्रसिद्धेः ॥ आशृणुतं आशृणुत ॥ वां गीर्भिः । वो गीर्भिः ॥ निषीदतं नः । निषीदत नः ॥ गच्छतं । गच्छत ॥ जुषेथां । जुषध्वं ॥ वीतं । वीत ॥

२०. इदं चानादिष्टयाज्यापुरोनुवाक्यासु पक्षान्तरम् । प्राकृतीर्याज्यापुरोनुवाक्याः स्वधर्मेणानुब्रुवन् होता तां विकृतिचोदितां देवतां प्रणमेत् । कथम् आत्मनोऽभिमुखीकृत्य हृदि विज्ञानमयीं प्रकृतिमभिलिख्य नानात्वचिकैकत्वैः[1] संकल्प्य मनसा ध्यायेत् । तथा च श्रुतिः । यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट्करिष्यन्निति । द्विरभ्यासो ऽध्यायपरिसमाप्तौ शिष्टाचारस्तदाचरणं चायुष्यमिति ॥

इति शाङ्खायनसूत्रपूर्वार्धभाष्ये प्रथमो ऽध्यायः ।

---

[1] C नानैक० ; in marg. द्वि ।

अथ द्वितीयोऽध्यायः।

१.

१. उक्तमेतद्व्याख्यातौ दर्शपूर्णमासौ प्रकृतिरिष्टिपशुबन्धानामिति न च दर्शपूर्णमासादिकाः क्रिया गार्हपत्याहवनीयान्वाहार्यपचनादिभ्यो विनापि सिध्यन्ति। आधानादिगुणविशिष्टाश्च गार्हपत्याद्याख्यां लभन्ते। नान्येनोपायेनाहृताः। तदर्थमुच्यते। वसन्ते ब्राह्मणस्याग्न्याधेयमिति। वसन्त ऋतुस्तस्मिन् ऋतौ ब्राह्मणस्य यजमानस्याग्न्याधेयाख्यं कर्म भवति। कुत एतत्। ब्राह्मणो वसन्त आदधीतेति श्रुत्यन्तरात्। स्वशाखायामप्यग्न्युत्पत्तिशेषत्वेन तनूदेवताश्च इष्टय उक्ताः। अस्मिन्वै लोके उभये देवमनुष्या आसुरित्युपक्रम्य एता वा अग्नेस्तन्वस्तद्यदेता देवता यजत्यथाग्निः साङ्गः सतनूः प्रीतो भवतीति।

२. समानं पूर्वेण।

३. कृतव्याख्यानम्।

४. वैश्यस्यायं विकल्पोऽनन्तरत्वात्।

५. शिशिर ऋतुः सर्ववर्णानां वसन्तादिभिर्विकल्प्यत इति वाक्यशेषः। एवमेव शाखान्तरे श्रुतत्वात्।

६. वसन्तादिष्वपि अनियमः सोमेन यक्ष्यमाणस्य। तथा च श्रुतिः। सोमेन यक्ष्यमाण आदधानो नर्तुं पृच्छेन्न नक्षत्रम्।

७. उक्तेषु ऋतुष्वेवानयोस्तिथ्योराधानं कुर्यात्। तत्रामावास्या-

धाने पूर्वस्यामुपवासाद्युपक्रम उत्तरस्यामग्न्युत्पत्तिरिष्टयश्च। कुतः। शतपथश्रुतेः। पौर्णमास्याधाने तु चतुर्दश्यामुपवासाद्युपक्रमः पौर्णमास्यामग्न्युत्पत्तिरिष्टयश्च। श्वोभूते ऽन्वारम्भणीया पौर्णमासं च। कुतः। काठके दर्शनात्। तत्र पठ्यते। आधानं चेत्पौर्णमास्यां पूर्वां तद्देवताभ्य उपवसेदुत्तरामन्वारम्भणीयायै पर्वणे चेति।

८. उक्तेष्वेवर्तुषु पूर्वेण सह विकल्पार्थो वाशब्दः। शुक्लपक्षे शुक्लपक्षे पुण्ये नक्षत्रे पुण्यादौ आदधीत।

९. कामसंयुक्तानि यथाश्रुतानि शास्त्राणीति शेषः। तद्यथा। बहुर्हैव प्रजया पशुभिर्भवति य एवंविद्वान्रोहिण्यामाधत्ते। श्रियं ह गच्छति य एवंविद्वान्मृगशीर्ष आधत्ते। पूर्वयोरादधीत पुरस्तात्तुर्हैवास्मै भवति। उत्तरयोरादधीत श्वःश्रेयसं हैवास्मा उत्तरावद्भवति। हस्ते अग्नी आदधीत य इच्छेत्प्र मेदीयेति। चकारो विकल्पानुकर्षणार्थः।

२.

१. उच्यन्त इति वाक्यशेषः। किमर्थमेतत्। उच्यते। पूर्वकालैः सह समुच्चयो मा विज्ञायीति। अथशब्दस्तर्हि अनर्थको ऽनन्तरमेव कालवचनात्। सत्यम्। इष्टिकाला इत्यस्य पूर्वपदेन सहानन्तर्यार्थेनार्थवान् भवति[1]। तथाहिताग्नित्वे सत्यपि इष्टिकरणपक्षे ऽङ्गीकृते यावदिष्टयो न कृतास्तावदन्याः क्रिया यागहोमरूपा

---

[1] C om. सह।

न भवन्ति। अदितिं वा अस्यग्न्याधेयं संतिष्ठत इति (१४. २. २१) लिङ्गात्।

२. वाशब्दः प्रत्येकमभिसंबध्यते। सद्यस्तस्मिन्नेवाहनि। द्वादशाहे द्वादशाहान्ते। सप्तमीनिर्देशात्। एवं मासादयो द्रष्टव्याः। कुतः। शाखान्तरश्रवणात्।

३. एतास्ता इष्टय उच्यन्ते यासां काला उक्ताः। अग्नये पवमानगुणायेष्टिः कर्तव्या। एवमेव श्रुतत्वात्।

४. वार्त्रघ्नावाज्यभागावित्यर्थः। सिद्धमेवैतत्। पुरोलाशहविष्कादाग्नेयत्वाच्च। तथाप्युच्यते। अस्या एव द्वितीयत्वे वृधन्वन्तौ मा भूताम्। आमावास्यं द्वितीयाया इति श्रुतेः।

५. अग्न आयूंषि पवसे पुरोनुवाक्या। अग्ने पवस्व स्वपा याज्या।

६. तं हि शश्वन्त ईलते अनुवाक्या। ते स्याम ये अग्नये याज्या। एते स्विष्टकृतौ। ईलितवत्यौ हव्यवाड्वत्यौ प्रथमायै संयाज्ये इति श्रुतेः। श्रूयमाणं प्राकृतं नामधेयमन्यस्मिन्द्रव्ये प्रकृतिं निवर्तयतीति प्राकृतयोर्निवृत्तिः। निगदस्य चानिवृत्तिः। अतुल्यत्वात्। गृहमेधीयायां च निगदप्रतिषेधात्।

७. अग्नये पावकगुणायैकं हविः। अग्नये शुचिगुणाय द्वितीयम्। एषा द्वितीया इष्टिः स्त्रीलिङ्गनिर्देशात्। पावकशुची गुणौ। द्वौ ह्यग्नी यजतीति श्रुतेः। अग्नये च पावकाय शुचये चेति नोक्तम्। [1]शुचेरेवाग्निरहितस्य यागो मा विज्ञायीति। एता

---

[1] A B C शुचिरे०।

वा अग्नेस्तन्वस्तयदेता देवता यजतीति संदेहः स्यात्। अन्यथा सह समानतन्त्रोपदेशे एतदीयं तन्त्रं स्थितमब्दात्।

८. वृधन्वन्तावाज्यभागौ।

९. अग्ने पावक रोचिषा पुरोनुवाक्या। स नः पावक दीदिवो याज्या प्रथमस्य हविषः।

१०. अग्निः शुचिव्रततम इति पुरोनुवाक्या। उदग्ने शुचयस्तव याज्या द्वितीयस्य हविषः। ता वै गायत्र्यो भवन्ति। अभिरूपा भवन्तीति लिङ्गात्।

११. अग्निमग्निं हवीमभिः पुरोनुवाक्या। अग्निनाग्निः समिध्यते याज्या। अग्नी द्वितीयाया इति श्रुतेः।

१२. इष्टिग्रहणमनुवर्तते। अदितये तृतीया इष्टिर्भवति। द्वितीयातृतीयाग्रहणमिष्टित्रयेणायमेक आधानकल्प इत्यस्यार्थस्य प्रतिपादनार्थम्।

१३. त्वमग्ने सप्रथा असि सोम यास्ते मयोभुव इत्येतावाज्यभागौ। सदन्तौ नाम वेदितव्यौ। संज्ञाकरणं शास्त्रसंव्यवहारार्थम्।

१४. उत त्वेत्येषा ऋक् प्रधानस्य पुरोनुवाक्या।

१५. महीमूष्वादिका प्रधानस्य याज्या।

१६. प्रेद्धो अग्ने दीदिहि पुरो नः स्विष्टकृतः पुरोनुवाक्या। इमो अग्ने वीततमानि हव्येति याज्या। सप्तदशसामिधेनीका तृतीयेत्यारभ्य सर्वस्य एवमेव श्रुतत्वात्। अयमाधानकल्पः स्वशाखायामुक्तः। वक्ष्यमाणास्तु शाखान्तरात्। ननु सदद्विराजोः संज्ञाकरणं विनापि शास्त्रसंव्यवहारसिद्धिः। यथा वैराजमाज्यं

छतस्तोमीयं वेति। तथापि संज्ञा कृता। कथं नाम सार्वकामिक्यां भूतिकामस्य सदन्तौ स्याताम्। दीप्यमानश्रीकामस्य विराजाविति वृद्धसंप्रदायः।

१७. चतस्र इष्टयः कार्या इति श्रुत्यन्तरम्। तन्मतानुसारिणो ऽग्नये प्रथमां कुर्युः। ननु देवतोपदेशो न कर्तव्यो याज्यानुवाक्यालिङ्गसिद्धेर्बहुदेवतावत्। उच्यते। इदमेवोदाहरणमङ्गीकृत्य ब्रूमः। अग्ने द्युम्नेन जागृवे। एवमादिगुणसंयुक्तो ऽग्निः प्रतीयते। ननु याज्यायां गुणाभावादसंदेहः। उच्यते। नावश्यं याज्यानुवाक्ययोरुभयोरपि गुणा दृश्यन्ते। यथा शुनासीरीये। तस्मादुक्तव्या देवतेति। अग्नये प्रथमा। अग्नये पवमानाय द्वितीया। द्वितीयान्ते पौर्णमासीविकार इत्युक्तत्वात्पौर्णमासावाज्यभागौ। अग्नये च पावकायाग्नये च शुचये तृतीया यथोक्ता। अदितये चतुर्थी यथोक्तैव।

१८. अग्ने द्युम्नेन जागृवे पुरोनुवाक्या। उप त्वा जुह्वो मम याज्या।

१९. अर्चन्तस्त्वा हवामहे पुरोनुवाक्या। अग्निं स्तोमेन बोधय याज्या। स्विष्टकृत एते भवतः। ता वै गायत्र्यो भवन्तीति। अभिरूपा भवन्तीति लिङ्गात्।

३.

१. कर्मान्तरमासां चतसृणामिष्टीनाम्। प्रथमा च द्वितीया च समानतन्त्रे भवतः। अग्निरग्निश्च पवमानः। तच्च पवमानान्तं तन्त्रमित्युक्तम्। इष्टिवचनात्। तत्संयाज्यारूपमिति च श्रुतेः। अतस्तासां

पौर्णमासावाज्यभागौ । यथोक्ता याज्यानुवाक्याः । तं हि प्रयन्त ईळते ते स्याम ये अग्नय इति स्विष्टकृतः ।

२. समानतन्त्रे भवतः । तत्राग्नेयी प्रथमा । ततः पवमानपावकशुचयस्तन्त्रं तत्र भूयसां साधर्म्यमिति न्यायेन (१३.१४.५) पावकशुच्याश्रयं तन्त्रम् । तेनामावास्याविकारः । उक्ताः प्रधानयाज्यानुवाक्याः । अग्निमग्निं हवीमभिरग्निनाग्निः समिध्यत इति स्विष्टकृतः । ततो ऽदितये तृतीया ।

३. अपरः कल्पः । पूर्वोक्तान्येव पञ्च हवींषि द्विशः कृत्वा । अग्निश्च शुद्धः । अग्निश्च पवमानः । ईदृशी प्रथमा । तत्र पवमानसंबन्धि तन्त्रं । तद्युक्तमिष्टिवचनात् । अतः पौर्णमासीविकारः । तं हि प्रयन्तस्ते स्यामेति संयाज्ये। अग्नये च पावकायाग्नये च शुचये द्वितीया यथोक्ता ।

४. द्विहविष इति पञ्चभिर्न संभाव्यते। तदर्थमाह । अदितिदेवत्यस्य हविष ऐन्द्राग्नो द्वितीयो भवति । ब्राह्मणस्य यजमानस्य । अत्रादितिप्राधान्यात्सप्तदश सामिधेन्यः सदन्तावाज्यभागौ विराजौ संयाज्ये। अदितेः उत त्वामदिते महि महीमू षु मातरमिति । ऐन्द्राग्नस्येन्द्राग्नी अवसा प्र चर्षणिभ्य इति ।

५. द्वितीयो ब्राह्मणस्य । अत्राप्यग्नीषोमा सवेदसा युवमेतानीति विशेषः ।

६. आदित्यस्य द्वितीय ऐन्द्रः । राजन्यस्य क्षत्रियस्येत्यर्थः । याज्यानुवाक्ये इन्द्रं वो विश्वतो मादयस्व हरिभिरिति ।

७. आदित्यस्य द्वितीयो वैश्वदेवः । वैश्यस्य यजमानस्य ।

८. *विश्वे देवास आ गत* पुरोनुवाक्या। स्तीर्णे बर्हिषि समिधाने याज्या। भारद्वाज्यौ। यत्तु ता वै गायत्र्यो भवन्तीति श्रुतिवचनं तत्तनूदेवताविषयं तत्प्रकरणात्। द्वितीय इत्यप्रधानवचनात्पूर्वोक्तास्तु अदितिप्रधानतन्त्रम्।

९. अनन्तरं कल्पद्वयमुच्यते। तत्रैकस्मिन्कल्पे आग्नेयी शुद्धा प्रथमा। अदितये द्वितीया। अयं प्रथमः कल्पः। अपरस्मिन्कल्पे तनूदेवतासहित आग्नेयः पूर्वस्यां। द्वितीया त्वदितय एव। अयं द्वितीयः कल्पः। कुत एतत्। आग्नेयीति तद्धितनिर्देशात्। द्वयोरिति द्वयोः कल्पयोः। अनन्तरे द्वितीयावचनात् (२.३.१२) पूर्वेत्युत्तरस्यां सत्यामर्थसिद्धमेव। तथाप्युच्यते। अग्नये प्रथमामिति यदुक्तं अस्यां तस्य प्रापणार्थं। तेनाग्ने द्युम्नेनोप त्वा जुह्वो ऽर्चन्तस्त्वाग्निं स्तोमेनेति स्विष्टकृत इति सिद्धं भवति।

१०. अयमपरः कल्पः। पुरोलाशस्याग्नेयस्य पुरस्ताद्यागात् आज्येन तनूदेवताः। आज्येनेति वचनम्। एता एव तनूदेवतासंज्ञा या आज्येनेज्यन्ते। पुरस्तात्पुरोलाशस्येति आज्यभागानन्तरम्। अग्निं पवमानं यजति। तस्य पूर्वोपदिष्टे याज्यानुवाक्ये। ततो ऽग्निं यजति। तस्याग्ने द्युम्नेनोप त्वा जुह्वः। यद्यप्यग्निर्मूर्धा भुवो यज्ञस्येति प्रथमोपदिष्टे तथापि ते न भवतः। कुतः। दशम्यविकृताग्नेयीति ज्ञापकात्। आधानिकीनामेवातिदेशो भवति। पुरोलाशयागानन्तरं पावकशुची दिवशब्दात्।

११. यस्मिन्पक्षे आज्येन तनूदेवता इज्यन्ते तस्मिन्नेव स्विष्टकृतो याज्यानुवाक्ये भवतः।

१२. उभयोरपि कल्पयोः। द्वितीयेति वचनात्।

१३. वृधन्वन्तावाज्यभागावित्यर्थः। आमावास्यं द्वितीयाया इति प्राप्त एव वचनमन्येषामदितिधर्माणां प्रापणार्थम्। तेन सप्तदश सामिधेन्यो विराजौ संयाज्ये इति एतद्भवति। अन्यथा तृतीयात्व एवैते धर्माः स्युस्तत्र दृष्टत्वात्। न द्वितीयात्व इति।

१४. तत्त्ण एतास्तात्त्प इष्टयः। तथा त्रैवर्णिक एवानयावृत्त्या जीवन् कृत्वा वा एवमुच्यते। तस्य शाखान्तरे विशिष्टकालसमाधानमुक्तम्। तस्यैता इष्टयः शाखान्तर एवोक्तास्तल्लिङ्गेन सूत्रकारो व्यवहरति। अतश्च नान्यस्यैता भवन्ति। तनूदेवताभिरिति तनूदेवतासंज्ञकैर्हविर्भिरेकहविष इष्टयस्त्र्यहं कर्तव्याः। एकस्मिन्नहनि अग्नये पवमानाय यथोक्ता। द्वितीयेऽहनि अग्नये पावकाय। अमावास्याविकारोऽग्ने पावक स नः पावकाग्निमग्निं हवीमभिरग्निनाग्निः समिध्यत इति स्विष्टकृतः। तृतीयेऽहनि अग्नये शुचये। तस्या अप्यमावास्याविकारोऽग्निः शुचिव्रततम उदग्ने शुचयो अग्निमग्निं हवीमभिरग्निनाग्निः समिध्यत इति स्विष्टकृतः। एवमेतास्तिस्र इष्टयस्त्रिभिरहोभिः कुर्यात्। वैष्णवद्वितीयाभिरपरं त्र्यहं एवमेव व्याप्नुयात्। वैष्णवो द्वितीयो यासां ता वैष्णवद्वितीयाः। काः पुनस्ताः। तनूदेवताः। कुतः। प्रकृतत्वात्। वैष्णवस्य द्वितीयात्वेन गुणभावेन निर्देशात्तनूदेवताधीनानि तन्त्राणि। इदं विष्णुर्वषट् ते विष्णविति वैष्णवस्य याज्यानुवाक्ये। आदित्यतृतीयाभिरपरम्। तनूदेवताभिरिति वर्तते। वैष्णवद्वितीयाभिरिति च। आदित्यं तृतीयं हविरासां वैष्णवद्वितीयानां तनूदेवतानाम्। आदित्यतृती-

यास्तनूदेवता इति समासार्थः। अतस्तत्प्रधानत्वात्तदधीनानि तन्त्राणि। एवं नवभिरहोभिर्नवैता इष्टयः। दशम्यविकृताग्नेयी। दशमे ऽहनि [1]अविकृता न तनूदेवतासंपृक्ता आग्नेय्येवेष्टिः। अविकृतेत्यसति आद्येन तनूदेवताः स्युः। अतश्च तनूदेवतावर्जं तद्धर्मप्राप्तिः। तेन विश्वेभिस्त्वे अग्निभिरग्ने विश्वेभिरग्निभिरिति स्विष्टकृतः। अग्ने शुक्रेणोप त्वा शुक्र इति प्रधानस्य।

१५. सर्वास्वाधानेष्टिषु उपांशुहविष्टा। हविःशब्देन प्रधानं लक्ष्यते। उपांशुत्वं प्रधानदेवतायागस्येत्यर्थः। सर्वशब्दो ऽनन्तराणामेव मा भूत्।

१६. सर्वासु चशब्दात्।

१७. सर्वग्रहणमनुवर्तमानमपीह न संबध्यते। विभक्तिभेदात्। न चायं देवताधर्मो भावप्रत्ययेनानिर्देशात्[2]। अतश्च व्यामिश्रायां न साम्रदश्यम्।

१८. सर्वास्विष्टिषु प्रतिविभज्य दीयन्ते। तन्त्रान्तरदर्शनात्। चतुर्विंशतिं दद्यादिति शतपथे। गवामेषा संख्या न्यायसिद्धा।

१९. दक्षिणा इति प्रकृतम्। द्वादश दद्याद्द्वादश वै मासाः संवत्सरः संवत्सरस्यैवाप्त्या इति श्रुतेः। यजमानो दद्यात्। ऋत्विक्। आजीविकास्मरणादार्त्विज्यस्य।

२०. वाशब्दो विकल्पार्थः। पूर्वयोरपि योगयोर्द्रष्टव्यः।

२१. दक्षिणेति वर्तते। असमासनिर्देशः क्रमार्थः।

२२. सुवर्णशतमानं प्रसिद्धम्। रथो युक्तः सामर्थ्यात्। वासो

---

[1] B ins. चविकृता। [2] A C निर्देशात्।

वचनम्। अजश्छागः पुंलिङ्गात्। यद्यजाजः स्यादग्नीध एवैनं प्रातर्दद्यादिति शतपथे। चशब्दः सर्वास्वित्यनुकर्षणार्थः। अतः प्रतीहि प्रतिविभज्य दानम्।

२३. आहितेष्वग्निष्वनन्तरं द्वादशरात्रं स्वयं यजमानोऽग्निहोत्रं जुहुयात्। एतस्मादेव द्वादशरात्रनियमादेतदवसीयते। अन्यत्र ऋत्विगग्निहोत्रहोता। पक्षे यजमानः। क्षत्रियवैश्ययोस्तु स्वयंहोमः पक्षेऽपि न प्राप्तः। तयोरप्यत्र[1] द्वादशरात्रमविशेषेणोच्यते। कुत एतत्। शतपथश्रुतेः। ते होचुः। को न इदं होष्यतीति। ब्राह्मण एवेति पृष्टप्रतिवचनम्।

२४. द्वादशरात्रमेव चशब्दात्।

न नर्मयुक्तं त्वनृतं[2] हिनस्ति न स्त्रीषु राजन्न विवाहकाले।
प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानि॥

(महाभारत १. ८४ १२)

इत्येवंविषयमप्यनृतमेष्वहःसु प्रतिषिध्यते। यच्च मानवे

शूद्रविट्क्षत्रविप्राणां यत्रर्तोक्तौ भवेद्वधः।
तत्र वक्तव्यमनृतं तद्धि सत्याद्विशिष्यते॥ (मनु ८. १०४)

एवमाद्यप्यनेन श्रौतेन बाध्यते। कर्माङ्गत्वादवश्यम्।

२५. द्वादशरात्रमेव। बहुभ्योऽपि बहुवचनात्। भृत्योपरोधेनापि। कर्माङ्गत्वात् सत्यवदनं चातिथिभ्यश्च दानमिति यावज्जीवं केचिदिच्छन्ति।

---

[1] A चान्यत्र। [2] B om. तु A वचनं।

२६. आहिताग्निग्रहणात्प्रागपीष्टिभ्य एते व्रते। व्रतग्रहणमग्नये व्रतपतय इत्यस्याः प्रापणार्थम्। अनिष्ट्वा निरूढपशुना। तस्यैव नित्यत्वात्। मांसमर्थप्राप्तम्। न त्वग्नीषोमीयादिषु। तत्र विशेषवचनात्। ओषधीनामारण्येनानिष्ट्वा आरण्यानाम्। ग्राम्येण ग्राम्याणाम्। ओषध्यः फलपाकान्ता इति प्रसिद्धम्।

४.

१. दर्शपूर्णमासारम्भ इति श्रुतत्वात्। सोमाधाने ऽपि निवृत्ते सोमे दर्शपूर्णमासारम्भ एव। दर्शग्रहणं वसिष्ठयज्ञयाजिनस्तदारम्भे ऽपि यथा स्यात्। अन्वारम्भणीयेत्यारम्भमनुभवति। तेन सहप्रयोगः सिद्धो भवति।

२. आग्नावैष्णव एकादशकपालः। सरस्वत्यै चरुः। सरस्वते द्वादशकपालः। एवमेव शाखान्तरे श्रुतत्वात्।

३. पुरोनुवाक्या।

४. याज्या।

५. पावका नः सरस्वती पुरोनुवाक्या। इमा जुह्वाना युष्मदा नमोभिः याज्या।

६. जनीयन्तो न्वग्रवः पुरोनुवाक्या। स वावृधे नर्यो योषणासु याज्या।

७. पूर्वैः सह समुच्चयार्थश्चशब्दः। अन्वारम्भणीयामेके शाखिनः पञ्चहविषं कुर्वन्ति। त्रीणि पूर्वोक्तानि। अग्नये भगिने चतुर्थम्। अग्नये व्रतपतये पञ्चमम्। एक इति विकल्पार्थम्।

८. त्वमग्ने वीरवद्यशः पुरोनुवाक्या। त्वं भगो न आ हि रत्नमिषे याज्या।

९. त्वमग्ने व्रतपा असि पुरोनुवाक्या। यद्वो वयं प्र मिनाम व्रतानीति याज्या।

१०. उभयथाविशेषात्।

११. उभयथैव समाम्नात्।

५.

१. कामेभ्यो हितं काम्यम्। पुनराधेयमिति शास्त्रसंव्यवहारार्थम्। वक्ष्यति। पञ्चकपालौ पौनराधेयिकीष्टिः। याः पुनराधेये ता हविष (८. १२. ४. ५) इति। अजानानस्य कामान् कुर्वतो ऽपि काम्यानि। यस्यासंपत्तिः स एवमुच्यते।

२. उद्वासनमिहाग्न्युत्सर्गः[1]। स च पुनराधेयार्थ एव[2] प्रकरणात्।

३. पुरोनुवाक्या।

४. पृष्टो दिवि पृष्टो अग्निः पृथिव्यां याज्या। अग्नेर्वैश्वानरगुणस्य। आग्नेयस्याग्निर्मूर्धा भुवो यज्ञस्य।

५. वर्षाणां मध्ये सुनराधेयस्य सोद्वासनस्य कालः।

६. मध्यावर्ष एव। समाम्नात्सर्वत्रानिमित्ते[3]। नक्षत्रवचनात्पुनर्वस्वोः।

७. अयं वा कालः। या आषाढ्या उत्तरा अनन्तरेत्यर्थः।

---

[1] AC॰ ह्वाग्न्युत्सर्गः। [2] A एवाप्रक॰। [3] A निमित्ते।

तदेन तस्मिन्काले पूर्वपक्षे पुनर्वसुभ्यां संपद्यते यैवैषाषाढ्या उपरिष्टादमावास्या भवति तस्यां पुनरादधीतेति (कौ० ब्रा० २.३) श्रुतेः।

८. मध्यन्दिनो मध्याह्नः। मध्यन्दिनस्य कालः अन्यैः सह समुच्चीयते चशब्दात् कालवचनाच्च स्वतन्त्रो ऽपि।

९. पञ्चकपालः पुरोळाशो भवतीति श्रुतेः। श्रुत्यनुकरणं तदुक्तयाज्यानुवाक्याव्यवस्थार्थं च। चशब्दादन्यत्राप्यस्मिन्पदपङ्क्तयः।

१०. पञ्चकपाल एव चशब्दात्।

११. त्रिषु मध्यमेषु वक्ष्यमाणेषु। चशब्दान्नराशंसे समुच्चीयमाने श्रुत्यन्तर उभयोः प्रयोगदर्शनात्। अग्निशब्दान्न वेतु व्यन्त्विति शब्दौ विकृतौ नाभ्यधिकौ। एतस्माच्च नियमादग्नीन्यजेत्यपि संप्रैषे ऽन्यत्रानूहः।

१२. तनूनपादग्न ऽग्निमिति प्रयोगो मा भूदिति वचनम्। तनूनपादिति प्रदर्शनार्थमतो नराशंसयाजिनो नराशंसो ऽग्निमिति भवति। कुतः। विभक्तिभिः प्रयाजानुयाजान्यजतीति (कौ० ब्रा० २.४) विशेषश्रुतेः।

१३. वार्त्रघ्नस्त्वेव स्थित इति श्रुतिवचनात्।

१४. पूर्व आज्यभाग इति वर्तते; अग्निं स्तोमेन बोधयेति वाग्नये बुधिमते पूर्वं कुर्यादिति हैक आहुरिति (कौ० ब्रा० २.४) श्रुतेः।

१५. अग्न आयूंषि पवस इत्युत्तरस्य पुरोनुवाक्येति श्रुतेः। अथ यद्यग्नये पवमानाय भियेरन्नग्नये पवमानायानुब्रूहीति ब्रूयात्सो ऽस्यात्राग्न आयूंषि पवस इत्यादि (२.२.३.२२) शतपथश्रुतेः।

१६. उत्तर आज्यभाग इति वर्तते। इन्दुमद्गुणायाग्नयं वा।

उत्तर आज्यभाग इति शाखान्तरात्। अथ यद्यग्नय इन्दुमते निर्वपेदग्नय इन्दुमते ऽनुब्रूहीति ब्रूयात्सो ऽस्याहेतू सु श्रवाणीति (२.२.३.२३) शतपथश्रुतेः।

१७. अग्निर्मूर्धा दिवः ककुदयं वा उत्तर आज्यभागः शाखान्तरात्।

१८. यथाचोदितं तथैव यजति चतुर्थ्यन्तेन। तद्यथा। जुषाणो ऽग्निः पवमानो जुषाणो ऽग्निरिन्दुमान् इत्यादि। तथा चैव शतपथश्रुतिः। यथाचोदितवचनं नियमार्थम्। ततः सार्वकामिकस्यामचोदितत्वात्स्वदादिर्न याज्ययोः[1]।

१९. अग्ने तमद्येति पुरोनुवाक्या। एभिर्नो अर्कैरिति याज्या। अधा ह्यग्ने पुरोनुवाक्या स्विष्टकृतः। आभिष्टे अद्य याज्या। हविष इत्युक्तं व्यवहितत्वाच्चोदनाप्रकरणस्य। पदपङ्क्त्यो याज्यापुरोनुवाक्याः। व्यतिषक्ता भवन्तीति (कौ० ब्र० २.५) श्रुतेः।

२०. अनुयाजयोरयं विकारः। अग्ने स्तोमं मनामहे ऽग्ना यो मर्त्यो दुव इति श्रुतिप्रदर्शितत्वात्।

२१. यो ऽयमग्निशब्दः षट्सु स्थानेषु तं विभक्तिसंज्ञयाचक्षते याज्ञिकाः। एतासामृचां प्रतीकानि विभक्तय इति (कौ० ब्र० २.४) श्रुतेः।

२२. ता हविरन्तपक्षे ऽप्युपांशु। ता इत्यतिरेकात्। आगन्तु भवतीति हेतोरविशेषात्। चशब्द उत्तराभ्यां सह समुच्चयार्थः।

२३. चशब्दात्पूर्वस्य वृद्धिमान् यदि। आगन्तुत्वाविशेषात्।

---

[1] C. याज्यायाः।

२४. अयमु हैक उपांशु कुर्वन्ति विभक्तीरुत्तरमाज्यभागं हविरिति (कौ०ब्र०२.५) श्रुतेः ।

२५. सर्वं वा कर्म सह पूर्वाभ्यामनुयाजाभ्यामुपांशु भवति । वा सर्वैव ससामिधेनीकोपांशु भवत्या पूर्वाभ्यामनुयाजाभ्यामिति (कौ० ब्र० २.५) श्रुतेः ।

२६. अयं वा पक्षः । हविरन्तमुपांशु भवति । श्रुत्यन्तरात् ।

२७. केवलमुपांशु भवति । शाखान्तरादेव ।

२८. संव्यायः पटः प्रावारो वा । स कीदृशः । जरन् जीर्णत्वाच्च पुनरुत्स्यूतः । सूच्या वा[1] संहतः[2] । कद्रूयः चिक्कृलः संस्कृतोऽपि कुयन्त्रः । अनड्वान् बलीवर्दः तृतीयः । हिरण्यं वा तृतीयमेषा दक्षिणा ।

२९. द्वितीयेति सिद्धे सति वचनं पुनराधेयसोमे ऽन्वायातनप्रतिषेधार्थम् ।

३०. आमावास्यावाज्यभागौ । शिष्टं प्राकृतं तन्त्रम् ।

३१. वाशब्दो विकल्पार्थः । अमावास्याविकार इति वर्तते ।

३२. स त्वं.नो अग्ने ऽवमो भवोतीति पुरोनुवाक्या । त्वं नो अग्ने वरुणस्य विद्वान् याज्या । इतिकरणादस्यां संस्थितायामग्निहोत्रहोमो न तु पञ्चकपालेष्ट्यां । कुतः संदेहः । श्रुताविदं त्वेव प्रत्यक्षं पुनराधेयस्य रूपमित्युपक्रम्य तस्यां संस्थितायां यजमानो ऽग्निहोत्रं जुहोति संस्थिते त्वग्न्याधेये ऽग्निहोत्रं हूयत इति संदेहः स्यात् । अथ याज्ञिकमीमांसकानां विप्रतिपत्तिर्दक्षिणायाम् । उभ-

---

[1] C नया वा संहतः in marg सूच्या ।   [2] A B संहितः ।

योर्दक्षिणा ददाति या अग्न्याधेये श्रुता याश्च पुनराधेये ताः समुच्चिताः पुनराधेये दीयन्त इति याज्ञिकाः। तथा च कात्यायनः। अग्न्याधेयिकीश्चैकश्रुतेरित्याह (४.११.१२)। मीमांसकास्तु वदन्ति। नाकृताधानः पुनराधेयाधिकारी। तेनाधाने दक्षिणा याश्चोदितास्ता दत्ताः पुनराधेये च पौनराधेयिकीर्ददाति। स एवमुभयीर्ददाति। अत्र निर्णयः। अन्यस्याः शाखाया उपलभ्य कात्यायनेनोक्तम्। अन्यशाखान्तरीयं मीमांसकैर्विचारितम्। द्वादशरात्रं स्वयंहोमी स्यादित्यादि समानमाधानेन। तथा च कात्यायनः। अग्न्याधेयवदन्यदित्याह (४.११.१४.)।

६.

१. अग्निहोत्रमिति वक्ष्यमाणस्य दर्विहोमकर्मणो नामधेयम्। तदाहिताग्निर्यावज्जीवं सायंप्रातरभ्यस्तं कुर्यात्। यावज्जीवमग्निहोत्रं जुहोतीति शाखान्तरश्रुतेः। इहापि सायं च प्रातश्चेति द्विश्चकारकरणादयमेवार्थः प्रतीयते। जुहोतिग्रहणं जुहोतिधर्मप्रापणार्थम्। जुहोतिरासेचनाधिक उपविष्टहोमः स्वाहाकारप्रदानः। सायमारम्भश्चायं प्रातरपवर्गः। तथा हि संप्रदर्शनाच्छतपथे। तस्येतिकर्तव्यतोच्यते।

२. अस्तमयसंनिधौ हि प्रायेण छायाः संसृज्यन्ते। तस्मात्कालात्पुरा गार्हपत्यादग्नेराहवनीयं पृथक्करोति।

३. प्रातस्तनं होमं कर्तुमुद्यतः प्रभात्यां रात्र्यां गार्हपत्यादाहवनीयमुद्धरेत्।

४. प्रादुःशब्दः प्रकाशनवचनः। प्रकाशीकरणं कुर्युः सर्वेषामग्नीनां नित्यधृतो यजमानाः। अस्मिन्नेवोद्धरणकाले। नित्यधृत इति बहुवचनं सर्वप्रकारार्थं ततश्च सोमे ऽप्यस्मिन्नेव काले ऽग्नीनां प्रकाशनम्। तथा च चरकाणां। दीक्षित वाचं यच्छ। पत्नि वाचं यच्छ। आग्नीध्राग्नीन्प्रज्वालयेति प्रैषः।

५. गतश्रियः प्राप्तश्रियो वक्ष्यमाणाः। शुश्रुवान्ब्राह्मणः श्रुतसंपन्नः। ग्रामणीर्ग्रामस्वामी। राजन्यश्च राजनि साधुः। क्षत्रियो वा। एते नित्यधृतो भवन्ति।

६. उद्धरणमन्त्रो ऽयं लिङ्गात्।

७. अनेन मन्त्रेण भूमौ अग्निं स्थापयेत्। मन्त्रलिङ्गात्। प्राञ्चं प्रणयेत्। तस्मात्प्राञ्चमग्निं प्रणयतीति दर्शनात्। वैश्यकुलाद्वित्तवतो वा (आश्व० श्रौ० २.२.१) भ्राष्ट्राद्वा तूष्णीं गार्हपत्याद्वितीये दक्षिणतो दक्षिणाग्निं स्थापयेत्। शाखान्तरश्रवणात्। अस्माकं तु समानयोनिकावाहवनीयदक्षिणाग्नी। अरणियोनिर्गार्हपत्यः। तस्मादितरौ। अथ यदरण्योरग्नीन्समारोहयत इति लिङ्गदर्शनात्।

८. अह्ना यदेन इत्यत्र रात्र्या यदेन इति विकारः। प्रातर्होमार्थ उद्धरणे।

९. प्रदक्षिणमग्नेः समन्तात्पाणिना सोदकेन त्रिः प्रमार्ष्टि तत्समूहनमित्याचक्षत इति गृह्योक्तेन विधानेन परिसमुह्य होष्यन् होमं करिष्यन्नित्यर्थः। अतो न हुत्वा परिसमूहनं पर्युक्षणवत्। होमक्रमेणैव परिसमूहनपर्युक्षणे होष्यन्निति वचनात्।

१० ऋतं त्वा सत्येन इत्येवमादिना मन्त्रेण त्रिस्त्रिर्वीप्सांनि-

र्दैशाखान्तरावृत्तिः। एकैकमग्निं पर्युक्ष्य धारां नयेदिति वाक्यपरिसमाप्तिः। कृत्वा चैवमेव पर्युक्षणं। लाघवार्थमित्येवोक्तम्।

११. प्रातर्होमे सत्यं त्वर्तेन परिषिञ्चामीति पर्युक्षणम्।

१२. यज्ञस्य संततिरसीत्येवमादिना मन्त्रेण गार्हपत्यादारभ्याविच्छिन्नामुदकधारां आहवनीयात् अभिप्राप्याहवनीयं धारां नयेत्। एवमेव शाखान्तरश्रवणात्।

१३. होमकाल एवैतत्प्रायश्चित्तं प्रकरणात्। यदि प्राग्धारादानादग्नीनामन्तरा श्वापदो यायात् ततस्तन्तुं तन्वन् रजसो भानुमन्विहीत्येवमादिना मन्त्रेण धारां दद्यात्। त्रयो ह वाव पशवोऽमेध्या दुर्वराह एडकः श्वेति शतपथे (१२.४.१.४) विशेषश्रवणादेतेष्वेवान्तरा गच्छत्सु प्रायश्चित्तम्।

७.

१. प्रथमास्तमिते ऽस्तमितमात्रे इत्यर्थः। सायमस्तमिते पुरा तमसस्तस्मिन्काले जुहुयादिति (कौ° ब्र° २.९) श्रुतेः।

२. वाशब्दो विकल्पार्थः। ग्रहवर्जमेकदिनक्षत्रोद्भेदकाले जुहुयात्। एवमपि शाखान्तरात्।

३. प्रातस्तमो होमकालः। उपोदयमुदयसमीपे विगतायामुषसि। प्रातः पुरोदयादपहते तमसि तस्मिन्काले जुहुयादिति (कौ°ब्र°२.९) श्रुतेः।

४. वाशब्दो विकल्पार्थः। प्रथम इति वर्तते। प्रथमोदित आदित्ये जुहुयादेवमपि शाखान्तरे श्रुतत्वात्।

५. पुरस्ताद्यो ऽभिहितः कालः प्रथमास्तमिते प्रातरुपोदयं व्युषिते तत्रैव मनः कुर्यात्। इतरौ तु कालौ पश्चादभिहितौ। दृश्यमाने वा नक्षत्रे उदिते वेति तौ मनस्यपि नारोपयेत्। ननु प्रतिषिद्धयोः किमर्थमुपदेशः। ज्ञापनार्थः। यत्र स्वश्रुतिरस्ति तत्र शाखान्तरं विद्यमानमपि नादर्तव्यम्। तुशब्दो नियमार्थः। ततः कौण्डपायिनामयने ऽप्ययमेव कालः। अपरे त्वादिविकल्पार्थमेतत्सूत्रं व्याचक्षते।

६. अत एव प्रथमास्तमितानुदितयोर्होतव्यं येन तस्यापराधे प्रायश्चित्तं श्रुत्यन्तरे पठ्यते। इतरथा हि उदिते ऽपि विधानादपराधाभावात्प्रायश्चित्तविधानमनर्थकं स्यात्। आदिसंकल्पितस्येति व्याख्यान्तरम्।

७. यदि संस्कृतं हविरादित्यो ऽभ्युदियात्ततस्तदाहवनीयहोमार्थमुन्नीयानुच्छ्वसंस्तावदासीत यावत्तमनमुच्छ्वासाभिकाङ्क्षा। ततः समिदाधानानन्तरं यथाप्राप्तमाहुतिद्वयं हुत्वा प्राग्या यज्ञस्येत्येतस्मान्नपाद्वरं दत्त्वा गौर्ब्राह्मणस्य वर इति। ततो भूरिति पूर्वस्या आहुतेरनुमन्त्रणं चरकश्रुतेः। स्वयंहोमी पूर्वलिङ्गे अन्यस्मै ब्राह्मणाय वा दद्यात्। प्रोषिते ऽपि च दानमन्वाहार्यवत्। कौण्डपायनीये सत्त्वाददानम्। अहुताभ्युदित एवैतत्प्रायश्चित्तम्। नेतरत्र। तथा श्रवणात्। निवृत्ते चाहवनीये होमे ऽभ्युदये सर्वप्रायश्चित्तम्। विशेषप्रायश्चित्तावचनात्[1]। अनुद्धृताभ्यस्तमये च नैतत्। अभ्युदितमिति हविषो निर्देशात्।

---

[1] C विशेषात्। प्रायश्चित्तावचनात् B °वचन°।

८. अथवा अहुत्वैव तदभ्युदितं हविः उद्धृत्य अपनीय पूर्वमुद्धृतमाहवनीयं अन्यं प्रणीय विना मन्त्रेण। प्रणीयेति शब्दान्तरेण निर्देशात्। जुहुयादिति होममात्रोपदेशाच्च परिसमूहनादिः। होमार्थस्यैवैतत्। न साधारणस्य। विरोधात्।

९. पयो ऽग्निहोत्रीक्षीरम्। न लौकिकम्। यवागूः पाकविशेषो विरलद्रवा। सा च व्रीहियवयोरन्यतरद्रव्यका। दधि गव्यं अनग्निहोत्र्या अपि। तथैवाज्यम्। इति नित्यानि कामसंयोगं विनाग्निहोत्रहवींषि। पयसा जुहुयादेष ह वै सर्वासामोषधीनां रसो यत्पयो सर्वैरेव तद्रसैरग्नीन्प्रीणातीति (कौ० ब्रा०२.१) श्रुतेः। तदु वा आहुर्यदशनस्यैव जुहुयादिति च।

१०. दध्नो नाधिश्रयणमुदग्निरूढेषु समिधमादीप्यावज्योतनमपां प्रत्यानयनं पुनरवज्योतनं च भवति।

११. आज्ये ऽग्निहोत्रहोमार्थत्वेनादिष्टे नापः प्रत्यानयति। श्रुत्यन्तरात्। ततो ऽधिश्रयणमवज्योतनं पुनरवज्योतनं च भवति। यानि पुनर्होमद्रव्याणि शाखान्तरेषु श्रुतानि। तद्यथा। तण्डुलैर्बलकामो मांसेनाभिचरन्नोदनेनान्नाद्यकामो ऽद्भिर्वृष्टिकामः सोमेन यशस्कामस्तैलेन वर्चस्काम इति वचनानि[1]। तेषां च तत एव यथाश्रुताः संस्काराः कार्याः।

१२. अयमपरो विशेषः[2]। आज्यस्योद्वासितस्य सतः कुशतरुणे ऽग्नौत्तलक्षणे तूष्णीमाज्ये प्रत्यस्य तत्स्थयोरेव पवित्रयोरुत्क्षयेत्।

---

[1] B वचनात्। [2] C विकल्पः।

इदं धारादानं प्रायश्चित्तप्रसक्तानुप्रसक्तम्[1]। इदानीं धारादानादनन्तरं यत्कर्तव्यं तदुच्यते।

१३. अन्वाहार्यपचन इति दक्षिणाग्नेः संज्ञा। तस्मादुत्तरतः पश्चात्स्थितः प्रत्यङ्मुखो यजमानस्तिष्ठन्नृजुकायावस्थ आदित्यमुपतिष्ठते। स्तुत्या अनुकूलयति। सत्य ऋताय त्वेत्येवमादिना मन्त्रेण। सायं सायंतने होमकर्मणि। अस्तमितश्चेद्गार्हपत्यमुपतिष्ठेतेति छन्दोगानाम्। तमप्येतस्मिन्नेव देशे स्थितः अनेनैव मन्त्रेण। पूर्वाह्णे चेदुदवसानीया समाप्यते तत्र संस्थितायां सायमग्निहोत्रं जुहोतीति वचनात्। तत्रादित्योपस्थानं प्राङ्मुखः कुर्यात्। उपस्थानस्य तथा न्यायात्।

१४. प्रातर्होमे यजमान आहवनीयं समीपे स्थित्वोपतिष्ठते ऋत सत्याय त्वेत्येतेन मन्त्रेण।

१५. उत्तरेण देशेनान्वाहार्यपचनं यजमानस्य संचरः। प्रवेशनिष्क्रामौ। यजमानवचनाच्च केवलमग्निहोत्रे।

१६. दक्षिणदेशस्य पश्चादाहवनीयादवधेरासनं यजमान सर्वत्र। तस्माद्दक्षिणवेद्यन्तमधिस्पृश्यासीतेति शतपथे।

१७. दक्षिणतःपश्चाद्गार्हपत्यादित्यर्थः।

१८. वृष्टिरसीत्येवमादिना मन्त्रेणाप आचामति मन्त्रलिङ्गात्।

१९. यजमान एव चशब्दात्।

---

[1] A om. प्रायश्चित्त B °नुसक्तं A B add कथितं after °सक्तम्।

८.

१. दक्षिणतो वितानस्याग्निहोत्रीमग्निहोत्रहोमार्थां धेनुमुपसृजन्ति सवत्सां कुर्वन्ति। ये तत्र परिचारकाः। बहुवचनमविवक्षितम्। तेन द्वौ वाप्येको ऽपि वा। अग्निहोत्रीति संज्ञा व्यवहाराय।

२. उपसृष्टारो यजमान ऋत्विक् चाग्नीध्रात्। एते ऽग्निहोत्र्यग्नीनां चान्तरेण न संचरेरन्।

३. शूद्रेणाग्निहोत्रीं न दोहयेत्। न चोपसर्जयेत्। स्वयमुपसर्जनदोहनेन विरुध्यते ण्यन्तत्वात्।

४. अग्नये देवेभ्यो धुक्ष्वेत्येतत्सायं जपति। होमयिता। सायंसंयोगेन विधानाच्च मध्यन्दिने।

५. सूर्याय देवेभ्यो धुक्ष्वेतीमं मन्त्रं प्रातर्जपेत्। सा या पूर्वाहुतिस्ते देवा इत्यनया कल्पनया देवेभ्यो धुक्ष्वेति। दक्षिणाग्न्याहुत्यभिप्रायं वा।

६. अशनायापिपासे इत्यादिकं मन्त्रं सायंप्रातर्जपेत्। सायंप्रातरित्युच्यते। प्रायेणाशनायापिपासे अहन्येव पीडाकरे इति कस्यचिदाशङ्का। सा मा विज्ञायीति।

७. अग्निहोत्र्या अन्वाहार्यपचनेन वीरेणेति एवं स्त्रीवत्सायां गवि जपेत्।

८. उदीच इत्यनुच्यमाने प्राचां निहरणं स्यात्। एषा हि तस्य दिक् प्रज्ञातेति श्रुतेः। अनधिश्रयणीये ऽपि होमद्रव्ये निहरणमवद्योतनार्थम्। व्यन्तानङ्गारान्करोतीत्यविशेषश्रुतेः (कौ० ब्र० २. १)। उदग्निहृतेष्वधिश्रयणम्। उत्तरत उपाचार इति परि-

भाषितत्वात्। गार्हपत्येन वीरेणेति विकार इति नियमार्थः। तत्र कौण्डपायिनीये[१] न प्राजहितेन वीरेणेति। ननु स गार्हपत्यो ऽत इति वचनाच्छालामुखीय एव श्रयणं प्राप्नोति। नेति ब्रूमः। मांसमग्निहोत्रं जुह्वतीति नाम्ना धर्मातिदेशात्प्राजहित एव गार्हपत्यः। शालामुखीय एव च होमो[२] वचनात्। [३]तदितराहवनीयमुपकल्पते यदुत्तरवेदावग्निहोत्रं जुहुयादिति शतपथे।

९. यदधिश्रितं तद्गार्हपत्य उत्तरतो निरूढेष्वङ्गारेषु समिधमादीप्याग्नेष्ट्वा चक्षुषावेक्ष इत्यनेन मन्त्रेणावज्योतयेत्। अथ यदधिश्रित्यावज्योतयतीति श्रुतत्वात्।

१०. समाप ओषधीनां रसेनेत्यनेन मन्त्रेण स्रुवेणापः प्रत्यानीय। अथ यदपः प्रत्यानयतीति स्वश्रुतिः (२. १)। स्रुवेण मन्त्रश्च शाखान्तरात्।

११ प्रतितप्यापः तूष्णीं पुनरवज्योत्य। अथ यत्पुनरवज्योतयत्यप एव तच्छ्रपयतीति (२. १) श्रुतेः। प्रतितप्येति तूष्णीमिति शाखान्तरात्।

१२. त्रिरित्युपसादनावृत्तिः। उपसादमिति णमुल्। उपसाद्योपसाद्येत्यर्थः। उदगिति दिङ्नियमः। त्रिरुपसादमुदग्घोमीयमुद्वासयतीति (२. १) श्रुतेः।

१३. एवमुपसादयन्नुद्वासयेत्। अनुच्छिन्दन्निव हरेदिति (२. १) श्रुतेः।

१४. नमो देवेभ्य इत्यनेन मन्त्रेण गार्हपत्यस्य ये दक्षिणतो

---

१ A om. न। २ C चाचोमो। ३ C (orig) न हि तदपकल्पते।

ऽङ्गारांस्तानुपस्पृशेत्। अथोपवेषेण दक्षिणतो ऽङ्गारानुपस्पृशति नमो देवेभ्य इति श्रुतेः।

१५. सुभूताय व इति अनेन मन्त्रेण ये उदीचो ऽङ्गारांस्तान्प्रत्यूहेत्। प्रतिपादयेदित्यर्थः। तथा प्रत्यूहेद्यथा सुप्रत्यूढा भवन्ति[1]। तथा चैव श्रुतत्वात्।

१६. गार्हपत्ये संस्कारा इति तन्त्रान्तरे परिभाषितत्वात्। गार्हपत्ये स्रुवं प्रतितप्य स्रुचं चानेन क्रमेण प्रत्येकं द्विस्त्रकारकरणात्। उन्नयति स्थालीतः। स्थाल्याः स्रुवेणोद्धृत्य स्रुचि उन्नयति[2]। अशनायापिपासीयेन मन्त्रेण स्रुचा स्रुवेण वीरेणेत्येतावान्विकारः।

१७. चतुरावृत्तं वा पञ्चावृत्तं वा विकल्पः। चतुरुन्नयेच्चतुष्टयं वा इदं सर्वमस्यैव सर्वस्याप्त्यै पञ्चकृत्व उन्नयेत्पाङ्क्तो वै यज्ञो यज्ञस्यैवाप्त्या इति (२. १) श्रुतेः।

१८. उन्नीयमाने प्रतिस्रुवं मन्त्रावृत्तिः शाखान्तरात्। मन्त्रो ऽपि शाखान्तरादेव।

१९. उन्नीते सर्वस्मिंश्च प्रतिस्रुवम्। स्रुचं स्रुक्पुष्करं संस्पृशेत्। स्रुवं स्थाल्यां मुक्त्वा शाखान्तरात्।

२०. सजूर्देवेभ्य इत्यादिकं मन्त्रं सायं जपेत्। समुपस्पृशन्मन्त्रो[3]मा विज्ञायीति जपतीत्युक्तम्।

२१. प्रातरयं जपः। कौण्डपायनीये[4] मध्यन्दिने ऽपि शाखान्तराद्धोमः। तत्र तत एव यथोक्तम्।

---

[1] A सुसमाः प्र। [2] A निनयति B om. उद्। [3] A उपस्पृशंने। [4] Mss. कु॰

२२. विकार इति वाक्यशेषः। तथापि ल्यबन्तानि खण्डशो व्याख्यायन्ते। उत्तरेण गार्हपत्यमदूरे स्रुचमुपसाद्य। उन्नीयोत्तरेण गार्हपत्यमुपसादयतीति (२. २) श्रुतेः।

२३. प्रादेशप्रमाणां पालाशीं समिधमाधाय स्रुचं च दक्षिणेनैव पाणिना। अधस्तात् स्रुगुपरिष्टात्समित्। मात्रशब्दो [1]लोके तावद्दोषन्यूनातिरिक्ते दृष्टस्तथैवात्रापि ग्राह्यः।

२४. तत् स्रुक्समिधं समया समीपेन गार्हपत्यमुपरिष्टान्नयेत्। शाखान्तरात्।

२५. आहवनीयस्य पश्चादपरत उदगग्रेषु दर्भेषु दर्भमये विष्टरे स्रुचं स्थापयित्वा आहवनीये होष्यन् द्वितीयमुपसादयतीति (२. २) श्रुतत्वात्।

२६. समिधमभ्यादधाति जुहोतीत्यर्थः। अशनायापिपासे इत्येवमादिना मन्त्रेण समिधाहवनीयेन वीरेणेत्येतावान्विकारः। पालाशीं समिधमभ्यादधाति सोमो वै पलाशः सा प्रथमा सोमाहुतिः प्रादेशमात्री भवतीति च (२. २) श्रुतेः।

२७. द्व्यङ्गुलं समिधमतिक्रम्य तस्या एवमुपरि जुहोति। अग्निर्ज्योतिर्ज्योतिरित्यादिना मन्त्रेण। द्व्यङ्गुलं समिधो ऽतिहृत्यानुदृभन्निवाभिजुहोतीति (२. २) श्रुतत्वात्। तथा स वै सायं जुहोत्यग्निर्ज्योतिर्ज्योतिरग्निरिति।

---

[1] A B लोकवद्दो°।

६.

१. तथैव समिधं हुत्वा सूर्यो ज्योतिरित्यादिना मन्त्रेण प्रातर्जुहुयात्।

२. अवषट्कारास्वाहुतिषु सर्वत्र दक्षिणं जानु न्यक्कृत्य जुहुयात्। प्रक्रान्ताहुतिप्रसङ्गेन परिभाषेयम्।

३. उपसाद्य स्रुचं हुत्वा तृतीयमिति श्रुतेः। उत्तरामाहुतिं जुहोति। असंसृजन्पूर्वया सह संसर्गमकुर्वन्। तूष्णीममन्त्रिकां प्रजापतिं मनसा ध्यात्वा। बहुतरां पूर्वस्या आहुतेः। उत्तरावतीराहुतीर्जुहुयादिति (२. २) श्रुतेः।

४. [1]अतिशयेन बहु स्रुचि कुर्यात्।

५. स्रुक्पुष्करस्य बुध्नेन अङ्गारानुपस्पृश्य द्विरुदीचीं उदगक्षितां स्रुचमुत्क्षिप्योपसादयेत्। स्रुचो बुध्नेनाङ्गारानुपस्पृशति। तथा द्विरुदीचीं स्रुचमुद्यच्छतीति श्रुतत्वात्।

६. अनगप्राण इत्येवमादिना मन्त्रेण यजमानो नेतरो होता पूर्वामाहुतिं लक्षणं कृत्वा प्राणं मुञ्चति मन्त्रान्तेन।

७ आगन्नपान आत्मानमित्येवमादिना मन्त्रेणोत्तरामाहुतिमन्ववामिति। वायुमभ्यन्तरं गमयति। प्रोषितस्याप्येतौ मन्त्रौ भवतः। आहुत्यनन्तरमेव पाठात्।

८. या यज्ञस्येत्येवमादिको जप आर्त्विजः। या वै यज्ञस्य समृद्धस्याशीः सा यजमानस्य भवतीति व्यपदेशात्।

---

[1] C in marg. उत्तराहुतेर्भूयो इदं पूर्वाहुतेर्भूयिष्ठं भवति तस्मा भक्षार्थं स्रुचि शेषयेत्। पूर्वाहुत्यर्थं प्रक्षिप्ताद्द्रव्यादुत्तराहुत्यर्थं भूयो भवतीति तस्मादपि भूयो भक्षार्थं भवति। तस्यैवाहुत्यपेक्षया भूयिष्ठमित्युच्यते। यत उत्तराहुतेर्बहु पूर्वाहुतेः।

९. हुतयोराहुत्योरुत्तरत उत्तरे देशे प्रतीचीं प्रत्यगभिमुखीं स्रुचं सायंतने होमकर्मणि द्विरुपशोधयति हस्तेन। तामुत्तरतः सायमुपमार्ष्टि प्रतीचीमिति (२.२) श्रुतेः।

१०. उपमार्ष्टीति वर्तते। पुष्करस्य दक्षिणं प्रदेशं लेखान्त उपमार्ष्टि[1]।

११. कुशेषु स्रुग्धारणार्थेषु पूर्वमुपमार्जनं निलिम्पेदोषधीः प्रीणामीति ध्यायन्। यत्पूर्वमुपमार्ष्टि तत्कूर्चे निलिम्पतीति (२.२) श्रुतेः। उत्तरत उपाचार इति परिभाषणादयेषु।

१२. यदुत्तरं तदेवं प्रतिपादयेत्। सहैव तेन पाणिमुत्तानं दक्षिणेन कूर्चं निदध्यात्[2]। पितॄन्प्रीणामीति मन्त्रं मनसा ध्यायन्। प्राचीनापवीती अप उपस्पृशेत्। यद्द्वितीयं तद्दक्षिणेन कूर्चमुत्तानं पाणिं निदधाति पितॄंस्तेन प्रीणातीति (२.२) श्रुतेः।

१३. द्विः प्रदेशिन्या प्राश्येत्यारभ्य प्रागुदीचीमुद्दिशतीति सूत्रच्छेदः। तथापि तु ल्यबन्तानि खण्डश उच्यन्ते। प्रदेशिन्यङ्गुष्ठानन्तरा। तथा हुतशिष्टं द्विः प्राश्योपब्दिमच्छब्दवदित्यर्थः। अथ यद्द्विः प्रदेशिन्या प्राश्नातीति (२.२) श्रुतेः।

१४. स्रुचमुदङ् पर्यावृत्य श्रुत्यन्तरात्।

१५. तया स्रुचा प्राग्दण्डया भक्षयित्वा शाखान्तरात्।

१६. तां प्रत्यग्दण्डां पर्यस्य परिक्षिप्य।

---

[1] B लेखां तत्र उप॰ C लेखा न उप॰। [2] Paddhati कुशमूले उत्तानं पाणिं कुर्वन् पितॄन् प्रीणामीति निलिम्पत्युत्तरमुपमार्जनम्।

१७. जिह्वया नितरामास्वाद्य। अथ यत् स्रुचं निर्लेढि सर्पदेवजनांस्तेन प्रीणातीति (२.२) श्रुतेः।

१८. तामेव स्रुचं प्रक्षाल्य। अथ यत् स्रुचं मार्जयते रक्षोदेवजनांस्तेन प्रीणातीति (२.२) श्रुतेः।

१९. अनन्तरमाचम्य।

२०. प्रागुदञ्चिता अप आसिच्य तयैव स्रुचा प्रकृतत्वात्। अथ यत्प्रागुदीचीरप उत्सिञ्चतीति (२.२) श्रुतेः।

२१. तां स्रुचं प्रागुदञ्चितामुद्यमयति। अथ यत्प्रागुदीचीं स्रुचमुद्दिशतीति (२.२) श्रुतेः। स्रुचा भक्षयति स्रुचं निर्लेढीति हस्ते संपादयेत्। हस्तस्य स्रुक्संपत्तिदर्शनान्मारुतेषु। तदाहुः। कथमस्यैते पुरोनुवाक्यवन्तो याज्यवन्तो वषट्कृते स्रुचा हुता भवन्तीति। एतेषां वै सप्तपदानां मारुतानां यानि त्रीणि प्रथमानि पदानि सा त्रिपदा गायत्री पुरोनुवाक्याथ यानि चत्वार्युत्तमानि सा चतुष्पदा त्रिष्टुब्याज्येदमेव कपुच्छलमयं[1] दण्ड इति (शतपथब्रा० ९.३.१.१६) अभिनयेन[2] हस्तं दर्शयति। तस्माद्धस्तेन प्राशनं हस्तस्य[3] निर्लेहनं। शिष्टाचारश्च एवमेव।

२२. एकस्मिन् होम एकहोमः। यदुक्तं तदेकहोमे ऽपि कर्म भवति। परिसमूहनपर्युक्षणे होमप्रयुक्ताशङ्कया न प्राप्नुतः। तदाशङ्कानिवृत्त्यर्थं वचनम्। अतश्च यत्पूर्वमुक्तं यच्च वक्ष्यमाणं तत्सर्वमेकहोमे ऽपि भवति। आहवनीय एव जुहुयादिति हैके·आहुरिति (२.२) वचनात्।

---

[1] B ॰[illegible]॰। [2] A चनभिनयेन। [3] A [illegible]।

२३. ततः सर्वेषु न केवलमाहवनीये गार्हपत्यदक्षिणाग्न्योरपि। तुशब्दः स्वमतप्रकटनार्थः। सर्वेषु त्वेव जुहुयात्। पूर्णामुदकस्य स्रुचमुत्तरेण गार्हपत्यमदूरेण निधायावस्थाप्य।

१०.

१. इह पुष्टिमित्यादिभिः समन्त्रिकास्तिस्रः। एका त्वमन्त्रिका इति गार्हपत्ये।

२. पूर्णां स्रुचमिति स्रुग्ग्रहणात्स्रुवेणैता आहुतयः। तूष्णीमिति वचनादसंसृजमुत्तरतः। चतुर्थीति वचनं पुष्टिपतिर्दधातु जनयत्विति मन्त्रान्तो मा विज्ञायीति। गार्हपत्यग्रहणं यावन्तो गार्हपत्यास्तावत्सु कुण्डपायनीये होमः। समिधमाधाय होमः। आहुतिस्तत्समिधि वसतीति श्रुत्यन्तरदर्शनात्। अन्वाहार्यपचनग्रहणं गार्हपत्यवत्। तत्सवितुर्वरेण्यमित्यृक्संदेहनिरासार्थं चतुर्थीग्रहणम्।

३. भूर्भुवः स्वरित्येता महाव्याहृतयः प्रसिद्धाः। ताभिः प्रतिमन्त्रं तिस्र आहुतयः। तिस्र इति वचनाच्च पूर्वाभिः सह समुच्चयः। ब्रह्मवर्चसकामस्य फलसंबन्धेन पक्षान्तरम्।

४. अग्नये ऽन्नादायान्नपतये स्वाहेत्येषैव चतुर्थी। न तु व्याहृत्युपहिता।

५. याः स्रुचि स्थापिता आपस्तास्त्रेधा करोति। कथम्। अग्निहोत्रस्थाल्यां भागः। तथा गार्हपत्यस्य पश्चाद्भागः। अञ्जलौ च

पत्न्यास्तृतीयो भागः। यद्यप्यनालम्भुका पत्नी बह्व्यो वा पत्न्यस्तथापि त्रैधमेव। आरम्भसामर्थ्यात्।

६. अनालम्भुकायां पत्न्यामासनप्रदेशे तूष्णीमपो निक्षिपेत्। अञ्जलौ मन्त्रवचनात्। एकवचनं च विवक्षितम्। ततः पत्नीबहुत्वेऽपि एकैवाञ्जलिं[1] प्रतीक्षेत्।

७. स्रुचैवापस्त्रिषु स्थानेषु हृत्वा तां प्रतितप्य गार्हपत्ये ततो निदधाति स्थापयति।

११.

१. दक्षिणतः स्थितस्य न्यायवचनादुदङ्मुखस्य प्राङ्मुखस्य वा यथासम्भवम्।

२. उपप्रयन्तो अध्वरम्। अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः। उभा वामिन्द्राग्नी आहुवध्यै। अयं ते योनिर्ऋत्वियः। अयमिह प्रथमो धायि धातृभिः। अस्य प्रत्नामनु द्युतम्। एतासां षण्णामित्युच्यते किमर्थम्। केषां चिच्छाखिनामन्यः क्रमः। तद्व्युदासार्थं। तदेतत्समाहार्यं षडृचम्। तस्य त्रिः प्रथमां त्रिरुत्तमामिति। तस्योपवती प्रथमा प्रत्नवत्युत्तमेति। तथा स वै त्रिः प्रथमां जपति त्रिरुत्तमामिति (शतपथब्रा० २. ३. ४. १७) च। अतश्च जपित्वेति सूत्रशेषः।

३. आयुर्दा इत्येवमादिकं मन्त्रं जपित्वा ततः।

---

[1] C एकामेवा०। (sec. b) प्रयच्छेत्।

४ विश्वावसो स्वस्ति ते पारमशीय इमं मन्त्रं त्रिर्जपति।

५ सं त्वमित्यादिकं मन्त्रमुपविश्य जपेत्। अथासीनः सं त्वमग्ने सूर्यस्य वर्चसागथा इति (शतपथब्रा° २.३.४.१७)।

६. अम्भ स्थ इत्येवमादिना मन्त्रेण अग्निहोत्रीं गामभ्येति प्रकरणात्। अथ गामभ्येत्यम्भाम्भो वो भक्षीय मह स्थ महो वो भक्षीयेति शतपथश्रुतेः (२.३.४.२५)।

१२.

१. संहितासि विश्वरूप्यूर्जा माविश गौपत्येनेत्यनेन मन्त्रेण अग्निहोत्र्या ललाटमुपस्पृशेत्।

२. उप त्वाग्ने दिवेदिवे इति तृचेनाग्ने त्वं नो अन्तम इति द्वैपदेन तृचेन गार्हपत्यमुपतिष्ठत इति वाक्यशेषः। स गार्हपत्यमुपतिष्ठत उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसीति शतपथश्रुतेः (२.३.४.२८)। अथ द्विपदा अग्ने त्वं न इत्यादि।

३. इड एहीत्यादिना मन्त्रेणाग्निहोत्रीं गामभ्येति प्रकरणात्।

४. काम्या एतेत्येवमादिना मन्त्रेणाग्निहोत्रीवत्सस्य ललाटमुपस्पृशेत्।

५. सोमानं स्वरणमित्यनेन तृचेनोत्तरतः स्थितः प्राङ्मुखोऽन्वाहार्यपचनमुपतिष्ठते। अथान्तरेणाहवनीयं च गार्हपत्यं च प्राङ् तिष्ठन्नग्निमीक्षमाणो जपतीति शतपथश्रुतेः।

६. अन्तरेण गार्हपत्याहवनीयौ स्थितो मयि श्रीणामयो ऽस्त्विति सूक्तं जपित्वा तत आहवनीयमुपतिष्ठते।

७. तत्सवितुर्वरेण्यमित्यस्याः श्रुतिः। अथ सावित्री। कदा चन स्तरीरसीति वालखिल्यासु। अस्याः श्रुतिः। अथैन्द्री। परि ते दूडभो रथः। अस्याः श्रुतिः। अथाग्नेयी। तथा त्रिरेतां जपतीति शतपथश्रुतयः[1]। एवं यजमानेनाहवनीयोपस्थाने कृते ऽनन्तरमार्त्विज्यम्।

८. सर्वेषु त्वेव जुहुयादिति स्वश्रुतौ (कौ॰ ब्रा॰ २. ३) प्रयत्नादयमेव पक्षः सूत्रकारस्याभीष्ट इति ज्ञापनार्थस्तुशब्दः। महाव्याहृतिभिस्तिसृभिर्मन्त्रैः प्रत्येकम्। तिस्रस्तिस्रः समिधो ऽभ्यादधाति यो जुह्वद्भवति। यजमानो ऽन्यो वा। यः पुनरेकहावी एकहवनसाधुकारी स आहवनीय एवाभ्यादध्यात्। यजमानो ऽन्यो वा।

९. वाचं विसृजत इति सूत्रान्तः। याजमानमेतन्मन्त्रार्थसामर्थ्यात्। दैवस्तन्तुरसीत्यादिना मन्त्रेण आहवनीयस्य दक्षिणतो ऽङ्गारमुपस्पृशेत्[2]।

१०. ततो ऽपि तन्तुरसीत्येवमादिना मन्त्रेण सुवीर्येणेत्येवमन्तेन आहवनीय एव प्रार्थ्यते॰। मानुष इत्यारभ्य पुत्रग्रहणान्तो[3] मन्त्रः। यावत्पुत्रमावर्तते पक्षे। आमन्त्रितान्तेनाभिव्याहरणमसावित्यस्य स्थाने पुत्रनामग्रहणम्। वाक्यार्थसामर्थ्यात्। जन्मना

---

[1] शतपथब्रा॰ १. ६. ४ १०. Kāt Śr. S. IV. 12, 10 (Comm.) Kāt. Paddh. pag. 396, 19. Śāṅkh. Paddh. fol. 20 तत्सवितुर्वरेण्यं कदा चन स्तरीरसि परि ते दूडभ इति त्रिः त्रिभिराहवनीयमुपस्थाय। [2] B ॰शम्। [3] A नामग्रह॰।

ज्यैष्ठ्यम्। सुब्रह्मण्यादर्शनात्। दीक्षितस्यापि नामग्रहणमविशेषश्रुतेः। जीवतां नामग्रहणं भवतीति वचनात्।

११. आत्मनो गृह्णीयादविद्यमानपुत्रः वचनसामर्थ्यात्। अपुत्र इति वक्तव्ये ऽजातग्रहणं पुंस्त्वविज्ञानार्थम्। पुत्राधिकारे पुनःपुत्रग्रहणाच्च क्षेत्रजादीनां। न दुहितुः। न शूद्रस्य। त्रयाणां वर्णानामित्यधिकारात्।

१२. सत्येनावभृथमित्यनेन मन्त्रेणाचम्य यजमानो वाचं विसृजते। अथ यदप आचम्य व्रतं विसृजते ऽप्स्वेव तद्व्रतं दधाति। ता अस्य व्रतं गोपायन्त्या पुनर्होमादिति (कौ० ब्र० २. ४) श्रुतेः।

१३.

१. पूर्वमसंयुज्य विहितत्वान्मध्यन्दिने ऽपि भवति कुण्डपायनीये। अनुपस्थानं वा प्रातरिति (२. ११. ९) प्रतिषेधो ऽथग्रह्वादिशेषाधिकारादस्यैव भवति। न तु यत्पूर्वमुक्तमृत सत्याय त्वेति।

२. याजमानमधिकृतं। भूर्भुवः स्वरित्येवमादिना मन्त्रेणाहवनीयमुपतिष्ठते।

३. दक्षिणतःपश्चादाहवनीयादासनमित्युक्तं। तत्रोर्ध्व आहवनीयोपस्थानं कृत्वा तस्मिन्नेव देशे स्थित इतरावग्नी उपतिष्ठते। अन्याय्यमप्येतच्छाखान्तरीयाद्वचनात्कर्तव्यम्। एकदीक्षे चोपस्थानमिति (५. ४. २)। तत्राप्येवमेवेच्छन्ति।

४. अभयं त इत्येवमादिना मन्त्रेण गार्हपत्यमुपतिष्ठते।

५. अभयं न इत्येवमादिना मन्त्रेणान्वाहार्यपचनमुपतिष्ठते। अन्वाहार्यपचनो दक्षिणाग्निः।

६. उपतिष्ठत इति वाक्यशेषः। तन्त्रेणोपस्थानम्। बहुवचनात्। तत्रैव स्थितः। तुल्यत्वाद्देशस्य।

७. समानं तूष्णीं सायंतनेन यच्चार्त्विज्यं यच्च याजमानम्। महाव्याहृतिभिस्तिस्रस्तिस्रः समिधो ऽभ्यादधातीत्यत आरभ्य यावद्व्रतं विसृजत इति। किमन्यदास्ते येनैवमाह। एतत् ज्ञापयति। सायमपि व्रतविसर्जनादनन्तरं पर्युक्षणं भवति यजमानस्य। इतरस्य समिदाधानात्।

८. अनेन अथ प्रातरित्यादिना (२. १३. १) पक्षे सायमपि याजमानं भवति। पक्षे सायं वात्सप्रेण। एवकारकरणाद्यस्मिन्नपि पक्षे प्रातरनुपस्थानं तस्मिन्नपि पक्षे प्रातस्तनं याजमानं वात्सप्रेण सह सायंहोमे विकल्प्यत एव। किं च कारणम्। न स्यात्। संनियोगशिष्टस्यान्यतरापाये इतरस्याप्यपाय इति न्यायात्।

९. एतस्मिन्नपि पक्षे समानं समित्प्रभृतीति समानवचनाद्भवत्येव।

१४.

१. याजमानप्रसङ्गेन प्रवासप्रारम्भे याजमानमुच्यते। प्रवत्स्यन्नग्नीन्विहृत्याप्रसक्तान्[1] गार्हपत्यस्य पश्चात्प्राङ्मुखःस्थितः सर्वानीक्षते। अभयं वो ऽभयं नो अस्त्वित्यनेन मन्त्रेण। एतावानेव मन्त्रः। न

---

[1] A °हृत्य। प्रज्वाल्याग्ना° C (in marg) ज्वलिता B seems to read like C.

कामेन व उपतिष्ठ इत्याद्यनुषङ्गः[1]। तच्चोपस्थानमिच्छेषणमिति विशेषात्।

२. नर्येत्येवमादिना मन्त्रेण गार्हपत्यमुपतिष्ठते। कुत एतत्। उपतिष्ठत इति श्रुतेः। अथ यत्प्रवत्स्यंश्च प्रोषिवांश्चाग्नीनुपतिष्ठत इति विशेषात्। शतपथे च। स गार्हपत्यमुपतिष्ठते नर्य प्रजां मे पाहीति।

३. अथर्येत्येवमादिना मन्त्रेणान्वाहार्यपचनमुपतिष्ठते। उत्तरेण स्थितः। तमिति यस्मादागत्याप्येवमेव। अर्थाद्दक्षिणेक्षमाणः[2]।

४. शंस्येत्येवमादिना मन्त्रेणाहवनीयमुपतिष्ठते। दक्षिणाग्निमुत्तरेण गत्वा। ननु चायमेव संचरः सर्वदा प्राप्तः। उच्यते। व्यवेतो ऽग्नीन्प्रवसतीत्यविशेषात्कदा चिदितरयोरप्युत्तरेण[3] यायात्। तन्निवृत्त्यर्थं वचनम्।

५. अन्नमेतावता मन्त्रेण त्रीणि पदान्यभ्युद्धृत्य। त्रिः पादविहरणं समन्त्रकं कृत्वेत्यर्थो वीप्सोपदेशात्।

६. प्रज्वलितानामुपस्थानम्। यावत्प्रज्वलितास्तावदागमनमित्येतदुभयमनेन सूत्रेणोक्तम्।

७. अग्निशब्देनाग्निहोत्रहोमो लक्ष्यते। उपस्थानशब्देन च याजमानम्। अतश्चैतदुक्तं भवति। अग्निहोत्रहोमीययाजमानस्यानर्थलुप्तं संभवदर्थं प्रवसन् जपेद्यजमानः। अत्र श्लोकः।

---

[1] [illegible] m उपतिष्ठ; A C om. चादि। [2] Paddhati अथर्ये पितुं म इत्यादिना [illegible] न्म। तमन्वाहार्यपचनमुत्तरेण गत्वा शंस्य पद्मम इत्यादिना। [3] C अन्वाहार्यपचन [illegible] (orig.) अन्तरेण।

याजमानं जपेत्सर्वं न लम्भ स्थ न संहिता[१]।
नेदं न काम्यातो देवः प्रोषितो यद्यनातुरः॥

८. याजमानग्रहणं क्रत्वर्थाक्रत्वर्थयोरनुष्ठानार्थम्। तत्र क्रत्वर्थं प्रातिनिधिकः कुर्यात्पुरुषार्थं यजमानः। चशब्दो ऽनर्थलुप्तमित्यस्यानुकर्षणार्थः। अन्वाधानपिण्डपितृयज्ञौ तु प्रातिनिधिकः कुर्यात्। मन्त्रत्वेन यजमानस्य पाठव्यवधानात्। पर्वणीति वचनात्। येष्वेव संवत्सरसन्धिषु नित्यानि यजमानेन प्रत्यक्षेणोपक्रान्तानि तेष्वेव प्रोषितो याजमानं कुर्यात्। तद्यथा। पक्षसन्ध्योर्दर्शपूर्णमासौ। ऋतुमुखेषु चातुर्मास्यानि। अयनाद्यन्तयोर्निरूढपशुबन्धः। तथा च मनुः।

अग्निहोत्रं च जुहुयादाद्यन्ते द्युनिशोः सदा।
दर्शेन चार्धमासान्ते पौर्णमासेन चैव हि॥ (४. १५)
सस्यान्ते नवसस्येष्ट्या तथर्त्वन्ते द्विजो ऽध्वरैः।
पशुना त्वयनान्ते च समान्ते सौमिकैर्मखैः॥ (४. १६)

यस्य यावज्जीविकः प्रयोगः तस्य याजमानं प्रोषितो ऽपि कुर्यात्। तथैव प्रक्रमात्। कथं कुर्यात्। जपेन संपादयेत्। तदुच्यते। वृष्टिरसि पाप्मानम्। अग्ने वायो अनुपदस्यम्। मयीदमिन्द्रम्। आ प्यायतां ध्रुवा। छदसि मम इत्यादौ। सं ज्योतिषाभूमेत्युत्सृज्यते। तथा भूर्भुवः स्वः सं मेति। तथैव अग्ने व्रतपते यो नो दूरे देष्टीति च। श्लोकौ चात्र।

वृष्टिरग्ने ऽनुपदस्यं मय्याप्यायनमेव च।

---

[१] C (in marg): अम्भ स्थाम्भो वः। संहितासि। इदं नहि। काम्या एत मयि वः। देवसंस्फानसि।

जप्याः पञ्च क्रमेण प्राक् पूर्णपात्राभिमर्शनात् ॥
अग्निसंबद्धमुत्सृज्य जप्यमूर्ध्वमशेषतः ।
अग्ने व्रतपते जप्यं पाहि मां च विकल्पतः ॥

९. अनपेतमनपगतं कारणं हेतुर्याजमानस्य। तत्प्रयुक्तत्वात्कर्मणः। अतश्च प्रोषितो ऽपि ध्यानेन संपादयेत्। प्रक्रान्ते चेद्यजमान आगच्छेत्पूर्वं जपित्वा शेषं कुर्यादिति तैत्तिरीयाणाम्। नैमित्तिकमपि चामवत्यादि प्रातिनिधिकेन कारितं प्रोषितो यदि जानीयात्। ततस्तत्रापि याजमानं कुर्यात्।

१०. सन्धिवेलयोरग्निहोत्रवेलयोरित्यर्थः। द्विवचननिर्देशात्। वाशब्दो ऽग्न्युपस्थानस्यानर्थलुप्तं प्रवसन् जपेदित्यनेन सह विकल्पार्थः। एवमर्थमेवैतस्य सूत्रस्यारम्भः। पर्वणीति सिद्धे ऽपि सति। आचम्य वाग्यतो भूत्वा यावद्धोमकालः। पुनराचम्य ततो महाव्याहृतिभिर्विसर्गः।

११. अग्न्यागारस्य दर्शनगोचरे वाग्यमनं कुर्यात्। प्रोष्यायन्नुपस्थायाप्रसर्गे तेन चैवोत्सृज्यत (२.१५.७) इति वाग्यमः।

१५.

१. अभयं वो ऽभयं मो अस्त्विति उत्तरतो वितानस्य स्थितः। तथैवेति प्राप्ते चकार उपस्थानस्य प्रकारान्तरमपि चास्तीति प्रज्ञापनार्थः। तथा च शतपथे। स वै खलु तूष्णीमेवोपनिष्ठेतेति।

२. उपतिष्ठते पश्चादाहवनीयस्य प्राङ्मुखः स्थितः। मृतनष्टेष्वपि पशुषु मन्त्रो भाविनीमाशिषमङ्गीकृत्य।

३. विद्यमानानां तृणानामपचयनं उपविश्य कर्तव्यम्। तत उत्थाय समिदाधानम्। एतत्सर्वेष्वग्निषु कार्यम्। अथोपविश्य तृणान्युपलुम्पतीति वाजिश्रुतेः।

४. उपतिष्ठत इति वाक्यशेषः।

५. उपतिष्ठत इति शेषः। अभिद्युम्नादिपाठो ऽग्ने पुरीष्याथर्याग्ने गृहपते नर्येति मा विश्वायीति।

६. व्यवायं कुर्वन्प्रवसति। आहवनीयमपरेणोदङ्मुखस्तेन चैवोत्सृज्यत इति समानम्। अनुपशान्तेषु च प्रतिनिवृत्तस्य[1] त एवाग्नयो ऽग्नीन्मिति वचनात्। प्रवासार्थत्वादुद्धरणस्य। प्रवासे ऽनिवृत्ते ऽनपवृत्तकर्माणो न लौकिकाः।

७. तेनैव मार्गेण तेनैव च न्यायेन प्रतिदिशमप्युपस्थाय प्रोषित उत्सृज्यते। वाग्यमादिनियमान्मुच्यते।

१६.

१. वास्तोष्पतीयं हविः कर्तव्यम्। ध्रौव्ये प्रवासे। कुतः। प्रवत्स्यन्नित्यधिकारात्। स एव ध्रुवः प्रवासो यत्र पुनर्गृहं नागन्तव्यम्। इतरस्त्वध्रुवः यत्र प्रोष्यायन्निति भवति। तेनैतदुक्तं भवति। यायावरप्रतिपत्तौ वास्तोष्पतियागो भवति। न केवलं गृहान्निष्क्रामतः किं तर्हि अन्येष्वपि संप्रयातेषु। संप्रवृत्तेषु प्रयाणकेष्वित्यर्थः। किमेकैकमप्यहरवस्थाय यानि[2] संप्रयातानि। नेत्युच्यते। दशरात्रादूर्ध्व-

---

[1] A °त्तेषु निवृ°। [2] B °स्थाय यानि सं° C °स्थाययासं°।

सवरे अर्धे दशरात्रः[1] सर्वस्तोक इत्यर्थः । तथा च तैत्तिरीयकम् । यत्र दशरात्रमुषित्वा प्रजेत्तत्र वास्तोष्पतिं यजेदिति ।

२. अग्नयो यत्र तिष्ठन्ति तदन्तो ऽग्निष्ठम् (आप. ६.२८.७) । तस्य दक्षिणे अनडुहि युक्ते । दक्षिणो युक्तो भवति सव्यस्य योक्त्रं पर्याहृतमिति चरकाणाम् । ननु एवं सति अनोयायिनामेवैतत्कर्म । नेत्युच्यते । प्रयाणप्रयुक्तत्वात्स्कन्धवाहिनामपि भवति । उपोह्य चीवरम् । आरोप्य वित्तमित्यर्थ. । अग्निष्ठस्था[2] एवाग्नयः समाख्यानात् । वास्तोष्पते प्रति जानीह्यस्मानिति पुरोनुवाक्यामनूच्य वास्तोष्पते शग्मया संसदात इति यजति । प्राप्तस्य पुनर्वचनं परिसङ्ख्यार्थम् । परिसङ्ख्या च प्रकृतिं निवर्तयतीति । प्राकृतस्य कंप्रपद्यादेर्निवृत्तिः । सत्याशनाग्न्यन्वाधानयोरनिवृत्तिः ।

३. कृते चविष्यनावर्जितं[3] त्यजेत् । यज्ञपात्रं[4] चीवरं चेति चशब्दः । तथा च शाखान्तरम् । यायावरप्रतिपत्तौ गृहपतिरित्यागममधिकृत्य ।

न हीनमन्वावर्तयेद्रुद्राय हि तद्धीयते ।
यद्धीनमन्वाहरेत्तद्रुद्रभूतमन्वाहरेयुरिति ॥

---

[1] A अर्धे दशरात्रेः स॰ B अर्धो C अर्धद॰ Paddhati : वास्तोष्पतीयं कर्म यायावरस्य प्रतिपत्तौ भवति। न केवलं गृहाग्निष्क्रामतो यजमानस्य किं तर्हि दशरात्रादूर्ध्वं प्रवसत्सु मानुषेषु ततो ऽस्मदीयं कर्म। [2] B अग्निषु स्था A om. एव। [3] B चनवर्जि॰ C॰ ध्मनाव॰ Paddhati : कृते च समाहितं त्यजेत् । यज्ञपात्राणि मध्यमे नित्यहोमस्य शेषं चतुर्दश चतुर्गृहीतानि सकृदुन्नयते हविः एका समित्स्रुक् होमो धर्ममात्राय कल्पते । एवं सायं पत्न्ये च दक्षिणाग्नौ च जुहुयात् । [4] A अग्निपा॰।

१७.

१. समारोहयमाणो यजमानः। याजमानमेतत्। आत्मनेपदप्रयोगात्। गार्हपत्येऽग्नौ हस्तौ प्रतितप्य प्राणान् प्रतिलोमेन क्रमेण संमृशेत्। एहि मे प्राणानारोहेत्यनेन मन्त्रेण।

२. सकृत्संमर्शनं प्राणानां मन्त्रेण कृत्वा पुनः पाणी प्रतितप्य[१] तूष्णीं प्राणसंमर्शनम्। सकृदेवमेवापरम्। ततः पाणी प्रतितप्य पूर्ववन्मन्त्रेण प्राणसंमर्शनम्। पुनस्तूष्णीं पूर्ववद्द्विः। न तु प्राणगता वीप्सा मन्त्रे बहुवचनात्।

३. अयं ते योनिर्ऋत्विय इत्यनेन मन्त्रेणारणी[२] प्रतितपति। पूर्वमधरारणिं तत उत्तरारणिम्। अरण्यनुप्रहरणे तथा दृष्टत्वात्। अस्मिन्पक्षे[३] ऽरण्योरेवारोपणमतो न प्राणान्संमृशेत्।

४. पूर्ववद्व्याख्या। तच्च संमर्शनमिह प्रतितपनम्। एतावान्विशेषः।

५. उद्धृत्याहवनीयं यथा गार्हपत्यात्पाण्योररण्योर्वा। एवमाहवनीयादपि।

६. नित्यधृतादाहवनीयादन्यस्मिन्नरणिभाण्डे समारोपः। पृथगरणिष्वग्नीन्समारोहयत इति यावन्तो धार्यन्ते विज्ञायन्ते सहारणीभिस्तावतीभिर्हि संकर्षे।[४] संकर्षो हि नाम मीमांसा[५]द्वादशाध्या-

---

[१] C (in marg) पुनः। [२] A मन्त्रेण चारणी। [३] C चान्यस्मिन्। [४] A तावतीभिः सहारणीभिर्हि संकर्षो नाम। [५] C om. हि नाम ; sct. h. adds नाम।

थादूर्ध्वमस्ति। आहवनीयवचनाद्दक्षिणाग्निर्नित्यधृतो ऽपि समारोप्यते। तयोरेवारण्योः। अथ यदरण्योरग्नीन्समारोहयत इति (कौ॰ ब्रा.२.६) श्रुतेः।

७. अनस्तमिते आदित्ये यथाग्नि मन्थनं भवति। चशब्दादनुदिते च। एकयोनिसमारूढानां सहमन्थनं कृत्वाहवनीयदक्षिणाग्न्योरुद्धरणम्। आरण्यके दर्शनात्। मथित्वाग्नीन्विहृत्येति। तथैव चानयनं नित्यधृतो नित्यधृतत्वात्।

८. उपावरोहेत्येवमादिना मन्त्रेणात्मनः सकाशादरण्योरुपावरोह्य। कथम्। नासिकया प्राणमरण्योर्मन्त्रान्तेन निक्षिप्य ततो मन्थनं कुर्यात्। दुरोण इति लिङ्गाद्गृह एव स्थितस्य यः समारोपस्तत्रैवैतद्भवतीति[1] नाशङ्का कर्तव्या। भार्या यत्राग्नयो ऽपि वेति गृह्यवचनात्तदपि गृहमेव। प्रवत्स्यन्निति चात्रानुवर्तते। तेन साग्निकः प्रवत्स्यन्समारोहयमाणो ऽन्यत्रापि च[2] यत्र समारोपश्चोद्यते तत्रैवं कुर्यात्। मन्थनाधिकारे मन्थनग्रहणं लौकिके मन्थनप्रतिषेधार्थम्। कथं विद्यमाने ऽग्नौ[3] मन्थनं प्राप्नोतीति चेत्। उच्यते। लौकिके चेति लौकिके काष्ठे न संस्कृतयोररण्योरुपावरोहणमित्येवं[4] कस्य चिदाशङ्का स्यात्।

९. पक्षान्तरमेतत्। लौकिके वाग्नावुपावरोह्य तत उद्धरणं कृत्वा ततो होमः। ततः परिसमाप्ते होमे लौकिक एव[5] प्राणेष्वर-

---

[1] C om. एव। [2] B स। [3] A ins. लौकिके। [4] C om. उपावरोहणम् and has in marg उपावरोहणयोर् instead। [5] B ius. अग्निः।

ष्योर्वा समारोपयितव्यः। द्विरभ्यासो ऽध्यायपरिसमाप्तौ शिष्टाचारस्तदाचरणं चायुष्यमिति।

इति शाङ्खायनश्रौतसूत्रभाष्ये द्वितीयो ऽध्यायः समाप्तः।

शाङ्खायनकसूत्रस्य समं शिष्यहितेच्छया ।
वरदत्तसुतो भाष्यमानर्तीयो ऽकरोन्नवम्[1] ॥

---

[1] om. in B,

अथ तृतीयो ऽध्यायः।

१.

१. संस्थितायां समाप्तायां पौर्णमास्यां पौर्णमासे कर्मणि। कुतः। कालस्यासंस्थानात्। इन्द्राय विमृद्गुणाय। इष्टिग्रहणं वाक्यसाकल्यार्थं गुणस्येष्टिशब्दव्यवधानात्। केवलाय चेन्द्राय केचित्। अनुनिर्वाप्यया वै देवा इत्यारभ्य एवमेव विधानात्। ननु अन्वारम्भणीयाप्रकरण एवैतद्विधानं संबद्धतरम्। सत्यम्। नित्यत्वात्। वैलक्षण्यादिह विधानम्।

२. वृधन्वन्तावाज्यभागौ।

३. इन्द्र क्षत्रमभि वाममोजः प्रधानस्य पुरोनुवाक्या। मृगो न भीमः कुचरो गिरिष्ठा याज्या।

४. जुष्टो दमूना अतिथिर्दुरोणे पुरोनुवाक्या। अग्ने शर्ध महते सौभगाय याज्या स्विष्टकृतः।

५. अमावास्ये कर्मणि परिसमाप्ते अनन्तरमदितय इष्टिं कुर्यात्।

६. पौर्णमासावाज्यभागावित्यर्थः।

७. ये वैमृधस्य स्विष्टकृतो याज्यानुवाक्ये जुष्टो दमूना अग्ने शर्धेति ते अत्रापि भवतः। ये ते इति यत्नाद्यदि वैमृधस्य क्रिया[1]ततो ऽस्यापीत्यनेन विकल्पमुभयोः प्रदर्शयति। स चादिविकल्पः शाखान्तरात्।

---

[1] B क्रियते।

८. एते इष्टी प्रक्रम्य यावज्जीवं कर्तव्ये। दर्शपूर्णमासयोरपि यावज्जीवमेव क्रिया संस्थितायामिति वचनसामर्थ्यात्। यश्च्छाखान्तरोक्तस्य त्रिंशतं वर्षाणि दर्शपूर्णमासाभ्यां यजेत पञ्चदश दाक्षायणयाजीति कालः सिद्धो भवति।

९. अतीतायां फलेच्छायामवाप्ते वा फले प्रयोग आ अन्त्यात्परिसमापयितव्यः।

२.

१. अनागते अनुपस्थिते पर्वणि पञ्चमन्त्रौ यथोक्तम्। श्वो न द्रष्टेति यदहस्य न दृश्येतेत्यस्मिन्नाम्नाया। आमावास्ये कर्मणि प्रक्रान्ते अभ्युदिता नाम इष्टिः कर्तव्या। तस्मिन्नेवाग्न्यन्वाधान इष्टिमात्रं[1] न प्रायश्चित्तान्तरमिष्टिवचनात्। संज्ञाकरणं सहकारिसंप्रत्ययार्थम्।

२. सगुणानि त्रीणि हवींषि यथोक्तानि श्रुतौ। इतिकरणो नियमार्थः। समस्ता एव यष्टव्या.। अतश्च यद्येकस्या अपि यागे निवृत्ते ऽभ्युदयविज्ञानं स्यात् न देवतापनयः। सामस्त्याभावात्।

३. निरुप्ते हते हविर्ग्रहणे जानन्नभ्युदितं चन्द्रमसं तानेव ये गृहीतास्ताण्डुलीभूतान्विभजेत्। आध्वर्यवमपि सदेतदुच्यते[2]। आवाहने ऽपि हते ऽदेवतापनयज्ञापनार्थम्। तानेवेत्यतिरेकादसांनाय्ययाजिनो ऽपि विभागः।

४. अग्ने दा दाशुषे रयिं पुरोनुवाक्या। दा नो अग्ने बृहतो दाः सहस्रिणो याज्याग्नेर्दातुः।

---

[1] B om न। [2] C संदेव instead of सदेतद्।

५. सहस्रा ते शता वयं पुरोनुवाक्या। आ तू भर माकिरेतत्परि ष्ठात् याज्या इन्द्रस्य प्रदातुः। किमित्ते विष्णो परिचक्ष्यं भूत्पुरोनुवाक्या। वषट् ते विष्णविति याज्या। विष्णोः शिपिविष्टस्य।

६. वृधन्वन्तावाज्यभागावित्यर्थः। कर्मान्तरमेतत्। नामावास्यमतस्य सप्तदश सामिधेन्यः।

७. धेनुर्दक्षिणा। किंविशिष्टम्। चीषु। त्रिसङ्ख्याका इषवो यस्य तदेवमुच्यते। चशब्दादन्वाहार्यस्य।

८. यथाविहिते काले चामावास्यं भवति। यद्येवं नोच्येत दोषनिर्घातार्थत्वात् प्रायश्चित्तानां न स्यादामावास्यम्। चशब्दात्कृते ऽप्यामावास्ये पुनःक्रिया। कालो हि नित्यानां करणे निमित्तम्। श्लोकमप्युदाहरन्ति।

एवं हि कर्माणि कृतान्यकाले कार्याणि नित्यानि पुनः स्वकाले।
कालो हि तेषां करणे निमित्तं यतः श्रुतौ यज्ञपथादपायः।

तथा च शाखान्तरम्। अनस्तमिते चेदग्निहोत्रं जुहुयाद्ध्रुव इत्युपस्थाय पुनरस्तमिते जुहुयात्। अव्युष्टायां चेत्पुनर्व्युष्टायामिति। यानि तु विशेषवचनानि तत्र वचनसामर्थ्यात्। किमन्यत्। उच्यते। तद्यथा। उदवसानीयान्ते ऽग्निहोत्रहोमः। मुमूर्षोश्च प्रातराहुतिरामावास्यं च। तथा च।

चतुर्दश गृहीतानि सकृदवद्यते हविः।
एका समित्सकृद्धोमो ऽर्धमासाय कल्पते।

वचनान्तराण्येतानि। अतश्च यथाश्रुतस्य कालस्य स्वविषयेष्वपवादत्वेन[1] वर्तन्ते। कस्यां

---

[1] B स्वविषये ऽप्यप०।

चिदध्वर्युशाखायां अभ्युदिते पिष्टविभागः। कस्यां चित्पक्षे पुरोडाशो दधिपयोभ्यां मिश्रयित्वा। कश्चिद्विभागासंभवात् प्रायश्चित्तं समाप्य पुनःक्रिया। प्राक् चेत्कालादामावास्यं पौर्णमासं वा प्रवर्तेताग्ने नय आ देवानामिति संयाज्ये कुर्यादिति तैत्तिरीयाणाम्। असंनयतश्च विभाग इत्येवमादि शाखान्तरीयमभिप्रेत्य काले[1] चामावास्यमिति। चशब्द आचार्येणोक्तः।

९. अभ्यावृत्तिः अभ्यावर्तनं पुनःक्रियेत्यर्थः। सा पिण्डपितृयज्ञस्य नास्ति। कुत एतत्। परिगणितानामेव पदार्थानां शाखान्तरे ऽनुवादात्। यत आह। स यद्यगृहीतं हविरभ्युदियात् प्रज्ञातमेव तदेषैव व्रतचर्या यत्पूर्वेद्युर्दुग्धं दधि हविरातञ्चनं तत्कुर्वन्ति। प्रतिप्रमुञ्चन्ति वत्सांस्तान् पुनरपाकुर्वन्ति तानपराह्णे पर्णशाखयापाकरोतीति शतपथे ११.१.४.१)।

३.

१. श्वो न द्रष्टेति यदहस्त न दृश्येत ते अमावास्ये इत्येतस्मिन्नतीते पर्वणि यथामावास्यं प्रक्रान्तं भ्रान्त्या ततो ऽभ्युद्दृष्टा नामेष्टिर्भवति।

२. अग्नये पथिकृते प्रथमं हविः द्वितीयमिन्द्राय वृत्रघ्ने तृतीयमग्नये वैश्वानराय। एवमेव श्रुतत्वात्।

---

[1] B कालो।

३. वेत्था हि वेधो अध्वनः अग्नेः पथिकृतः पुरोनुवाक्या। आ देवानामपि पन्थामगन्मेति याज्या।

४. वार्त्रहत्याय शवसे इन्द्रस्य वृत्रघ्नः पुरोनुवाक्या। सहदानुं पुरुहूत क्षियन्तमिति याज्या।

५. वैश्वानरस्य पुरोनुवाक्या।

६. नाभिं यज्ञानां सदनं रयीणामिति याज्या।

७. अग्निः प्रत्नेन सोम गीर्भिरिति।

८. दण्डश्च उपानहौ च दक्षिणा। पूर्वं एवाग्निग्रहणे[1] ऽभ्युद्दृष्टा प्रायश्चित्तत्वात्। सर्वाणि चास्यामङ्गानीष्टिवचनात्।

९. अभ्युद्दृष्टायां समाप्तायां तस्मिन्नेवाहन्यामावास्यं भवति। सायंदोहो ह्यस्तनो विद्यत एव। चशब्दात्। पूर्वमपि कदाचिदामावास्यम्। तथा च शतपथे। स आमावास्येन विधिनैवेन्द्रायेष्टिमनुनिर्वपति तदहर्वैव श्वो वेति॥

१०. अतश्च कुण्डपायिनामयने सकृत्क्रिया। अमावास्यायां च श्राद्धे [2]अन्वार्ययोरप्यग्नौकरणपिण्डदानयोरनभ्यावृत्तिः एतस्मादेव यत्नात्। एकस्मिन्नहनि न श्राद्धद्वयं समानधर्मकं भवति। पिण्डदानावृत्तिप्रतिषेधादिति वृद्धसंप्रदायः।

४.

१. अग्नये किंविशिष्टाय। अग्निमते। एतदुक्तं भवति। अग्निरग्निमांश्च देवता। तस्मै इष्टिं कुर्यात्। यदि पूर्वोद्धृते ऽग्नौ

---

[1] B एवमेवाग्नि० A ०ग्निग्रह०। [2] A B न्वाय्ययोर०।

सत्यन्यो ऽग्निरभ्युद्ध्रियते । ननु क्वायं नियमो भूमावेवाग्निरुद्धर्तव्य इति । उच्यते । अग्निं पृथिव्यामिति लिङ्गात् । ननु विध्यपराधे प्रायश्चित्तमिति तस्मिन्नेव प्रकरणे एता इष्टयः कस्मान्नोच्यन्ते । धर्मभेदादिति ब्रूमः । तत्र हि कर्तृद्रव्यकालाभावे तस्यैतस्यै देवतायै पूर्णाहुतिं जुहुयात् । याज्यापुरोनुवाक्ये वा अनुद्रुत्य जुहुयात् । याज्यां वा केवलामनुद्रुत्येति पक्षत्रयं तस्मिन्प्रकरणे विहितानाम् । इह तु पक्षे यथोक्ता इष्टयः । पक्षे सर्वप्रायश्चित्तमिति । कुतः । व्यवस्थैषा श्रुतेः ।

२. अग्नये पथिकृते ऽष्टाकपालं पुरोडाशं निर्वपेदिति शतपथे । यदि विहृतानग्नीनन्तरेण शकटं यायान्नियतकालानां वा दर्शपूर्णमासादीनामतिपत्तिः स्यात् ।

३. मिथः परस्परतः संसृष्टेष्वग्निषु । अनपवृक्तकर्मसु । द्वयोरपि संसृष्टयोर्बहुवचनस्याविवक्षितत्वात् । अग्नये वीतये इष्टिः कर्तव्या ।

४. इष्टिरेवाग्नये विविचये । ग्राम्येण सह संसर्गे । लौकिकेनेत्यर्थः ।

५. अरण्ये प्रकर्षेण प्रदहन् ग्राममभ्यागतः प्रदाव्य इत्युच्यते । तेन सह संसर्गे ऽग्नये संवर्गाय इष्टिः कार्या ।

६. अग्नये शुचय इष्टिं कुर्यात् । क्रव्येण शवाग्निना संसर्गे ।

७. अग्नये ऽप्सुमत इष्टिं कुर्यात् । यदि वैद्युतेनाग्नयः संसृज्येरन् ।

८. व्याधिप्राचुर्यं स्वजनविषयम् । तस्मिन् सति रुद्राय इष्टिं

कुर्यात् । अग्नय इति नानुवर्तते । अग्नये कामायेति ज्ञापकात् ।

९. महत्यध्वन्यध्वप्रसिद्धिर्लोके[1] । तदुपक्रमे पूष्णे पथिकृत इष्टिं कुर्यात् ।

१०. सर्वकामप्रयोजना सार्वकामिकी इष्टिः । अग्नये कामाय कर्तव्या । प्रतिकामं प्रयोगो न्यायात् ।

११. अग्नये व्रतपतय इष्टिः कर्तव्या । कस्मिन्निमित्ते । व्रत्यवेलायां[2] व्रत्यमहः सकलं प्रवासेन व्याप्य[3] । अव्रत्यं वा मैथुनमांसभोजनादि चरित्वा ।

१२. अग्नये व्रतभृत इष्टिं कुर्यात् । व्रत्यवेलामिति संबध्यते । आर्त्यश्रुकरणं विशिष्टं तन्त्रान्तरे ।

१३. अग्नये क्षामवत इष्टिं कुर्यात् । गृहदाहे निमित्ते ।

१४. मरुद्भ्य इष्टिं कुर्यात् । यमौ प्रजातायाम् । शूद्रायामपि तुल्यत्वात् भवति । गृह्योक्तं कर्म । यमौ प्रजातायामिति लिङ्गसंख्ययोरविवक्षा ।[4]

५.

१. अग्निमग्निं हवीमभिरग्नेरग्निमतः पुरोनुवाक्या । अग्निनाग्निः समिध्यते याज्या । अग्नेः पथिकृतो वेत्था हि वेध आ देवानाम् ।

२. अग्न आ याहि वीतये अग्नेर्वीतेः पुरोनुवाक्या । यो अग्निं देववीतये याज्या ।

---

[1] A ॰ध्वप्रसिद्धिर्लोके B ॰ध्वन्यप्रसिद्धिर्लोके । [2] B om. [3] C (in marg) प्रोष्य । [4] The Comm. on Sūtra 14 is om in A.

३. कया नो अग्ने वि वसः सुवृक्तिं अग्नेर्विविचेः पुरोनुवाक्या। त्वामग्ने मानुषीरीळते विशः याज्या।

४. कुवित्सु नो गविष्टये अग्नेः संवर्गस्य पुरोनुवाक्या। मा नो अस्मिन्महाधने परा वर्ग्भारभृदिति याज्या। अग्निः शुचिव्रततमः उदग्नेः शुचयः इत्यग्नेः शुचेः।

५. अप्स्वग्ने सधिष्टव अग्नेरप्सुमतः पुरोनुवाक्या। उरौ महाँ अनिबाधे ववर्ध याज्या।

६. कद्रुद्राय प्रचेतसे रुद्रस्य पुरोनुवाक्या। अश्याम ते सुमतिं देवयज्यया याज्या।

७. वयमु त्वा पथस्पते पूष्णः पथिकृतः पुरोनुवाक्या। पथस्पथः परिपतिं वचस्या याज्या।

८. अग्निः परेषु धामस्वित्येवमादिका राजत्यस्याग्नेः कामस्य पुरोनुवाक्या। अश्याम तं काममग्ने तवोती याज्या। त्वमग्ने व्रतपा यज्ञो वयमग्नेर्व्रतपतेः।

९. अग्नेर्व्रतभृतः पुरोनुवाक्या।

१० याज्या।

११. कृष्णा रजांसि पत्सुतः अग्नेः क्षामवतः पुरोनुवाक्या। त्वे वसूनि पुर्वणीक होतः याज्या।

१२. मरुतां पुरोनुवाक्या।

१३. वातत्विषो मरुतस्त्वेषनिर्णिजः मरुतां याज्या। श्रिये कं वो अधि तनूषु वाशीरिति वा। अत्र व्यवस्थितविकल्पं वृद्धयाज्ञिका व्याचक्षते। द्वयोः सरूपयोर्जनने वातत्विषः। असरूपयोर्वङ्ग-

जनने वा[1] श्रिये कं वः। उक्तानां चतुर्दशानामिष्टीनां सप्तदश सामिधेन्यः पौर्णमासावाज्यभागौ नित्यः स्विष्टकृत्।

६.

१. ज्ञातयः सपिण्डाः सनाभयो ऽपि वा। असंविदानाः कार्येषु भिन्नमतयः संमतिं कृत्वा। बहुदेवतासंज्ञकामिष्टिमेकां निर्वपेरन्। यजेरन्नित्यर्थः। संन्युप्याग्नीनाहिताग्नयः। अनाहिताग्नयस्त्वितरानुपासते। द्वयोस्त्वापीष्टिरुपपातात्। आश्वलायनके उच्यते। संज्ञान्यामग्निर्वसुमान्सोमो रुद्रवानिन्द्रो मरुत्वान्वरुण आदित्यवानिति। तथैवास्माकमपि। मन्त्रलिङ्गात्। अग्निहोत्रायणिनः पूर्णाहुतिरर्थलोपे प्रतिनिधिरिति वचनात्। यदि ज्ञातीनां केचिद्दर्शपूर्णमासयाजिनः केचिदग्निहोत्रायणिनस्ततः सर्वेषां पूर्णाहुतिरविरोधात्[2]

२. पुरोनुवाक्या।

३. याज्या। एकं प्रदानमेकत्वाद्याज्यानुवाक्यायुगलस्य। आवहस्वाहाप्रयाटजोषणशब्दाः[3] सकृत्प्रदानवत्। प्रदानं च। मुख्यया वृत्त्या यज्ञशब्दः। यज्ञाभिप्रायेण चावहस्वाहादयः। कुत एतत्। शतपथश्रुतेः। तमुत्तमे प्रयाजे स्वाहाकारेणैव सर्वं यज्ञं समस्थापयन्निति। एकप्रदानानामेकेनैव कृतार्थत्वात्सकृदावाहनशब्दः। ननु च किं कारणमग्निं वसुमन्तं सोमं रुद्रवन्तमिन्द्रं मरुत्वन्तं वरुणमादित्यवन्तमावहेत्येवं भवति न[4] भिन्नविभक्तिका देवता उच्चार्यन्ते। उच्यते। होता यक्षदश्विना सरस्वतीमिन्द्रं सुत्रामाणमिति दर्श-

---

[1] A om. वा। [2] A० शेषात्। [3] C शब्दात्। [4] B C (orig) om. न।

नात्। सूत्रकारेण च होता यक्षदश्विना सरस्वतीमिन्द्रं सुत्रामाणमिति प्रैष इत्येतस्यैवार्थस्य द्योतनार्थं गुरुर्निर्देशः कृतः ।

४. संज्ञानमुशना वददित्येतत्सूक्तं जपेरन्। ज्ञातय एव नर्त्विक्शब्दात्। सूक्तं जपेरन्। लिङ्गेन परिभाषायां बाधितत्वात्। प्राक् स्विष्टकृतो जपेरन् प्रधानसंनिधानात् ।

७.

१. विधिं वक्ष्याम इति वाक्यशेषः । मित्रकामस्य भवत्यन्वर्थसंज्ञाकरणात् ।

२. शाखान्तरश्रुतेः ।

३. अग्निना रयिमश्नवत् आग्नेयः । गयस्फानो अमीवहेति सौम्यः ।

४. पुरोनुवाक्या ।

५. याज्या ।

६. नू नो रास्व सहस्रवत्स्विष्टकृतः पुरोनुवाक्या। उत नो ब्रह्मन्नविषः याज्या ।

७. गवां न्यायसिद्धेः ।

८. एकप्रदानत्वाद्बहुदेवतावन्निगमाः । पुरोनुवाक्यायां यः क्रमो देवतापदानां तेन क्रमेणावाहनादिषु देवताप्रकाशनम् । तद्यथा अग्निं सोमं वरुणं मित्रमिन्द्रं बृहस्पतिं सवितारं पूषणं सरस्वतीं त्वष्टारमावहेति । यः सहस्री गोभिरवसा रूपाणि समनक्तु यज्ञैरिति[1] निगमेषु देवताग्रहणात् ।

---

[1] A B ins. स।

९. येयजामहानन्तरं य आदेशस्तत्र देवतानुपूर्व्यं याज्यावत्कुर्यात्। तद्यथा। ये यजामहे त्वष्टारं सरस्वतीं पूषणं सवितारं बृहस्पतिमिन्द्रं मित्रं वरुणं सोमं अग्निम्।

१०. देवतादेशन एवायं विकल्पः श्रुत्यन्तरात्।

८.

१. फाल्गुने मासे भवा फाल्गुनी पौर्णमासी। ननु फाल्गुनीयेति प्राप्नोति वृद्धाच्छ (पा० ४.२.११४) इति। नैष दोषः। संज्ञापूर्वको विधिरनित्य इति। प्रयोगः प्रारम्भः। न सकृत्करणम्। अदौच्छितायनानां सर्वेषां[1] षण्णामेव।

२. फाल्गुनमास एव या अमावास्या। न तु वर्षासु[2] फाल्गुनीभिर्युक्ता। कुतः। मुखं वा एतत्संवत्सरस्येति (कौ० ब्र० ५.१) प्रकरणात्।

३. इयन्तं कालं दाक्षायणसंज्ञकस्यानुष्ठानम्।

४. सर्वेषामदौच्छितायनानां संवत्सरंसंवत्सरं वा क्रिया। यावज्जीवं वा। दर्शपूर्णमासायनत्वात्। काम्यत्वे संवत्सरमेव[3]।

५. अदौच्छितायनानि काम्यान्यपि प्रयुञ्जानस्य दर्शपूर्णमासौ न वर्तेते। न क्रियेते इत्यर्थः। नित्ययोः प्रतिषेधः। कौण्डपायनीयौ तु भवत एव।

६. विधिं वक्ष्याम इति वाक्यशेषः।

---

[1] B ins स। [2] B ins या after वर्षासु। [3] A काम्याच B काम्यत्वे C काम्याच।

७. पौर्णमास्यां भवानि पौर्णमासानि हवींषि। आग्नेयः पुरोळाशः अग्नीषोमीय उपांशुयाजः अग्नीषोमीयः पुरोळाशः। एतानि पूर्वस्यां पौर्णमास्यां भवन्ति।

८. पुरोळाशः। केवल एव वाग्नीषोमीयः पूर्वेद्युर्भवति।

९. उत्तरस्यां पौर्णमास्यां आग्नेयः पुरोळाशः। ऐन्द्रं च सांनाय्यं भवति। ऐन्द्रं चेत्येवं नपुंसकनिर्देशात्। सांनाय्ये सिद्धे सांनाय्यवचनममावास्याविकारार्थम्। पौर्णमास्यामित्यतिरेकः[1] पिण्डपितृयज्ञनिवृत्त्यर्थः।

१०. अपरपक्षं कृष्णपक्षं सकलं[2] दीक्षितव्रतो भवति। तानि च दीक्षितव्रतान्याध्वर्यवादेव गमयितव्यानि। यथा वपाश्रपण्यौ शूलगवे। अग्निहोत्रहोमो न प्रतिषिध्यते। पुरुषसंस्कारप्रकरणात्[3]। तथा चातिथिभ्यो ददातीत्युक्तम्।

११. पूर्वं वेति विकल्पः। अपराधे व्रातपतौ व्रतग्रहणात्[4]।

१२. अभ्यञ्जनं शरीराभ्यङ्गः। तस्माद्ब्रह्मचर्यादाविकस्याप्युपभोगप्रतिषेधः। अतश्चाविके ऊर्णामये शयनप्रतिषेधोऽपि। हतमन्येन परिहितं तच्च वस्त्रं न परिधत्त इत्यर्थः। पल्पूलितं रजकधौतम्। आच्छादनार्थोऽपि वसिरनेकार्थत्वाद्धातूनामुपभोगार्थो द्रष्टव्यः।

१३. हविरुच्छिष्टमग्निहोत्रहोमावशिष्टमश्नीयात् केवलम्। दीक्षितव्रतपक्षेऽपि। क्षत्रियवैश्यावपि वचनात्। इळाभक्षवत्।

---

[1] C °ति रेका. in marg. मन्त्रः। [2] C सकल। [3] C in marg. वचनात्।
[4] A °प्रवचयोमात्।

१४. तथाश्नीयाद्यथा सुहप्तता न भवति ।

१५. सोमं राजानमित्येवमादिकं मन्त्रं मनसानुद्रुत्य तमेवार्थं ध्यायन्नश्नाति नावशेषयति ।

१६. पूर्वस्याममावास्यायामामावास्यानि हवींषि भवन्ति शाखान्तरात् ।

१७. स्वश्रुतेः । अमावास्याविकार उभयत्र ।

१८. आग्नेयो मैत्रावरुणी च पयस्या । चशब्दादाग्नेयेन समानतन्त्रा श्रुता । श्रुतावियमेवैकेति संदेहः स्यात् । अमावास्यावचनमत्र पिण्डपितृयज्ञार्थम् । अमावास्याविकारार्थं पयस्यावचनम् ।

१९. ऋतेन यावृतावृधौ पयस्यायाः पुरोनुवाक्या । उत वां विक्षु मद्यास्वन्धः याज्या ।

२०. तच्छंयोरिति शंयोर्वाकः सूक्तसंज्ञकः । तस्मात्पुरा ऊर्ध्वं वा अनन्तरमनावाह्य अनावाहिताश्वाजिनो यजति । इज्यमाना देवता निगच्छन्तीत्यङ्गभावेनापीज्यमानानां[1] निगमने प्राप्ते तदपवाद उच्यते । तथा चोक्तमनुक्रामन्तस्तस्य विकारान्व्याख्यास्याम इति ।

२१. यागक्रमः शाखान्तरेष्वन्यथापि भवति[2] । निगमस्तूत्तमे पदे प्रयाजसूक्तवाकयोः । परिसङ्ख्यार्थमेतत्सूत्रम् । अतस्तत्रान्यत्र प्रतिषेधः । आज्यपा जुषाणा इत्यस्यानुयाजार्थत्वादनन्तरं वाजिपदं सूक्तवाके च स्विष्टकृत्पदानन्तरम् । स्वशाखायामस्मिन्नेव क्रमे

---

[1] C (in marg) इत्यंभावेन instead of अङ्गभावेन । [2] B अनन्यथा ।

वाजियागात्। तत एवं प्रयोगः। स्वाहा देवा आज्यपा जुषाणा स्वाहा वाजिनो अग्न आज्यस्येति। वाजिनो अग्न इति सन्धिः। समिद्धो अग्न.इति दृष्टत्वात्। यथार्थं च सूक्तवाक इति। यदि प्राक् सूक्तवाकाद्वाजिनः प्रचारस्ततः प्रकृतिवन्नियमः। सूक्तवाके जुषिपदं कारितान्तं न भवति। देवा इति तु भवति श्रुत्यन्तरसामर्थ्यात्। ऊर्ध्वं तु सूक्तवाकाद्वाजिनप्रचरणम्।

२२. श्रुत्यन्तराद्यथापठितमेव प्रयोक्तव्यम्।

२३. शं नो भवन्तु वाजिनो हवेषु वाजिनस्य पुरोनुवाक्या। वाजेवाजे ऽवत वाजिनो न इति याज्या। ऊर्ध्वजानुरूर्ध्वज्ञुः। अनासनोपविष्ट इत्यर्थः। अनवानमनुच्छ्वस्यार्धर्चे यजति। ऊर्ध्वज्ञुरनवानमिति याज्यायामेव यजतिशब्दातिरेकात्। णमुल्निर्देशाच्चानवानाभ्यासौ पुनःपुनरावृत्तिः। यावच्छक्तितमनवानम्। तथा च षष्ठे ऽहनि श्रुतिः[1]। यद्यप्यवान्यात्पुनःपुनः प्रतीमारमुपशिचेतेव। (कौ॰ब्र॰ २३.५)।

२४. आसन उपविश्य वाजिनस्याग्ने वीहीत्यनुवषट्कारं कुर्यात्। अनुवषट्कारसंज्ञा येयजामहप्रतिषेधार्थम्। वषट्कारमनु क्रियत इत्यनुवषट्कारः। अतो न संप्रैषमपेक्षते।

२५. यजमानादयो वाजिनशेषमन्योऽन्यमुपहूय भक्षयेयुः।

२६. उभयत्र यजमानो भक्षयति। ऋत्विजां प्रथमः पश्चिमश्च।

---

[1] C सर्वां वर्षां इहति श्रुतिः instead of तथा च षष्ठे ऽहनि श्रुतिः।

२७. यन्मे रेतः प्र धावतीत्यादिर्वाजो मयि धेहीत्यन्तो वाजिनभक्षमन्त्रः ।

९.

१. विधिं वक्ष्याम इति वाक्यशेषः ।

२. आग्नेयः पुरोलाशः सरस्वत्यै चरुः । चशब्दाद्विहविरेकतन्त्रा शाखान्तरश्रुतेः । पौर्णमासीविकारो न्यायात् ।

३. अग्नीषोमीयः पुरोलाशः सह उपांशुयाजेन । अग्नीषोमीय एवोपांशुयाजः साहचर्यात् । सांनाय्यं चैन्द्रं नपुंसकनिर्देशात् सांनाय्ये सिद्धे अमावास्याविकारार्थं सांनाय्यवचनम् ।

४. अपरपक्षं दीक्षितव्रत इत्यादीनि व्रतानि । चेति सिद्धे दाक्षायणयाज्ञिकानीति वचनात् ज्ञायते अदीक्षितायनेषु पूर्वस्य प्रकृतित्वं नास्ति ।

५. द्विहविरेवेष्टिः शाखान्तरात् ।

६. ऐन्द्राग्नस्य मैत्रावरुण्या पयस्यया सहैकतन्त्रता चशब्दात् । पयस्याग्रहणममावास्याविकारार्थम् ।

७. समानं तुल्यं वाजिनं दाक्षायणयाज्ञिकेन सह । कुतः तत्रैवेतिकर्तव्यताविशिष्टस्य दृष्टत्वात् ।

१०.

१. सार्वसेनियज्ञेति वक्ष्यमाणस्य कर्मणो नामधेयं तत्र यद्वक्तव्यं तदुच्यते ।

२. उभयानि दार्शपौर्णमासिकानि। कुत एतत्। पौर्णमासानि पूर्वाणीति वचनात्। उभयानीति वचनात् उभयविध उपांशुयाज एकस्यामेवेष्टौ।

३. अव्यवहितानि वचनात्।

४. अर्वन्तस्त्वा हवामहे पुरोनुवाक्या। अस्माकमग्ने अध्वरं जुषस्व याज्या। उत्तरस्याग्नेयस्येति वचनाद्वसिष्ठयज्ञे ऽप्युत्तरस्यैव (३. ११.१.)।

५. दर्शप्रतिषेधो ऽयं श्रुत्यन्तरात्।

६. श्रुत्यन्तरवचनात्। तुशब्दाज्जौवपिष्टकशौवान्तर्हितयोस्तथैव विकल्पः।

७. शौनकयज्ञसाकंप्रस्थाय्ययोर्हौत्रं दर्शपूर्णमासान्न विक्रियते। दर्शपूर्णमासवदित्यर्थः। ततः सहानुनिर्वाप्याभ्यां कर्म। अन्येषु त्वदीक्षितायनेषु नानुनिर्वाप्ये कृत्स्नोपदेशात्। ननु सार्वसेनियज्ञो ऽनन्तरस्तदीया धर्मा अत्र कस्मान्नाशङ्क्यन्ते। उच्यते। नादीक्षितायनेषु परस्परतः प्रकृतिविकारभावो ऽस्ति। कुतः। व्रतानि च दाक्षायणयाज्ञिकानीति व्रतानि चेति सिद्धे दाक्षायणयाज्ञिकानीति इत्यादधे वचनात्। काम्ययोस्तु शौनकयज्ञसाकंप्रस्थाय्ययोः फलभेदादाध्वर्यवे च कर्मविशेषाम्नानाद्धोतुरपि विकारो ऽस्त्येव।

११.

१. सार्वसेनयज्ञे यद् व्याख्यातं तद्वसिष्ठयज्ञे ऽपि भवतीत्यर्थः। किं च तत्। उभयानि हवींष्येकस्यामिष्टौ। ननु सार्वसेनियज्ञव-

दिति कस्मान्नोक्तम्। उच्यते। अमावास्यायां प्रयोगप्रतिषेधार्थममावास्याविकारार्थं च।

२. तुशब्दाद्यथाप्राप्तानामेव प्रयोगः[1]।

३. अयं च वसिष्ठयज्ञे विशेषः।

४. इत्येतानि यान्युक्तानि दाक्षायणयज्ञप्रभृतीनि तानि दर्शपूर्णमासायनानि। ततश्च दर्शपूर्णमासतुल्यानि। यत्पुनः फलं श्रूयते गुणात्तन्न प्रधानात्। यथा दध्नेन्द्रियकाम जुहुयादिति ।.

५. चकारोऽत्राध्याहर्तव्यः। तथा च श्रुतिः। अथो यंयं काममच्छंस्तंतमेतैरयनैरापुरिति। फलसंकल्पकृतो विशेषः। संवत्सरप्रयोगस्य।

६. उभयोरपि पक्षयोः।

७. मुन्ययनमित्याचक्षत इति वाक्यच्छेदः। क्रमेण तु व्याख्या। आग्नेय आग्नावैष्णवश्च।

८. सर्वकामत्वात्। कदाचिदन्नकामस्य स्यात्तत्र सद्यन्तौ प्राप्नुतस्तौ मा भूतामिति वचनम्।

९. आग्नेयाग्नावैष्णव्या इष्ट्या। अहरहर्यजते पर्वाणि वर्जयित्वा। पर्वाणि पक्षसन्ध्ययनसंवत्सराख्यानि। तेषु यथावचनं दर्शपूर्णमासचातुर्मास्यनिरूढपशुसोमाः। ततोऽन्यत्राग्नेयाग्नावैष्णवीष्टिर्भवति। संस्थितदर्शपूर्णमासस्य सर्वपर्वस्वपि यागः। सदाग्रहणात्।

१०. केचिन्मुन्ययनमित्याचक्षते। केचिन्मुनिसत्त्रेष्टिम्। तथा च संव्यवहारो मुनिसत्त्रेष्टेति।

---

[1] C' एव योगक्रमः।

११. आग्नेयैन्द्रौ पुरोळाशौ वैश्वदेवश्चरुः।

१२. नियमार्थं वचनम्।

१३. उक्तार्थम्।

१४. प्रतिपूर्वामुचिराबन्धने। कृष्णाजिनमात्मन्यासजत इत्यर्थः। अदीक्षितः अकृतपावनः। दीक्षाप्रतिषेधादन्येषां कृष्णविषाणादीनां दीक्षारूपाणां प्राप्तिर्भवति।

१५. श्रुतिवचनादुक्तम्।

१६. सुत्ययनतुरायणे संवत्सरप्रयोगे भवतः। सम्बन्धात् सुत्यन्तरोक्ताश्च धर्माः। यदुक्तं संवत्सरंसंवत्सरं वा सर्वेषां न प्रयुञ्जामस्य नित्यौ दर्शपूर्णमासौ वर्तेते इति तेषामेव तत्। चरुग्रहणं तु न कृतम्। शाखान्तरे द्यावापृथिव्योरयनमस्ति। तथा संक्रमयज्ञ इत्येवमादीनामदीक्षितायनधर्मप्राप्त्यर्थम्।

१२.

१. सोमदेवत्यो नवश्यामाकयागः। वर्षास्वागते श्यामाकस्य इति (४.१२) श्रुतेः। तद्धितनिर्देशात् इष्टिवचने॰ सिद्धे वेणुयवा अनित्यत्वज्ञापनार्थम्। तथा चाश्वलायन आग्रयणं व्रीहिश्यामाकयवानामित्याह।

२. सौम्येव। वेणुयवा वंशफलानि।

३. ऐन्द्राग्नः पुरोळाशः स्वश्रुतेः। आग्नेन्द्रो वा शाखान्तरात्। वैश्वदेवश्चरुर्द्यावापृथिवीय एककपालः स्वश्रुतेः।

४. सौमी इतरा च सहदाज्यभागे भवतः। तथैव श्रुतत्वात्।

५. इमं यज्ञमिदं वचः सौम्यस्य पुरोनुवाक्या। या ते धामानि दिवि या पृथिव्यां याज्या। इतीति वचनात् सोमेज्याख्ये हविर्यज्ञसोमे। वपायामेते एव विपर्यस्येते इति।

६. मधुपर्को दधि मधु च मिश्रम्। सौम्यस्येति ब्रुवन्नेतज्ज्ञापयति। नैन्द्राग्न्यादीनां मधुपर्को न सौम्यस्य वत्सः। किमेतस्य ज्ञापने प्रयोजनम्। विराजौ स्विष्टकृत उभयत्र।

७. इयं वामस्य मन्मन ऐन्द्राग्नस्य पुरोनुवाक्या। शुचिं नु स्तोमं नवजातमद्य याज्या।

८. आ घा ये अग्निमिन्धते आग्नेन्द्रस्य पुरोनुवाक्या। सुकर्माणः सुरुचो देवयन्तः याज्या।

९. मही द्यौः पृथिवी च नो द्यावापृथिवीयस्य पुरोनुवाक्या। उर्वी पृथ्वी बहुले दूरेअन्ते याज्या। वैश्वदेवस्य पूर्वापदिष्टे विश्वे देवासः स्तीर्णे बर्हिषीति।

१०. वैश्वदेवद्यावापृथिवीयौ यागा उपांशु भवतः। चशब्दात्प्राजापत्यस्य वैणुयव्याम्। तां हैक आग्नेयीं वा वारुणीं वा प्राजापत्यां वा कुर्वन्तीति श्रुतेः (कौ० ब्रा० ४. १३)। असूत्रणं चकारेणैव लब्धम्।

११. सर्वाग्रयणेष्वसंयोगविधानात्।

१२. प्रथमगर्भजः प्रथमज उच्यते।

१३. तन्त्रशब्देनात्राङ्गान्युच्यन्ते। दर्शपूर्णमासशब्देन चाग्नेयादीनि। तत्राग्नेयादीनां यान्यङ्गानि तान्येवात्र भवन्ति। नाभ्यधिकानीत्येतत्सामान्यम्। एतद्विकल्पेनोच्यते। पूर्वमाग्नेयादीनि तत

ऐन्द्राग्नादीनि। दर्शपूर्णमासाभ्यामिति। सहार्थे तृतीया। अपि वा पौर्णमासे वामावास्ये वा हवींष्यनुवर्तयेदिति (कौ० ब्रा० ४. १४) श्रुतेः। दक्षिणान्वाहार्य एव तद्यद्येतस्मै स्नायादिति श्रुतेः। अन्यत्र तु समामनन्त्यवचने दक्षिणाया अग्रहणम्। कुतः। वैणुयव्यामेतन्नन्नमेषा देवतैषा दक्षिणेति तन्त्रदक्षिणयोर्भेदेन ग्रहणात्।

१४. वाशब्दो विकल्पार्थः। नवानां व्रीहीणां यवानां च यथाकालं पौर्णमासं वा दार्शं वा कुर्यात्। आग्नेयादीनि व्रीहियवद्द्रव्यकाणि नवैः कुर्यादित्यर्थः।

१५. अयं वा पक्षः। अग्निहोत्रं यवाग्वा सायंप्रातर्जुहुयात्। एवमेव प्राप्ते सायंप्रातर्वचनं परिसङ्ख्यार्थम्। तेन समानतन्त्रा वा दर्शपूर्णमासाभ्यामित्यन्यतरस्य ग्रहणम्। दर्शपूर्णमासौ वा नवानामित्यत्र च।

१६. अग्निहोत्री धेनुः तां नवान्व्रीहीन्यवान्वा आदयित्वा। तस्या सन्तर्पिताया दुग्धेन सायंप्रातरग्निहोत्रं जुहुयात्। तस्या इत्येतत् श्रुत्यनुकरणं कुर्वता सूत्रकारेण श्रुत्यन्तरोक्ता विधयः सूचिताः। तथा च। कुण्डपायिनामयने छन्दोगानां हविष्यस्याध्वर्युर्जुहुयात्। कात्यायनश्चाह (४. ६. १०)। दर्शपूर्णमासानीजानो दक्षिणाग्निपक्वं चानुष्प्राश्यं ब्राह्मणान्भोजयन् किंचिद्दद्यात्। अग्निहोत्रायणिनो नवैः सायंप्रातरग्निहोत्रहोमः। तदाश्रिताया वा पयसा। दीक्षितव्रतं च उपसत्सु रौहिणौ कुर्वीत। सुत्यासु सवनीयामिति (४. ६. ११—१५) श्रुत्यन्तराणि।

१७. एतच्चावस्थाविशेषेण पक्षान्तरम्। स्वयंकर्तृकमेव गार्हपत्ये

माहवनीये तच्छ्रापिणो ऽपि। स्थालीपाकं तद्विधिना। आग्रयणदेवताभ्य इति वचनात् सौम्यस्यापीति वृद्धसंप्रदायः। आहवनीये जुहुयादित्याहवनीयवचनं प्रकृतत्वात् गार्हपत्ये मा भूत्। स्विष्टकृच्चतुर्थी इति सति संभवे चतुर्थीभ्यः। स्वाहाकारेणेति। आग्रयणदेवताशब्देन स्वाहाकारान्तेन जुहुयात्। प्रतिश्रुतहोमधर्मप्राप्तिर्जुहोत्युपदेशात्। चरोः पाकयज्ञत्वाद्वरो दक्षिणा। सर्वत्र स्थालीपाकादिषु कर्मस्विति वृद्धसंप्रदायः।

१३.

१. श्रुतिपाठक्रमेण चातुर्मास्यान्याह। फाल्गुने मासे भवा फाल्गुनी पौर्णमासी। श्रुतौ नक्षत्रयोग औचित्यानुवादः। तस्यां चातुर्मास्यप्रारम्भो भवति। चातुर्मास्यानीति वक्ष्यमाणस्य वैश्वदेवादेः पर्वचतुष्टयस्य नामधेयम्। सौमिकानामपि फाल्गुन्यामेव सुत्या। पुरस्ताद्दीक्षोपसदः कृत्वा। कुत एतत्। नामधेयसामर्थ्यात्।

२. चातुर्मास्यप्रयोगः। शाखान्तरात्।

३. चातुर्मास्यान्यारप्स्यमानो वैश्वानरीयपार्जन्यया यजेतेति चरकाणाम्। आरप्स्यमान इति तस्मिन्नेवाहनि इति भविष्यद्वचनम्। तस्माच्च चतुर्दश्यामग्निप्रणयनम्। इष्टिग्रहणात्पृथक्कृत्वा एकस्मिन्पर्वणि[1]।

४. ऋतावानं वैश्वानरं नाभिं यज्ञानामिति वैश्वानरस्य। पर्ज-

---

[1] C पर्वण्यपि।

न्याय प्र गायत पार्जन्यस्य पुरोनुवाक्या। यस्य व्रते पृथिवी नन्नमीति याज्या।[1]

५. उत्तरस्यां पौर्णमास्यां वैश्वदेवाख्यं पर्व भवति। संज्ञाकरणं शास्त्रसंव्यवहारार्थम्। प्रधानानि तावदाह।

६. हविर्विशेषः शाखान्तरात्।

७. सौम्यो ऽपि चरकाणामुपांशु। तदभिप्रायः समासः।

८. चरुसामान्यात्समासः।

९. हविर्विशेषः शाखान्तरात्।

१०. पयस्या स्त्रीलिङ्गाच्छ्रुतेश्च।

११. एककपालः श्रुतेः। चशब्दो ऽष्टानां समुच्चयार्थः।

१२. आग्नेयसौम्ययोः पूर्वोपदिष्टा एव। हिरण्यपाणिमूतये सवितुः पुरोनुवाक्या। उदीरय कवितमं कवीनामिति याज्या। सारस्वतस्य पूर्वोपदिष्टे एव।

१३. पूषन्तव व्रते वयं पौष्णस्य पुरोनुवाक्या। शुक्रं ते अन्यद्यजतं ते अन्यद्याज्या।

१४. इहेव वः स्वतवसः मरुतां स्वतवसां पुरोनुवाक्या। प्र चित्रमर्कं गृणते तुराय याज्या। वैश्वदेवद्यावापृथिवीययोः पूर्वोपदिष्टाः।

१५. अग्निमन्थनीया इत्यधिकारः। ता आसन्नेषु हविःषु भवन्ति। अवधिश्चायम्। तेनोर्ध्वमपि व्रतचरणात्। कुत एतत्। हविरासादनधर्मो ऽभिमर्शनं तत्संबद्धं च व्रतचरणम्। प्राकृतानां

---

[1] C in marg.) पार्वणो नित्यविकारविशेषणात्।

धर्माणां यद्यभ्यधिकमाह तत्र प्रायशः सूत्रकारस्तुशब्दं प्रयुङ्क्ते ।

१६. आहेति वाक्यशेषः । संप्रेषितवचनं तद्वशाद् भ्रेष आवृत्त्यर्थम् ।

१७. अभि त्वा देव सवितरीशानम्[1] ।

१८. मही द्यौः पृथिवी च नः ।

१९. त्वामग्ने पुष्करादधीत्येतास्तिस्रः । पूर्वे च द्वे । न विकल्पो मन्थनलिङ्गाशङ्कया ।

२०. जातायानुब्रूहीत्युक्तः। उत ब्रुवन्तु जन्तव इत्याह ।

२१. यदा हस्तेन धार्यते । संप्रेषो ऽपि केषांचिदस्ति। तद्द्योतनार्था धार्यमाणायेति चतुर्थी ।

२२. आयं हस्ते न खादिनमित्यस्या एवोत्तरे ऋचौ प्र देवं देववीतये आ जातं जातवेदसीत्येते प्रह्रियमाणायानुब्रूहीत्युक्त आह।

२३. एतामाह ।

२४. एतामाह ।

२५. तं मर्जयन्त सुक्रतुं एतामाह ।

२६. इतीति वचनाच्च काश्चिद्विक्रियन्ते। अग्निमन्थनीया इति शास्त्रसंव्यवहारार्थं संज्ञा ।

२७. अयं चापरः प्रकृतितो विशेषः। तथा च श्रुतिः । अथ यन्नव प्रयाजा नवानुयाजा इति ।

२८. चतुर्थं कृत्वा उत्तममकृत्वा अन्तरेण चत्वारो भवन्ति ।

---

[1] om. in C.

२९. अयमेकः।

३०. आगन्तूनां द्वितीयः।

३१. आगन्तूनां तृतीयः।

३२. आगन्तूनां चतुर्थः। एते चत्वार एवमेव शाखान्तरे पठिताः।

३३. त्वमग्ने सप्रथाः सोम यास्त इति।

३४. सावित्रद्यावापृथिवीयौ यागावुपांशु भवतः। चशब्दाद्वैश्वदेवी पयस्या। शतपथश्रुतेः।

३५. प्रेद्धो अग्न इमो अग्न इति। तथैव श्रुतत्वात्।

३६. एवमेव श्रुतत्वात्।

३७. श्रुतत्वात्।

३८. प्रथमं च द्वितीयं चान्तरेण षट् कुर्यात्। तुशब्दो नियमार्थः। कश्चित्पशावभ्यासेन द्वादशसङ्ख्यापूरणम्। तथाप्येते षळेव।

३९. षसां प्रथमः।

४०. षसां द्वितीयः।

४१. षसां तृतीयः।

४२. षसां चतुर्थः।

४३. षसां पञ्चमः।

४४. षसां षष्ठः। शाखान्तरे एवमेव पठितत्वात्।

४५. समानं तुल्यं दाक्षायणयाजिकेन वाजिनम्। तत्र धर्मविधानात्।

४६ समाप्तायां वैश्वदेविक्यामिष्टौ पौर्णमासं कुर्यात्। अथ यत्परस्तात्पौर्णमासेन यजत इति श्रुतेः। अयनयाजिनो यथाप्राप्तम्।

अत्र संस्थितायां पौर्णमासमिति वचनं ज्ञापकम्। प्रक्रान्तकर्मव्यवाये ऽपि नित्यानां कालो न बाध्यत इति।

४७. प्रागुत्सर्गादेतान्यन्तरालेषु व्रतानि कुर्यात्। व्रतवचनाद्द्वेषे व्रतपती भवति। मांसस्यार्यमाषस्यानशनम्। ब्रह्मचर्यं च मैथुननिवृत्तिः। अयं पुत्रवतः प्रथमः कल्पः। प्राक्शिरा अधः शेते। अधःशयनं तैत्तिरीयाणामुक्तम्। उपस्तीर्णमनुपस्तीर्णं वा यत्र वातो नान्तरा यायात् काष्ठासने वा अधःशयनमिति। आसनमप्यध एव। कुतः। तस्माद् काममेवोपरि शयीतेति श्रुतौ सत्यां मांसोपर्यासने चेच्छन्निति (१६.१.२८) कात्यायनेनासनशयनयोः साहचर्यसूचनात्। ऋतुकाले वा जायामुपेयादिति अपुत्रस्य वा जायासंरक्षणार्थं वानुकल्पः। जायाग्रहणं समानजातीयार्थं विभार्थं[1] च। सत्यवदनं येषामाधाने द्वादशरात्रमेवेति पक्षस्तेषामिह कर्माङ्गत्वेनोच्यते। येषां तु तत्र यावज्जीवमिति पक्षस्तेषां सत्यं हैवाभ्योदितं भवतीति विदुषो ऽपि प्रतिषेधार्थम्।

१४.

१. वरुणप्रघासा इति वक्ष्यमाणस्य कर्मणो नामधेयम्। ते वरुणप्रघासा आषाढ्यां भवन्ति। फाल्गुनीप्रयोगस्य यजमानस्य। आषाढीगुणवृत्त्या प्रतिपद्यभिधीयते। ननु चातुर्मास्यानीति समाख्यानात्कालसिद्धिः। नेत्युच्यते। अधिकमासिके ज्येष्ठ्यां वरुणप्रघासाः प्राप्नुवन्ति। तन्निवृत्त्यर्थं वचनम्। आषाढद्वये तु प्रथम

एवापाठे। प्रथमं वा निगम्येति व्याघातात्। न च पुनर्द्वितीये। उपचारो ऽविज्ञात एवेति श्रुतेः। एवमितरयोरपि।

२. चैत्रीप्रयोगस्य यजमानस्य श्रवणायाम्। प्रतिपद्येव। शाखान्तरश्रुतेः।

३. वैश्वदेवे भवान्ति हवींषि पौष्णपञ्चमानि भवन्ति तथैव श्रुतेः। वैश्वदेविकानीति वचनात्तद्धर्मकाणि। ततः सावित्रस्योपांशुता।

४. अथ यदैन्द्राग्नो द्वादशकपाल इत्येवमादिश्रुतेः(कौ० ब्र० ५.४)।

५. चोदनाप्रकरणे हविषां प्रतीकग्रहणं याज्यापुरोनुवाक्यानामिति परिभाषितत्वाद्याज्यापुरोनुवाक्या उच्यन्ते। तत्र पौष्णान्तानामैन्द्राग्नस्य च पूर्वोपदिष्टा एव। इमं मे वरुण श्रुधी हवं पुरोनुवाक्या वारुण्याः। तत्त्वा यामि ब्रह्मणा वन्दमानः याज्या। पयस्यावचनाच्च पयस्यया वरुण इज्यते तस्यैते याज्यानुवाक्ये। तेन सौत्रामणे वारुणस्योदुत्तमं वरुणाव ते हेळ इति।

६. मरुतो यद्ध वो बलं मारुत्या पुरोनुवाक्या। यूयमस्मान्नयत वस्यो अच्छ याज्या।

७. हिरण्यगर्भः समवर्तताग्रे पुरोनुवाक्या कायस्य। यः प्राणतो निमिषतो महित्वा याज्या। इतिकरणो नियमार्थः। ततः पशुमत्सु मारुते पशौ विपर्यास इति वृद्धसंप्रदायः।

८. तत्प्रयुक्तमनुवचनमित्यभिप्रायः। आहवनीयग्रहणं तस्योत्तरतो ऽवस्थानार्थम्। पञ्चमीनिर्देशादेकदेशप्रणयने[१] प्रणयनीयाः।

---

[१] A एव instead of एक।

९. प्र देवं देव्या धियेति प्रवन्तं तृचं प्रह्रियमाणायान्वाहेति (कौ०ब्रा०९.२) श्रुतेः। आसां तिसृणामासीनः प्रथमामाह। आसीनवचनादिळायास्त्वेत्यादेरनुवचनशेषस्यानियमः।

१०. उत्तरे द्वे प्रणीयमानमनुसंयन्ननुब्रूयात्।

११. इळायास्त्वा पदे वयं एतां साध्यमानयोरग्न्योरनुब्रूयात्।

१२. अग्ने विश्वेभिः स्वनीक देवैः सीद होतः स्व उ लोके चिकित्वान् नि होता होतृषदने विदान इति सन्नवतीभिः सन्नमनुस्तौतीति (कौ०ब्रा०९.२) श्रुतेः। त्वं दूतस्त्वमु नः परस्पा इति दूतवत्या परिदधातीति श्रुतिवचनात् न त्वं दूतो अमर्त्य इति। नि होतेति द्वे इति नोक्तम्। शाखान्तरे पाठक्रमान्यत्वात्।

१३. गायत्रः सर्वस्तार इत्युच्यमानेऽप्येता एव। कुतः। इतिशब्दात्। अग्निप्रणयनीया इति संज्ञा शास्त्रसंव्यवहारार्थम्।

१४. अयं च प्रणयनीयाधर्मश्चशब्दात्। यस्मिन्प्रदेशे आसीनेन प्रथमानूक्ता तत्र स्थित्वोत्सृज्यते वाग्यमात्। परिधाय दक्षिणं बाहुमन्वावृत्य वाचंयमो यथेतं प्रत्येत्येति न सूचितं परिभाषितत्वात्।

१५. अत्र द्वे वेदी। दक्षिणा चोत्तरा चेति। तेनानियमे प्राप्ते नियम उच्यते। उत्तरस्यां वेदौ होतृकर्मेति होतृवचनाद्ब्रह्मयजमानयोर्दक्षिणस्याम्। कर्मवचनात्समासनिर्देशाच्च पशुमत्सु मैत्रावरुणस्यादि।

१६. श्रुतत्वात्पशुरपि।

१७. गौश्च गर्भग्रहणसमर्था। अनड्वांश्च सेचनसमर्थः। एतौ दक्षिणा।

१८. न प्रतिप्रस्थातुरप्राधान्यात्। न चोभौ[१]। मिथुनार्थवादात्। अत एव विमोचनवाचने अप्येतस्य।

१९. वारुण्याः पयस्याया यो निष्कासः शेषस्तेन यागद्रव्येणावभृथमवैति यथा सोमे। तत्र श्रुतौ[२] धर्माम्नानात्। ननु हविरुपदेशः किमर्थमुच्यते। चोदनाप्रकरणे हविषां प्रतीकग्रहणं याज्यापुरोनुवाक्यानामिति परिभाषया उरुं हि राजा शतं त इति याज्यानुवाक्ये यथा स्याताम्। वारुण्या इति वचनं निष्कासयागशेषप्रज्ञापनार्थम्। अतो निष्कासविनाशे आज्येनावभृथो न तु वाजिनवन्निष्कासोत्पादनम्। यथा सोम इति वचनाद्दक्षिणानिवृत्तिः।

२० उरुं हि राजा वरुणश्चकार पुरोनुवाक्या। शतं ते राजन्भिषजः सहस्रं याज्या। अथ यदप्सु वरुणं यजतीति (कौ॰ब्र॰ ५. ४) श्रुतेः। अत्र पद्धतिः। यजमानो धिष्ण्यान्समीक्षत इति धिष्ण्याभावान्न भवति। ऋत्विगीक्षणं तु सोम एव। कुतः। अवानूबन्ध्यायां वेति सूत्रे अवशब्दाद्दार्षकृतवरुणप्रघासयोः प्रतिषेधः। उरुं हि राजेति यजमानो जपत्येव। सोमाभावान्न सामनिधनम्। अप्सु पादावधानं यजमानस्य ऋत्विजां चास्त्येव। कुतः। अवधाय वारुणीष्टिरिति सूत्रादेशात्। सर्वा चेष्टिरस्त्येव। सह प्रायश्चित्तैरिति वचनात्। प्रधानयाज्यानुवाक्ये उक्ते एव। शेषं यथासूत्रं सौमिकेन पौर्णमासीविकार इत्यारभ्याहवनीये समिधावादधाति देवानां समिदसीति पूर्वां तूष्णीमुत्तरां तूष्णीं पत्नी गार्हपत्य इति यावत्

---

[१] A B वेमौभौ C न चोभौ।

[२] A शतो।

(८.११.२.१७)। इति मन्दधियां सुखप्रतिपत्त्यर्थमुक्तम्। प्रकृतमुच्यते।

२१. अग्निमन्थनीयासेत्येवमाद्यच्च तुल्यं वैश्वदेवेन।

१५.

१. साकमेधा इति कर्मणो नामधेयम्। तत्प्रयोगः कार्त्तिक्यां भवति फाल्गुनीप्रयोगस्य यजमानस्य।

२. आग्रहायणी मार्गशीर्षी पौर्णमासी। तस्यां साकमेधाश्चैत्रीप्रयोगस्य यजमानस्य।

३. अग्नये ऽनीकवद्गुणायेष्टिः। सद्यःकाला पूर्वस्यां पौर्णमास्याम्। पूर्वेद्युर्महाहविष्या इत्यर्थः। पूर्वाह्ण इति सौरमानाभिप्रायेण।

४. अग्नेरनीकवतः पुरोनुवाक्या।

५. सेनानीकेन सुविदत्रो अस्मे याज्या। पौर्णमासावाज्यभागौ नित्यः स्विष्टकृदविशेषात्।

६. मरुद्भ्यः सांतपनगुणेभ्यो मध्यन्दिने चरुर्भवति। अथ यन्माध्यन्दिने मरुतः सांतपनान्यजतीति (कौ०ब्र० ५.५.) श्रुतेः।

७. सांतपना इदं हविर्मरुतां सांतपनानां पुरोनुवाक्या। यो नो मरुतो अभि दुर्हणायुर्याज्या। यो नो मरुतो वृकताति मर्त्य इति न भवति जगतीत्वात्। आमावास्यावाज्यभागौ देवतातः।

८. सायं रात्रौ मरुद्भ्यो गृहमेधविशिष्टेभ्यश्चरुर्भवति। सायं दिनान्तमिति यदुच्यते तदिह न भवत्यर्थवादमन्त्रलिङ्गदर्शनात्।

सांतपनीयायां तूत्कर्षेदग्निहोत्रमित्यस्मिन्नपि विचारे अस्तमित एव गृहमेधीया प्रतीयते। ननु कथं सांतपनीयायामसमाप्तायां अन्तराग्निहोत्रं सूच्यते। उच्यते। पौर्णमासस्येवोत्कर्षः श्रुतेः। पूर्वपक्षे साकमेधैरिष्टं भवतीति च हेतुदर्शनादग्निहोत्रं यथाकालमेव। ततो गृहमेधीया।

९. अग्निना रयिमश्नवदाग्नेयः। गयस्फानो अमीवहा सौम्यः। नियमार्थं वचनम्।

१०. गृहमेधास आ गत मरुतां पुरोनुवाक्या गृहमेधानां। प्र बुध्न्या व ईरते महांसि याज्या। केषां चिच्छाखिनां मरुतो गृहमेधिनो ऽत्र देवतात्वेन। तत्पक्षे देवतादेशनम्। ये यजामहे मरुतो गृहमेधिनः प्र बुध्न्या वः। अस्मत्पक्षे तु ये यजामहे मरुतो गृहमेधासप्र बुध्न्या वः।

११. त्वां चित्रश्रवस्तमं स्विष्टकृतः पुरोनुवाक्या। यदाविष्ठं तदग्नये याज्या।

१२. स्विष्टकृन्निगदस्य प्रतिषेधः। प्रकृतत्वात्।

१३. कंप्रपद्यादि पञ्चदशेन वज्रेण पाप्मानं भ्रातृव्यमवबाध इति सप्तदशेन वेति यावत्सर्वं प्रतिषिध्यते सामिधेन्यङ्गार्थवादात्।

१४. आज्यभागादियागक्रिया इडामार्जनान्ता या इडा अस्या इडायाः। इडावचनादियमेवेड्या न प्रयाजाः। किमत इति चेत्। मानुष इत्युक्त्वा देव सवितरित्यारभ्य[1] प्राक् स्रुगादापनात्कर्तव्य-

---

[1] Com. देव सवितरित्यारभ्य।

तोक्ता भवति। यद्यध्वर्युर्मानुष इति न ब्रूयादैन्द्रीमावृतमावर्त इत्यादि प्राक् स्रुगादापनात्कार्यम्।

१५. तस्य गृहमेधीयस्य चरोर्निष्काषं स्थालीविलग्नद्रव्यकं प्रातः पूर्णदर्व्याख्यं हुत्वा। हुते वाहुते वाग्निहोत्रे। कुतः। शतपथात्। अथ प्रातर्हुते वाग्निहोत्रेऽहुते वेति। तस्य निष्काषमिति ब्रुवन् पराकृतां दर्शयति। ततो ब्रह्मणो न मन्त्रेणोपवेशनम्। ननु पूर्णदर्वं हुत्वेष्टिमिति भिन्नकर्तृके कथं क्त्वाप्रत्ययः। उच्यते। पूर्णदर्वः केषां चित् यजतिरपि भवति। तथा चाश्वलायनः। पूर्णदर्वं चेदाश्रावयेयुरिति। अत्र याज्यानुवाक्ये।

पूर्णा दर्वि परा पत सुपूर्णा पुनरा पत।
वस्नेव विक्रीणावहा इषमूर्जं शतक्रतो (मै॰ स॰१.१०.२)॥

पुरोनुवाक्या।

देहि मे ददामि ते नि मे धेहि नि ते दधे।
अपामित्यव संभर को अस्माददते ददत् (आश्व॰ २.१८.१३)॥

इति याज्या। यथाश्रावितमादेशनम्। मरुद्भ्यः क्रीळिभ्य इष्टिं कुर्यात्। इष्टिवचनमतिरिक्तं केषां चिच्छाखिनामन्यदपि हविरस्तीति ज्ञापयति।

१६. क्रीळं वः शर्धो मारुतं मरुतां क्रीळिनां पुरोनुवाक्या। पर्वतश्चिन्महि वृद्धो बिभाय याज्या। पौर्णमासावाज्यभागौ नित्यः स्विष्टकृद्विशेषात्।

१७. इत उत्तरं यदुच्यते तन्महाहविष्येव भवतीति वेदितव्यम्। अतोऽन्यासामिष्टीनां दक्षिणा प्रकृतिवद्भवति।

१८. ऐन्द्राग्नानि वारुणप्रघासिकानि षड् हवींषि भवन्ति। वारुणप्रघासिकानीति वदंस्तद्धर्मान्प्राप्तान्दर्शयति। अतश्चावभृथः प्राप्तः प्रतिषिध्यते।

१९. माहेन्द्रश्चरुर्वैश्वकर्मणश्च एककपालः।

२०. चत्वां माहेन्द्रस्य च पूर्वोपदिष्टाः। विश्वकर्मणो वाचस्पतिं विश्वकर्माणमूतये पुरोनुवाक्या। या ते धामानि परमाणि यावमा याज्या। कश्चिदध्वर्युवशाद्वैश्वकर्मणं हविः पशुश्च वैश्वकर्मण एकस्मिन्कर्मणि स्यातां। तत्र वपायां विपर्यासार्थ इतिकरणः।

२१. वैश्वकर्मणो याग उपांशु भवति शाखान्तरात्।

२२. समानमन्यद्वरुणप्रघासैरिति वचनात् द्वयोः प्रणयने प्राः वचनम्। किं चान्यत्।

२३. ऋषभो वृषभ इत्येकार्थः। अनड्वान् सेक्ता दक्षिणा। अथ यदृषभं ददातीति (कौ० ब्र० ५. ५.) श्रुतेः।

२४. साकमेधेषु न वाजिनयागो भवति। नावभृथः। वाजिनप्रतिषेधं कुर्वन्नेतज्ज्ञापयति। पयस्यायां सत्यामपि पृथक्चोदनया वाजिनं भवति। अतश्च पूर्वकारिवशात्सोमे क्रियमाणमप्यस्माकमचोदितमिति कृत्वाविवाक्य ऽनुष्टुप्संपदि न संख्येयम्।

२५ वरुणप्रघासधर्मातिदेशो ऽयम्। अतश्च मद्वदाज्यभागादि सर्वं भवति। ननु समानमन्यद्वैश्वदेवेनेत्युच्यमाने ऽवभृथप्रतिषेधो ऽपि न कर्तव्यः। उच्यते। समानानि षट् संचराणीति (कौ० ब्र० ५. ५) श्रुतत्वात्। यथाश्रुति सूत्रकरणं न्याय्यतरम्।

१६.

१. तस्मिन्नेवाहन्यपराह्णे। कुतः। श्रुतेः। अथ यदपराह्णे पितृयज्ञेन (कौ०ब्रा० ६.१) चरन्तीत्यपराह्णस्याभ्यर्थवाचित्वात्। पित्र्येति संज्ञा। पितृविर्वक्ष्यमाणैर्हविर्भिः। ननु वक्ष्यमाणत्वादेव सिद्धे पितृविरिति किमर्थम्। उच्यते। केषांचिद्यमो ऽप्यत्र चतुर्थः। तस्य चातुर्मास्यदेवतासंख्या मा भूत्। इष्टिवचनाच्चाश्वमेध एतद्देवत्याः पशवः। तथा च कात्यायनः पितृत्र्यम्बकपुनरुक्तवर्जमित्याह (२०.७.२२.)। पुरुषमेधे तु भवन्ति। असंभवात्संख्यायाः।

२. यथोद्दिष्टा देवताः।

३. अयं च प्रकृतेर्विकारः। यानि स्विष्टकृद्वाचिकान्यग्निपदानि तानि कव्यवाहनविशिष्टानि भवन्ति। तद्यथा। अग्निं कव्यवाहनं होत्रायावह। अग्निः कव्यवाहनो होता वेत्वग्निः कव्यवाहनो होत्रं वेतु। यो अग्निं कव्यवाहनं होतारमवृथाः। यद्यप्यध्वर्युर्वरणं न करोति तथाप्यावाहने कृतत्वात्। ये यजामहे ऽग्निं कव्यवाहनमयाळग्निः कव्यवाहनः। यक्षदग्नेः कव्यवाहनस्य होतुः प्रिया धामानि। अग्निः कव्यवाहनो होत्रेण हविरजुषतेति।

४. त्वं सोम प्र चिकितो मनीषा। सोमो धेनुं सोमो अर्वन्तमाशुं सोमस्य पितृमतः पुरोनुवाक्ये। त्वं सोम पितृभिः संविदानो याज्या। पितृमत इति सिद्धे सोमस्येति वचनं नियमार्थम्। ततः पुरुषमेध एतद्देवत्ये पशौ यातयामदोषात्सौम्यस्य चरोरन्ये कल्पयितव्ये।

५. उदीरतामवर उत्परासः। अङ्गिरसो नः पितरो नवग्वाः पितॄणां सोमवतां पुरोनुवाक्ये। ये नः पूर्वे पितरः सोम्यासः याज्या।

६. उपहूताः पितरः सोम्यासः। आहं पितॄन्सुविदत्राँ अवित्सि पितॄणां बर्हिषदां पुरोनुवाक्ये। बर्हिषदः पितर ऊत्यर्वाक् याज्या।

७. अव सृज पुनरग्ने पितृभ्यः। ये चेह पितरो ये च नेह पितॄणामग्निष्वात्तानां पुरोनुवाक्ये। अग्निष्वात्ताः पितर एह गच्छत याज्या। देवतावचनं नियमार्थम्। ततः पशूनामप्येवंदेवतानामेता एव।

८. य एते तृचा उक्तास्तेषां प्रतिदेवतमेकैका याज्या भवति। एवमुक्ते न ज्ञायते कतमा सेति। तदर्थमाह। द्वे द्वे पूर्वे पुरोनुवाक्ये। स द्वे द्वे पुरोनुवाक्ये अन्वाहेति शतपथे। अथ यत्तिस्रस्तिस्र एकैकस्य हविषो भवन्ति। तथाह्वयत्येवैनाम्प्रथमया द्वितीयया गमयति प्रैव तृतीयया यच्छतीति (कौ० ब्रा० ५.७) श्रुतेः।

९. ते पुरोनुवाक्ये नानाप्रणवसंयुक्ते। न च प्रणवेन संतते भवतः।

१०. ये तातृषुर्देवत्रा जेहमानाः अग्नेः कव्यवाहनस्य पुरोनुवाक्या। त्वमग्न ईळितो जातवेदा याज्या। कव्यवाहनस्येत्येतावतापि सिद्धे स्विष्टकृत्पदनिरासार्थमग्नेः कव्यवाहनस्येति वचनम्। अतश्च ये यजामहेऽग्निं कव्यवाहनमयाळिति प्रयोगः।

११. सर्वस्य कर्मणः प्राचीनावीतित्वे प्राप्ते वचनं श्रुत्यन्तरात्।

पितॄन् सोमवतः पितॄन् बर्हिषदः पितॄनग्निष्वात्तानग्निं कव्यवाहनमेता देवताः प्राचीनापवीती यजति।

१२. येषुयेषु स्थानेषु[1] देवताभिधानं तेषुतेषु प्राचीनापवीती न केवलं याग एव। अनुवर्तयतीति वचनादावहशब्दमाहवनीयादभिधायिनमपि प्राचीनापवीती। ननु सोमे पितृमतीज्यमाने व्यूहनमन्त्रे अपनुदत्विति किं यज्ञोपवीतिना वक्तव्यमुत प्राचीनापवीतिनेति। उच्यते। प्राचीनापवीतिना। कुतः। भूयसां साधर्म्यात्।

१३. न कश्चित्पितृमतः सोमस्य प्राचीनापवीतित्वमित्यर्थः।

१४. सर्वमेव यज्ञोपवीती कुर्यादिति जातूकर्ण्य आचार्यो मेने।

१५. संप्रैषेष्वाश्राविताादिषु स्वधाशब्दे ऽध्वर्य्वादिभिः क्रियमाणे ये यजामह इत्यस्य स्थाने तद्धर्मकमेव ये स्वधामह इति ब्रूयात्। वषट्कारस्य स्थाने स्वधा नम इति।

१६. अन्वाहार्यपचनाद्दक्षिणे देशे अदूरत एव परिवृते[2] पित्र्यया चरन्ति। होतुः प्रदेशविज्ञानार्थमिदमुक्तम्।

१७. माहाहविषौं[3] वेदिमग्रेण गत्वा पैतृयज्ञियसंचरेण प्रविश्य दक्षिणाभिमुखस्तिष्ठति। ननु कथं ज्ञायते माहाहविषौं वेदिमिति। उच्यते। तदीयस्यान्वाहार्यपचनस्य प्रकृतत्वात्। पराङ्मुखस्य च क्रियास्वन्यायात्। अग्रेण वेदिं गत्वेत्येतत् कथं लभ्यते। गत्वेति वाक्यशेषाध्याहारात्। सूत्रकारेण तु वाक्यशेषो न प्रदिष्टो ऽस्मिन् कर्मण्ययमेव संचरो[4] न गमनमात्रमित्यभिप्रायेण। तिष्ठतीति होतुर-

---

[1] C ins. चिन्नमो। [2] A °ष्वि°। [3] A मधाहविषां। [4] A B om. न।

नुवादो ऽधिकारार्थः। पूर्वोक्तस्तु संचरः सर्वेषाम्। अथ यदुदञ्चः परेत्याथ यस्माच्च उपनिष्क्रम्येति बहुवचनं श्रुतेः।

१८. प्राकृतं बर्हिराक्रमणं न करोति। अध्वर्युवशादुपांशुचरणं चशब्दात्।

१९. प्राकृतानां जपानामुत्सर्गः शाखान्तरात्।

२०. येषु कर्मसु करणमन्त्रप्रयोगो जपवदुपांशु भवति तेषु मन्त्राणामुत्सर्गः। कर्माणि तु कर्तव्यानि। तद्यथा। भूमिसंमर्शनाध्वर्युसंमर्शनबर्हिष्यञ्जलिनिधानानि।

२१. वक्ष्यति। उपसदा चरन्तीति। तत्राप्ययं धर्मः। आचार्यग्रहणं विकल्पार्थम्।

२२. पित्र्यायामविकल्पार्थं[1] वचनम्। प्रकरणात्कर्तव्यान्येव जपमन्त्राणि कर्माणि। अनुत्सर्ग इत्येष न्यायः। एतद्युक्ततरमित्यर्थः।

२३. उशन्तस्त्वा निधीमहीत्येकां सामिधेनीं त्रिरुक्त्वार्षेयमुत्सृज्य देवेद्ध इत्यादि ब्रूयात्।

२४. बर्हिर्वर्जितान्प्रयाजानिष्ट्वा ततः आ नो अग्ने त्वं सोममित्येतावाज्यभागौ। जीवनवन्ताविति संज्ञा आयुष्कामस्य सार्वकामिक्यर्था।

२५. इळां नेति सिद्धे उपह्वयेति वचनमोष्ठाञ्जनप्रयोगार्थम्। प्राश्नन्तीति लिङ्गात्संदेहो मा भूत्।

२६. भागानवद्यायोऽश्नन्ति। उत्तरेळायामप्येवमेव। भागत्वाविशेषात्। बहुवचनं पूर्वकारिवशात् कदाचिद्भक्षणमपीति नियमार्थम्।

---

[1] C (orig.) अपि विकल्पार्थं।

२७. अनन्तरमध्वर्युर्यजमानो वा पितृभ्य उदकादि ददाति । तस्मिन्दत्ते मार्जनम् । तथैव श्रुतत्वात् ।

१७.

१. यत्र सर्वो दक्षिणाग्निः प्रणीयते तत्र देवरक्षाः किंशुकाः । भागधस्वेदया विष्ठत्येवमादिकं मन्त्रं जपन्त उत्तरेणान्वाहार्यपचनं गत्वा । कथम् । माहाहविषीं वेदिमग्रेण ततः सव्येनावृत्त्यापरेण गार्हपत्यं यजमानसंचरेण प्राङ्गत्वाहवनीयमुपतिष्ठन्ते ।

२. सुसंदृशं त्वा वयं पङ्क्तिः प्राथम्यात् । अक्षन्नमीमदन्त उपोषु शृणुही गिरः । एताभिराहवनीयमुपस्थाय । आहवनीयस्थाने महाहविषः । यत्पुनराहवनीयप्रेक्षणं प्रायश्चित्तहोमस्य तत्परिश्रितस्थे ऽग्नौ । कुतः । दक्षिणाग्निराहवनीयवदिति कात्यायनवचनात् ।

३. मनो न्वा हुवामह इत्यादिना तृचेन दक्षिणाग्निमुपतिष्ठन्ते । उपस्थानाभावः सर्वप्रणयने । समाप्ते पुनरानीतो ऽसौ दक्षिणाग्निर्भविष्यतीति चेत् । सत्यम् । तावदसावाहवनीय एव ।

४. आ त एतु मनः पुनरित्यस्याः स्थाने आ म एतु मनः पुनरिति ब्रूयुः ।

५. अग्निं तं मन्ये यो वसुरित्यादिना तृचेन । अग्ने त्वं नो अन्तम इति च द्वैपदेन तृचेन गार्हपत्यमुपतिष्ठन्त इति वाक्यशेषः ।

६. तच्चक्षुर्देवहितं शुक्रमुच्चरदित्येतयादित्यमुपतिष्ठन्ते । अथ यत्प्राञ्च उपनिष्क्रम्यादित्यमुपतिष्ठन्त इति (कौ०ब्रा०५.७) श्रुतेः ।

७. देवं बर्हिरिति वर्जयित्वा अनुयाजौ यजेत् । अथ यत्प्रयाजानुयाजेभ्यो बर्हिष्मन्ता उत्सृजन्तीति (कौ० ब्रा० ५.७) श्रुतेः ।

८. नामनी यजमानस्याभिव्याहृत्येति चोदकप्राप्तस्य प्रतिषेधः । अथ यत्सूक्तवाके यजमानस्य नाम न गृह्णातीति (५.७) श्रुतेः ।

९. शंय्वन्तैवेयमिष्टिर्भवति । अथ यत्पत्नीसंयाजैर्न चरन्तीति श्रुतेः ।

१०. जुहोतिसमुदायस्त्र्यम्बका इति । तान्संस्थाप्य ततो मैत्रश्चरुः अथ यदुदञ्चः पर्येत्य त्र्यम्बकैश्चरन्तीति श्रुतेः । अङ्गत्वार्थ उपदेशः । पाकयज्ञोऽयम् । मैत्रश्चरुरिति हविरुपदेशादश्वमेधे नैतद्देवत्यः पशुः ।

११. वाशब्दो विकल्पार्थः । अदितये वा चरुर्भवति । अथ यदन्तत इष्ट्या यजत इति श्रुतेः ।

१२. मित्रस्य चर्षणीधृतो मित्रस्य पुरोनुवाक्या । महाँ आदित्यो नमसोपसद्यो याज्या । ननु अदित्या अप्येते कस्मान्न भवतः । वैलक्षण्यनिर्देशात् । एकत्र तद्धितः एकत्र चतुर्थी ।

१३. संस्थितायां चरुहविरिष्ट्यां पौर्णमासं पर्व भवत्येवमेव श्रुतत्वात् ।

१८.

१. शुनासीर्यमिति चतुर्थस्य चातुर्मास्यपर्वणो नामधेयम् । तस्य विधिं वक्ष्याम इति वाक्यशेषः ।

२. पौष्णपर्यन्तानि वैश्वदेविकानि वैश्वदेवधर्मकाणि हवींषि भवन्ति ।

३. शुनासीर्यः पुरोडाशः । वायव्यं पयः । पयोवचनं याज्यापुरोनुवाक्ययोर्नियमार्थम् । सौर्य एककपालः ।

४. शुनासीराविमां वाचं जुषेथां शुनासीरीयस्य पुरोनुवाक्या शुनं नः फाला विकृषन्तु भूमिं याज्या ।

५. तव वायवृतस्पते वायोः पयोहविषि पुरोनुवाक्या । अध्वर्यवश्चकृवांसो मधूनि याज्या[1] ।

६. तरणिर्विश्वदर्शतः सौर्यस्य पुरोनुवाक्या । दिवो रुक्म उरुचक्षा उदेतु याज्या । इतिकरणाश्चैते वपायाः ।

७. सौर्यो याग उपांशु कर्तव्यः ।

८. शुक्लो ऽश्वो दक्षिणा भवति । अथ यच्छ्वेता दक्षिणेति श्रुतेः ।

९. श्वेत एव । यद्यश्वं श्वेतं न विन्देदपि गौरेव श्वेतः स्यादिति शतपथे ।

१०. आयोगो युगं बलीवर्दाभ्यां सहितमुच्यते । ते आयोगा द्वादश यस्मिन् सीरे तद्द्वादशायोगम् । सीरं हलमुच्यते । सा वा दक्षिणा भवति । द्विर्वाशब्दाच्च चतुर्विंशतिरपि गावः श्वेताः ।

११. समानमन्यद्वैश्वदेवेनेति प्राप्तं प्रतिषिध्यते ।

१२. अग्निमन्थनादि ।

१३. अमथ्यमाने त्वग्नौ प्राप्तमपि वैश्वदेविकं तन्त्रं न भवति । किं तु पौर्णमासं भवति । कुतः । न मन्थन्त्यग्निं पञ्च प्रयाजा भवन्ति त्रयो ऽनुयाजा इति शतपथे । स्वश्रुतिस्तु दृष्टा न मथ्यते पौर्णमासमेव तन्त्रं भवति । ननु एवं श्रूयमाणे पक्षद्वयं प्राप्नोति ।

---

[1] C in marg. यथाख्या शाखान्तरात् ।

मित्युच्यते। एवं श्रुतायामेवोदवसानीयायां पौर्णमासीविकारवचनात्साप्तदश्यं यथा तद्वदिहापि। अध्वर्युवशात्तु सहापि मन्थनेन पौर्णमासवेतत्सम्भवम्। दक्षिणा तु चोदकप्राप्तापि विशेषश्रुतया बाध्यत एव।

१४. अध्वर्युवशात्पक्षे शुनासीराविन्द्रवन्तौ तयोरियं पुरोनुवाक्या।

१५. याज्या।

१६. इन्द्राय वा शुनासीराय कात्यायने। तस्येन्द्रस्य शुनासीरस्येयं पुरोनुवाक्या।

१७. याज्या।

१८. शुनं हुवेम मघवानमिन्द्रं इन्द्रस्य शुनस्य पक्षे हविः। येषां चिदध्वर्यूणां तद्वशादियमिन्द्रस्य शुनस्य पुरोनुवाक्या। अश्वायन्तो गव्यन्तो वाजयन्तो याज्या।

१९. साकमेधाख्यं पर्व परिसमाप्य तस्मिन्नेव विहारे शुनासीर्यं पर्व कार्यम्। ननु अन्वक्षशब्दात्तस्मिन्नेव क्षण इत्येतत्सिध्यति न तु तस्मिन्नेव विहार इति। उच्यते। सिद्धं वैजवापकादवचनात्प्राक् पौर्णमासात्सिद्धो ऽधिकार इति। तच्च पठ्यते। प्राक् पौर्णमासात् शुनासीर्यम्। अतस्तस्मिन्नेव विहार इति सिद्धम्। पशुमत्सु यूपो ऽपि स एवाविशेषात्।

२०. वाशब्दो विकल्पार्थः। शुनासीर्यस्य माघ्यां वा करणम्। पौर्णमासीग्रहणान्मुख्यामुख्ययोरनियमः।

२१. सोमेनाग्निष्टोमेन। उत्सर्गो व्रतोन्मोचनम्। अयं तावत्प्रथमः कल्पः। तदभावे पशुना इष्ट्या वा। तुल्यो विकल्पः। एव-

मेवाश्वलायनवचनात्। ननु कथमेतत् ज्ञायते। अग्निष्टोमेनेति। प्रत्यवरोहणीयः सौमिकानामुत्सर्गः। तत्र संकल्पविहृतस्योपदेशात्। ऐकाहिकमनादेश इति वचनात्। अग्निष्टोमेनाग्नेयेन पशुनाग्नेय्येष्ट्येति शाखान्तरात्।

२२. सांवत्सरिकाणि चातुर्मास्यान्युक्तानि स्वश्रुतिपाठक्रमेणैव। पञ्चवर्षप्रयोगाणि शाखान्तरीयाणि। तेषु वैश्वदेवात्पूर्वेषु शुनासीर्यमपरेद्युर्वैश्वदेवं भवति। आरभ्यमानसंयोगाद्वैश्वानरीयपार्जन्या[1] आदावेवान्तत एवोत्सर्गः।

१९.

१. विधिः कर्तव्याकर्तव्यप्रतिपादकः शब्दः। तत्प्रतिपादितस्य कर्मणो अपराधे भ्रेषे प्रायश्चित्तं भवति। अथ यत्प्रायश्चित्तप्रतिनिधीम् कुर्वन्ति यदाकूतीर्जुहुतीति शुनासीर्यादनन्तरं श्रुतत्वात् तेनैव क्रमेण सूचितम्। लक्षणसूत्रमेतत्पूर्वकार्युक्तस्यापि करणार्थम्। ब्रह्मणा यानि होतव्यानि तान्येवात्रोच्यन्ते। अन्यत्र तु यथाधिकारं कर्तृव्यवस्था। ततश्चाग्निहोत्रहोमे तत्कर्तैव। शूलगवपठितानि अनेकपश्वर्थानि[2]। त्रयोदशाध्यायविहितानि होतुरेवेति वृद्धसंप्रदायः। स्वश्रुतौ ब्रह्मणस्तत्र होमवचनात्।

२. प्रायश्चित्तं प्राकृतमेव। तच्चेष्टिपशुसोमदर्विहोमानां विध्यपराधजं नैमित्तिकमङ्गम्। तस्य यथाचोदितस्यासंभवो ऽर्थलोपः

---

[1] C चारिषमा°। [2] C has शाखापशवोऽपि instead। [3] A C (sec. m) °राधे जाते निमि°।

कर्तृद्रव्यकालाभावलक्षणस्तत्र प्रतिनिधिर्भवति। आनुकल्पिको विधिर्भवतीत्यर्थः। तद्यथा। सर्वप्रायश्चित्तं सर्वैः प्रत्यक्षविहितैः सह विकल्पेनापि भवति। तुल्यत्वात्। न चायं[1] द्रव्य एव नियमः प्रतिनिधिरिति[2]। कुतः। एष प्रतिनिधीनां धर्म इत्यविशेषवचनात्। अतस्त्वाभावविकल्पाः प्रतिनिधिशब्देनेहोच्यन्ते। तद्यथा[3]। प्रायश्चित्तेष्टीनां स्थाने तस्यै तस्यै देवतायै पूर्णाहुतिं जुहुयादित्याश्वलायनस्य। याज्यापुरोनुवाक्याभ्यामृग्भ्यामिति चरकाणाम्। तथा च स्मृतिः।

इष्टिं वैश्वानरीं नित्यं निर्वपेदब्दपर्यते।
क्लृप्तानां पशुसोमानां निष्कृत्यर्थमसंभवे ॥ (मनु ११. २७.)

३. असंयुक्तविधानात्सिद्धे[4] संज्ञार्थं वचनम्। सर्वप्रायश्चित्तसंज्ञे आहुती इत्यभिप्रायः। महाव्याहृतिसर्वप्रायश्चित्तप्राजापत्यान्तरमित्येवमाद्यर्थमदोषेष्वपि संज्ञाकरणम्। आहुती इति लिङ्गसिद्धे वचनं परिसङ्ख्यार्थम्। आहुती एव केवले। नान्यदाघाराघारादुपकारकमङ्गम्। परिसमूहनादि तु संनिपत्योपकारकं भवत्येव। ननु कस्या[5] विशेषः। उच्यते। गार्ह्याणां कर्मणां कालातिक्रमादिभ्रेषः[6] प्रतिश्रुतस्तस्माद्बहिः। अन्तस्तन्त्रेषु[7] तु गार्ह्येषु श्रौतेषु वा होमसमाचम्। परतन्त्रोत्पत्तयो जुहोतिमात्रा इति कात्यायनवचनन्यायात्। ननु श्रौतविध्युपदेशो गार्ह्ये संभवन् भवति[8]। गार्ह्ये च परिसमूहनादि श्रौते इत्येतत्कथं लभ्यते। न्यायसूत्रप्रणयनाद्वृद्धसंप्रदायाच्च। तत उभयविधानार्थकयोरप्येतत्समानम्।

---

[1] B न त्वयं। [2] B नियमाः A नियम। [3] C ins. अपि वा। [4] B विधीसमाधानात्। [5] C मम कस्य विषयः। [6] A °भ्रेषप्रति B C °भ्रेष। प्रतिश्रुतस°। [7] B °न्तरेषु। [8] A om. °भवन्।

४. आहवनीयो ऽग्निराधारः सर्वाहुतीनां न केवलं प्रायश्चित्ताहुतीनामेवेति सर्वग्रहणम्। परिभाषासूत्रमेतत्। एवं चेत् प्र[illegible]ध्यायादौ सूत्रमेतद्युज्यते। नेति ब्रूमः। सार्वयज्ञिकमिति [illegible] वचनादाहिताग्नेराहवनीय एव पाकयज्ञाहुतयो मा भूवन्निति सूचितम्। आहवनीय इति प्रथमानिर्देशाद्यो यत्राहवनीयः स्थानापत्त्या वचनेन वा तत्संबन्धा एव प्रायश्चित्ताहुतयो ऽपि कर्तव्या इत्येतत् सिद्धं भवति।

५. चशब्दः सर्वग्रहणानुकर्षणार्थः। सर्वाहुतीनां होमपात्रं जुहूर्भवति। ननु पाकयज्ञेषु कथम्। उच्यते। को ऽत्र विशेषः। स्मार्ता जुहोतयः पाकयज्ञा उच्यन्ते। तेन सर्वाहुतीनामित्युच्यमानं जुहोतिसामान्यात्तत्रापि भवत्येव। यत्र त्वग्निविशेषस्य पात्रविशेषस्य वा स्मरणमस्ति तत्र तदेव भवति। तद्यथा।

कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही।
दायकालाहृते वापि श्रौतं वैतानिकाग्निषु॥

इति याज्ञवल्क्ये (१, ९७)। तथा च गृह्ये। स्रुवः पात्रमाज्याहुतिषु। ननु कथं ज्ञायते आज्याहुतिष्विति। उच्यते। आज्ये हविषि सव्ये पाणौ ये कुशास्तान् दक्षिणेनाग्रे संगृह्य मूले सव्येन तेषामग्रं स्रुवे समनक्ति मध्यमाज्यस्थाल्यां मूलं चेति स्रुवस्याज्याहुतिषु दर्शनात्। अथ चेत् स्थालीपाकेषु स्रुच्यग्रं मध्यं स्रुवे मूलमाज्यस्थाल्यामिति विशेषदर्शनादाज्याहुतिषु स्रुवः पात्रमित्येवगम्यते। ननु पूर्णाहुतिहोमो ऽग्निहोत्रहोमो ऽपि वा स्थालीपाकमेवेत्याशयप[illegible]वस पाकयज्ञधर्मकास्तेषु त्रै स्रुवेणाज्याहुतीरिति नियमात्

प्रायश्चित्तानि पार्वणवत् स्रुवेण प्राप्नुवन्ति। सत्यम्। तदपवादार्थमेव सूत्रमारब्धम्। इह सूत्रपठितानां जुहूश्च पात्रमिति। परिधिकर्मणि तु पाकयज्ञधर्मके प्राप्तस्य स्रुवस्य वारणेन स्रुवेणेति पुनर्ग्रहणात्प्रायश्चित्तहोमे ऽपि जुहूर्न भवति। पिण्डपितृयज्ञे जुहूरेव दर्शाङ्गत्वात्। एतेनैव धर्मेणाहिताग्नेः पिण्डपितृयज्ञ इत्येतावन्मात्रातिदेशादनाहिताग्नेः प्रायश्चित्ताहुतिषु स्रुव एव पात्रं धर्मवचनात्। पूर्णाहुतिषु सर्वत्र स्रुचा पूर्णया चतुर्गृहीतमाज्येनोपायेन संपाद्य जुहुयात्। कुत एतत्। तन्त्रान्तरे दर्शनात्।

६. चतुर्गृहीतमाज्यं प्रायश्चित्तेषु जुह्वा होतव्यमित्ययं नियमः। कुतः। श्रुतेः। प्रायश्चित्तवचनमधिकारार्थम्।

७. अनन्तरमव्यवहितं दोषादपराधात्प्रायश्चित्तम्। कुतः। यस्मादनिर्हृतदोषेण सहोत्तरस्य[1] संबन्धो नास्ति। [2]क्रमकोपपरिहारार्थो हेतुः। दोषवचनाद्व्यवहितविज्ञातस्यापि दोषनिर्घातो युक्तः। अतश्च शस्त्रानुवचने समाप्य प्रवृत्तस्य चाङ्गकर्मणो ऽन्ते प्रायश्चित्तहोमः। प्रवृत्तिनिषेधात्।

८. दोषविशेषे मन्त्रविशेषेणैव साक्षाद्विहितं स्वशाखायामन्यत्र चास्ति। तत्र तस्मिन्नुभे कुर्यात्। के उभे। किं शाखान्तरीयं च स्वशाखोत्थितं च। नेत्युच्यते। सर्वप्रायश्चित्तम् चाधिकारिकं च। विशेषाधिकारविहितमाधिकारिकम्। तत्कृत्वा ततः सर्वप्रायश्चित्तम्। सूत्रे

---

[1] C °त्तरेण। [2] A क्रमकाय।

तु सर्वप्रायश्चित्तस्य पूर्वपाठादसंभवे सर्वप्रायश्चित्तेनापि दोषोपघातः। हिश्शब्दाद्धोमप्रायश्चित्त एव समुच्चयो नेतरस्मिन्।

९. यस्य प्रमादादुद्धरणार्हे आहवनीये अनुद्धृते आदित्यो ऽभ्यस्तमियात् सो ऽन्येन याज्ञिकेन ब्राह्मणेन श्रोत्रियपुत्रेणोद्धरणं कारयेत्। तस्य च कुर्वतः सुवर्णं दर्भप्रबद्धमग्रतो नयेयुस्त्रैवर्णिकाः परिचारकाः। रजतमभ्युदिते। अन्यत्पूर्ववत्। उद्धरणकर्त्रे वरो देयः। शाखान्तरात्।

१०. यद्यग्निहोत्रहोमार्थमुद्धृत आहवनीयो ऽनुगच्छेत् ततो गार्हपत्यादुद्धरणं मन्त्रेण कृत्वा तस्मिन्नेवोद्धरणे तत्काल एवाग्नये ज्योतिष्मते इष्टिं कुर्यात्। शाखान्तरश्रुतेः। यस्याहवनीय उद्धृतो ऽग्निहोत्र उपयायात्सो ऽग्नये ज्योतिष्मते ऽष्टाकपालं निर्वपेदिति। ननु पौर्णमास्याममावास्यायां वा क्रियमाणायां ज्योतिष्मत्यां चोदको ऽनुपहतो भवति। किमर्थं निमित्तादनन्तरं क्रियते। उच्यते। सत्यमेव यदि इयमभ्युत्पत्त्यर्था न स्यात्। अभ्युत्पत्त्यर्था तु ज्योतिष्मती। तस्मात्तस्मिन्नेव काले कर्तव्येति। प्रासङ्गिके तु दर्शपूर्णमासार्थे उद्धृते उद्धरणकाले ऽप्यनुगते ज्योतिष्मती न कर्तव्या। कुतः। प्रासङ्गिके प्रायश्चित्तं न विद्यते परार्थत्वादिति न्यायात्। नित्यधृते ऽप्यनुगते न[1] ज्योतिष्मती। पुरुषार्थत्वान्नित्यधारणस्य। तथा जैमिनिः। धारणे च परार्थत्वादित्याह।

११. उदग्ने शुचयस्तवाग्नेर्ज्योतिष्मतः पुरोनुवाक्या। वि ज्योतिषा बृहता भात्यग्निर्याज्या।

---

[1] C om. न।

१२. अभ्यस्तमिते ऽभ्युदिते च प्रकरणात्। गार्हपत्ये ऽनुगते पूर्वमुद्धृतमाहवनीयं गार्हपत्यत्वेनाध्यवसाय दक्षिणाग्निमप्यपतो नीत्वा आहवनीयं विना मन्त्रेणान्यं प्रणीयाग्निहोत्रं जुहुयात्। होमः प्राप्त एवानूद्यते प्रायश्चित्तहोमप्रतिषेधार्थम्। होमार्थमेव गार्हपत्याध्यवसानम्। ततः परिसमाप्ते होमे ऽन्यस्य मन्थनम्। जुहुयादिति वचनादिष्ट्यर्थे विहारे नैतद्भवति। तत्र मन्थनं कृत्वा सर्वप्रायश्चित्तं हुत्वा गार्हपत्यस्य स्थापनं कार्यम्[1]। अथ यदि गार्हपत्यो ऽनुगच्छेदरणी वाव स गच्छत्यरणिभ्यां हि स आहृतो भवतीति शतपथश्रुतेः।

१३. अयमपरः पक्षः। आहवनीयं समारोप्योत्तरतः स्थित्वा निर्मथ्य गार्हपत्यमाहवनीयं प्रणीय दक्षिणाग्निं च विहृत्य तत्र होममध्यवस्येत्। परिसमापयेदित्यर्थः। कथं चासौ परिसमापितो भवति। यदि सायं तर्हि प्रातस्तनो ऽपि होमस्तत्रैव क्रियते। प्रातश्चेन्निमित्तं प्रातस्तन एव केवलो होमः। परिसमाप्ते प्रातस्तने होमे ततः समारोप्याग्नीनरण्योर्निर्मथ्य चिरंतनेभ्यो ऽग्निस्थानेभ्यो भस्मोद्धरणं कृत्वोपलिप्य गार्हपत्यमुपस्थापयेत्। तथा च शतपथः। इत्थमेव कुर्यादरण्योरग्नीन्समारोप्योदङुदवसाय निर्मथ्य जुहुयादसेषयाह स कां चन परिचर्यां करोति नवावसान उ अस्याभितो रात्रं हुतं भवति (शतपथब्रा० १२. ४. ३. १०.)।

१४. उभयोर्गार्हपत्याहवनीययोरभ्यस्तमितयोरभ्युदितयोर्वा-

---

[1] A तत्र गार्हपत्यस्य मन्थनं कृत्वा संस्थाप्याहवनीये जुहुयात् प्रायश्चित्तम्; यत्र C (in marg.) स्थापनं कार्य instead of मन्थनं कार्यं of B C.

न्यतरस्मिन् सन्ध्याकाले गार्हपत्योल्मुकमधरारणिं कृत्वा उत्तरारण्यां मन्थनं कुर्यात्। एवमेव शाखान्तरे श्रुतत्वात्।

१५. अथ चेद्गार्हपत्योल्मुकं मन्थनयोग्यं न विद्यते ततोऽरणी गार्हपत्यभस्मना संस्पृश्य गार्हपत्यं मथित्वा विहृत्याग्नये तपस्वते जनद्वते पावकवत्गुणायेष्टिं कृत्वा ततो होमः।

१६. पुरोनुवाक्या।

१७. इति याज्या। पुनरेतच्छ्रुत्यन्तरम्। यस्योभावनुगतावादित्योऽभिनिम्रोचेदभ्युदियाद्वा[1] पुनराधानमेव तत्र प्रायश्चित्तिरिति वचनसामर्थ्यात्तेन सह विकल्पः। वक्ष्यमाणसूत्रोक्तो वा तस्यापि विषय इति।

१८. इत्येवंप्रकार एवाग्न्यभावे सायमभ्यस्तमितयोरनुगतयोस्तद्वस्थयोः प्रातरभ्युदितयोः प्रायश्चित्तमुच्यते। किं तत्। अग्न्याधेयेनोत्पादयेत्। अनन्तरमेव। न वसन्ताद्यपेक्षेत। तथा अभ्यस्तमितयोरिति निमित्तान्तरम्। प्रातर्होमकालेऽनुगतयोरभ्युदितयोस्तद्वस्थयोरेवाभ्यस्तमितयोरग्न्याधेयमेव तत्र प्रायश्चित्तम्। तथा अनुगमादन्येन कारणेन नष्टयोर्दस्युभिरदर्शनं नीतयोरनुपलभ्यमानयोर्महता वा भयेन पुनराधानाप्राप्तयोरग्न्याधेयमेव प्रायश्चित्तम्। केचिदध्याहारेण सूत्रावयवं वर्णयन्ति। अन्येन वा कारणेनोत्पन्नयोर्नष्टयोरिति कारणशब्दमध्याहारं कृत्वा। अरणी एकं कारणं प्रसिद्धमेव। अन्यत्कारणमुपावरोहणमन्त्रः। उपावरोह जातवेद इति। तत्र लौकिके शावुपावरोहणे कृते प्राक् समारोपादनुगत-

---

[1] A B (?) ऽभिनिम्रोच॰।

योरग्न्याधेयमेव प्रायश्चित्तम्। द्विवचनमत्राविवक्षितम्। अग्न्यभावमात्रं विवक्षितमिति।

२०.

१. उपसृष्टा सवत्सीकृता यद्यग्निहोत्री धेनुरा दोहनिष्पत्तेर्वाश्येत ततः सूयवसाद्भगवती हि भूया इत्यनेन मन्त्रेण घासमुष्टिं तस्यै दद्यात्। तदाहुर्यस्याग्निहोत्री दोह्यमाना वाश्येत किं तत्र कर्म का प्रायश्चित्तिरिति स्तम्बमाच्छिद्य ग्रासयेदेतदेव तत्र कर्मेति शतपथे।

२. यद्युपसृष्टैवोपविशेत्तत आर्द्रदण्डप्रहारेणोत्थापयेत्। यस्माद्भीषेत्येवमादिना मीळ्हुष इत्येवमन्तेन मन्त्रेण उत्थाप्य च। उदस्थाद्देव्यदितिरित्येवमादिना वरुणाय चेत्येवमन्तेन मन्त्रेण तामेवानुमन्त्रयेत्।

३. अथवा येयमुपविष्टा तामुत्थाप्यादुग्धां द्वेष्याय ब्राह्मणाय दद्यात्। अर्थादनृत्विजे। ऋत्विक् तु नैव द्वेष्यो ऽनाचारात्। तथा च जैमिनिः। द्वेष्यो वा चोदनादित्याह।

४. हविरेव संस्कृतं होमार्थं द्रव्यम्। तस्मिन् भूमौ पतित इदं प्रायश्चित्तम्। अच्छायं वो मरुतः श्लोक एतु एतयर्चा[1]। तथा ययोरोजसेत्यादिना पूर्वहूतावित्यन्तेन अद्भिरुपनिनीयाश्राव्येत्यर्थः। ततो ऽस्कान्भवितेत्यादिना अह्वित्यन्तेन स्कन्नमनुमन्त्रयेत्।

५. यद् ब्राह्मणो भोज्याभोज्यनिन्दकः साधुकारी न भक्षयेदेत-

---

[1] C has सर्वा instead.

दुष्टस्य लक्षणम्। अनेन दुष्टमध्यवस्येन्नान्येन। लक्षणग्रहणात्कोशकीटावपन्नस्य हविषो न मृत्प्रक्षेपेण शुद्धिः।

६. तस्य दुष्टस्य प्रतिपत्तिमव्यपेक्षस्याप्सु प्रक्षेप इत्यर्थः।

७. दुष्टादन्यस्मिन्नदुष्टे शेषे विद्यमाने प्रयोजनसमर्थे तेन समापनं कार्यम्।

८. यत्र तु मध्यादवद्यति पूर्वार्धादवद्यतीत्यादिवचनं तत्र मध्यपूर्वार्धादेर्नाशदोषापहारे शेषस्य निष्प्रयोजनत्वादभाव एव। अतस्तथान्यदुत्पादयेन्मध्यपूर्वार्धाद्यर्थत्वात्संस्काराणाम्[1]।

९. प्रक्रान्तश्रुतद्रव्यापहारे तज्जातीयासंभवे यद्रूपतो रसतश्च सामान्यतमं तत्कार्यक्षमं च मन्येत तत्प्रतिनिदध्यात्। कुतः। यागचोदनयैव द्रव्यस्य प्राप्तत्वान्नियममात्रं व्रीह्यादिश्रुतयः। न च नियमानुरोधेन प्रधानकर्मणो हानिर्युक्ता तस्मात्प्रतिनिधिनापि प्रक्रान्तं परिसमापयितव्यम्।

१०. वाचनिकानामपि प्रतिनिधीनां एष एव धर्मो यः पूर्वसूत्रोक्तस्ततो नेदिष्ठिनो यजमानधर्माः। तथाच कात्यायनः। स तद्धर्मकर्मयोगादिति।

११. अयं चापरः प्रतिनिधेर्धर्मः। अविकारः अनूहः शब्दानाम्। श्रुतद्रव्याभिधायिनां शब्देनाभिधानं न प्रतिनिधिद्रव्याभिधायिनाम्। तद्यथा। छागाभावे मेष उपादीयमाने होता यक्षदग्नीषोमौ छागस्येत्येव ब्रूयात्। नन्वेवमनभिधानान्मन्त्रप्रयोगानर्थक्यं स्यात्। उच्यते। तद्धि प्रतिनिधिद्रव्यं श्रुतद्रव्यबुद्ध्यैवोपादीयते।

---

[1] A C (sec. h) °धोद्यार्थत्वा°।

न द्रव्यान्तरबुद्ध्या । ऊहस्तु क्रियमाणो द्रव्यान्तरबुद्धिं जनयेन्नात्रविकारः शब्दानाम् ।

१२. अप्रक्तदैवतं यावद्देवतामुद्दिश्य न प्रक्षिप्तं तावदुभे दुष्टे होमस्यानावृत्तिः । किं कारणम् । असंस्पर्शितत्वात् । प्रोक्षणादेस्तु संस्कारस्यावृत्तिर्भवति । सांनिपातिकत्वात् । अत उच्यते । अन्यद्धविः संस्कृत्य प्रयच्छेद्देवताया इति ।

१३. प्रक्षिप्तावदानशेषं यदि दुष्टं स्यात्ततस्तस्मिन्नप्रक्तदोषे सति हविरन्तरस्यानावृत्तिः । अनुत्पादनमित्यर्थः । प्रधानार्थं हि हविरुत्पाद्यते न गुणार्थमतः शेषभाजां स्विष्टकृदादीनां लोपो भवति ।

१४. यत्परं कार्यमारादुपकारकं न प्रतिपत्तिकर्म तदाज्येन कर्तव्यम् । तद्यथा निष्काषहोम उच्यते । [1]पयसाग्निहोत्राहुता प्रवर्ग्यशेषहोम इत्येवमादीन्युदाहरणानि । यत्पुनः पुरुषार्थं यथा हविरुच्छिष्टाशनो हविःशेषभक्ष इति तच्च प्रतिनिधिर्युक्तः । समाप्तिः श्रेयसीति ह स्माह कौषीतकिरिति (८.९) श्रुतेः ।

१५. चोदिताभ्यो या अन्यास्तासु देवतास्विष्टासु अज्ञानाद्वा दुष्टद्रव्येणेष्टासु अपरिसमाप्ते तन्त्रे प्रदानमावर्तते । पुरोनुवाक्या प्रैषो याज्या च । प्रदीयते अनेनेति प्रदानम् ।

१६. अशेषे तन्त्रे सकला इष्टिरावर्तते दृष्टादृष्टसमुदायेऽप्यावृत्तिः श्रुतत्वात् ।

---

[1] A पयस' अग्निहोत्राहुताप्रवर्ग्ये C पयसा यजो ऽग्निहोत्राहुताप्रवर्ग्यशेषेण, sec. h. del. यजो B पयसायजोऽग्निहोत्राहुता ।

१७. यो यस्योपकरोति स तस्य गुण उच्यते। यथा उद्धरणमन्त्रो ऽग्नेः। अवद्योतनादयश्च संस्कारा हविषः। तत्र प्रमादादुद्धरणमन्त्रस्य लोपे उद्धरणस्यावृत्तिर्न भवति। अवद्योतनादीनां च प्रमादादकरणे ऽन्यस्य हविषः पुनःक्रिया न भवति। कुतः। संनिपातप्रधानत्वात्। संनिपतन्ति यस्मिन्गुणाः स संनिपातस्तस्य प्रधानत्वादनावृत्तिः। प्रधानवशवर्तिनो हि गुणाः। न गुणवशवर्ति प्रधानम्। ननु सर्व एव धर्माः प्रकरणात्प्रधानात्पूर्वप्रयुक्तास्ततश्चावद्योतनादयस्तादर्थ्येन कस्मान्न क्रियन्ते। उच्यते। संनिपत्य हि ते प्रधानस्योपकुर्वन्ति। नान्यथेति।

१८. यत्र मन्त्रेणाहुतिरुक्ता यथा प्रजापत इति चतुर्थीति सा प्रमादात्प्रजापतये स्वाहेति हुता प्रजापते न त्वदिति मन्त्रो न प्रयुक्तः। क्वचित्प्रदानं याज्यापुरोनुवाक्याभ्यां विना प्रत्तम्। तत्र पश्चान्मन्त्रः प्रयोक्तव्यो न प्रयोक्तव्य इति संदेह आह। मन्त्रं नानुजपेत्। कुतः। अभिधानसंस्कारद्वारेण स्मारयन्त उक्ता मन्त्रा उपकुर्वन्ति। अतिक्रान्तश्च स कालस्तस्मान्नानुजपेत्।

१९. अनुजपेन्मन्त्रमित्येवं जातूकर्ण्य आचार्यो मन्यते। आचार्यग्रहणं विकल्पार्थम्। उभयथा श्रुतेः। प्रयोगनियमाददृष्टम्।

२०. चोदिताभ्यो या अन्यास्ताभ्यो हविर्ग्रहणे कृते ऽन्यासु वा आवाहितासु न ग्रहणं नावाहनं चाङ्गीकुर्यात्। किं तर्हि चोदिताभ्यः प्रयच्छेत्। कुतः। चोदितायाः[1] प्राधान्यात्। यास्त्वावाहिता हविर्ग्रहणे वा भ्रान्त्या संकीर्तितास्ता आज्येन यजेत्। श्रुत्यन्तरात्।

---

[1] A चोद्यमायाः।

२१.

१. इष्टयो दर्शपूर्णमासाद्याः। पशुबन्धा अग्नीषोमीयप्रभृतयः। बहुवचनं पशुबन्धानामनेकप्रकारत्वात्। सोमे चेति जातावेकवचनं। एतेषु प्रायश्चित्तं ब्रह्मा जुहोति। कुतः। एतेष्वेव ब्रह्मणो वरणं विधानात्। तदाहुः किंविदं किंछन्दसं ब्रह्माणं वृणीतेत्यध्वर्युमित्येके स परिक्रमाणां चेचष्टो भवतीति। छन्दोगमित्येके तथा ह्यस्य त्रिभिर्वेदैर्हविर्यज्ञाः संस्क्रियन्त इति। प्रायश्चित्तं ब्रह्मा जुहोतीत्येतदपि श्रुतेरेव। यद्वै यज्ञस्य स्खलितं वोल्बणं वा भवति ब्रह्मण एव तत्प्राहुस्तस्य त्रय्या विद्यया भिषज्यतीति (कौ० ब्र० ६.११.१२)।

२. इष्टिपशुबन्धेषु सोमे चेत्यनुवर्तते। ऋग्वेदविहिते कर्मणि यदि विध्यपराधो भवेद्भूः स्वाहेत्येतावता मन्त्रेण गार्हपत्ये जुहुयात्। अथ यद्यृच्युल्बणं स्याच्चतुर्गृहीतमाज्यं गृहीत्वा गार्हपत्ये प्रायश्चित्ताहुतिं जुहुयाद्भूः स्वाहेति (६.१२) श्रुतेः।

३. यदि यजुर्वेदविहितकर्मसंबन्धी विध्यपराधः स्यात्ततो भुवः स्वाहेत्येतावता मन्त्रेण प्रायश्चित्ताहुतिं जुहुयादन्वाहार्यपचने ऽग्नौ।

४. सोमे तु वितत आध्वर्यवे भ्रेष आग्नीध्रीये जुहुयात्। अथ यदि यजुष्युल्बणं स्याच्चतुर्गृहीतमाज्यं गृहीत्वान्वाहार्यपचने प्रायश्चित्ताहुतिं जुहुयात् हविर्यज्ञ आग्नीध्रीये सौम्ये ऽध्वरे भुवः स्वाहेति (कौ० ब्र० ६.१२) श्रुतेः। प्रागाग्नीध्रोत्पत्तेर्दक्षिणाग्नौ। आहवनीय इत्यपरे।

५. सामवेदविहिते कर्मणि चेद्विध्यपराधः स्यात्स्वः स्वाहेत्येतावता मन्त्रेणाहवनीये जुहुयात्। आहवनीयग्रहणं पूर्वयोराग्न-

ग्लानिवृत्त्यर्थम् । अथ यदि साम्न्युल्बणं स्याच्चतुर्गृहीतमाज्यं गृहीत्वाहवनीये प्रायश्चित्ताहुतिं जुहुयात्स्वः स्वाहेति श्रुतेः ।

६. यत्र वेदविशेषत्वेन दोषो न विज्ञायते । यथा । यज्ञोपवीतिना कर्तव्यं बद्धशिखेन कर्तव्यमिति तस्यापराधे भूर्भुवः स्वः स्वाहेत्येतावता मन्त्रेणाहवनीय एव जुहुयात् । आहवनीयः सर्वाहुतीनामिति परिभाषितत्वात् । अथ यद्यविज्ञातमुल्बणं स्याच्चतुर्गृहीतमाज्यं गृहीत्वाहवनीय एव प्रायश्चित्ताहुतिं जुहुयाद्भूर्भुवः स्वः स्वाहेति श्रुतेः ।

७. उपस्थानासंभवे प्रतिनिधिरयम् । प्रायश्चित्तप्रति[illegible]: प्रकरणात् । यदि कथं चित्प्रवत्स्यन्नग्नीन्समीक्षत इत्येवमादिकं वि[illegible]मकृत्वा प्रवासो भवति ततो ऽनुपस्थाय प्रसर्गे ऽग्निभिः सह वियोगे प्रवासे इत्यर्थः । प्रतिदिशमुपस्थानम् । यस्यां दिश्यग्निहोत्रस्थस्तं तत्प्रत्यभिमुखः कुर्यात् ।

८. अग्नीनुपस्थायाप्रसर्गे यथा प्रोष्यायन्नित्युक्तं तथैव कुर्यात् । प्रतिदिशमुपस्थायाप्रसर्गे प्रतिदिशमेव कुर्यात् । तत इह सूत्रादृष्टा तृणापचयनसमिदाधाने न भवतो ऽर्थलोपात् ।

९. समारोहयमाण इत्यादिना समारोह्यप्रवासे सति न लौकिक उपावरोह्योपस्थानम् । किं तर्हि मन्थनं कृत्वोपस्थानं कुर्यादिति वाक्यशेषः ।

१०. अनुपस्थाय प्रसर्गे । यथा गार्हपत्यस्थयोराहवनीयदक्षिणाग्न्योरुपस्थानं तथारण्योरपि प्राप्तं प्रतिषिध्यते ।

११. अहोमेन कारणेन अनिच्छया वा निमित्तभूतया प्रसि-

हीनो ऽपि कर्मभ्यो ऽग्नीन्नोत्सृजेत् । कर्मार्था अग्नयस्तदशक्तौ निःप्रयोजनं धारणमिति कृत्वा कस्य चिदुत्सिसृक्षा स्यात्तन्निवृत्त्यर्थं वचनम् ।

१२. अनुत्सृजन् किं कुर्यादित्याकाङ्क्षित आह । यदा क्रियासमर्थस्तदा कालातिक्रमनिमित्तं प्रायश्चित्तं कृत्वा । तुशब्दाच्छाखान्तराम्नातमपि । ततो ऽतीतानि कर्माणि प्रतिनिदध्यात् । प्रतिनिधिश्च शाखान्तरे विहितः । तद्यथा[1] ।

> चतुर्दश चतुर्गृहीतानि सकृद्धूयते हविः ।
> एका समित्सकृद्धोमो ऽर्धमासाय कल्पते ॥

तस्यायमेव विषयः । द्विरभ्यासो ऽध्यायपरिसमाप्तौ शिष्टाचारस्तदाचरणं चायुष्यमिति ।

इति शाङ्खायनश्रौतसूत्रभाष्ये तृतीयो ऽध्यायः समाप्तः ।

---

[1] C om.

अथ चतुर्थो ऽध्यायः[1]।

१.

उक्तानि प्राक्सौमिकानि कर्माणि। तेष्वेव याजमानं वक्तव्यम्। तदुच्यते।

१. व्रत्यमिति वक्ष्यमाणनियमवद्भोजनाद्युच्यते[2]। तत्पत्नीयजमानौ चरतः। तयोर्हि याजमानमिति न्यायसिद्धत्वात्। तत्र भोजनस्य कालनियमं तावदाह।

२. वत्सापाकरणमिति गोभिनां प्रसिद्धः कालो ऽपराह्णः। ततः प्राग्वक्ष्यमाणमश्नीयाताम्। किं पुनस्तद्व्रत्यमित्याकाङ्क्षित आह।

३. उक्तेभ्यो यदन्यत्तद्व्रत्यम्। मांसादीन्यव्रत्यानि। तस्मादेतेषां यथाविषयमुपभोगवर्जनम्। अन्यथाकरणे ऽव्रत्यं वा चरित्वेति व्रातपतीष्टिः। येन च द्रव्येण यक्ष्यमाणः स्यादिति प्राधान्येन यद्यागसाधनं तन्नाश्नीयात्। यदन्यत्तद्व्रत्यं तदश्नीयात्। यक्ष्यमाण इति च भविष्यत्कालनिर्देशाद्यागात्पूर्वेद्युर्व्रत्यचरणम्।

---

[1] A adds चरद्व्रतो भाष्यमाणमर्थो ऽवरोधव्यः। [2] C वक्ष्यमाणम्।

२.

१. अग्न्यन्वाधानमिति नाम कर्म शाखान्तरे प्रसिद्धम्। तदुच्यते। यजमानाधिकारो ऽनुवर्तते। न पत्न्याः सामर्थ्यात्। अग्नीन्विहृत्य प्रादुष्कृत्य वा नित्यधारी तानन्वादधाति समिधः। कथमेतत् ज्ञायते समिध इति। आदधातिशब्दात्। कैतत्कर्म। उच्यते। इष्टिपशुबन्धेषु। कः पुनरस्येष्टिपशुबन्धाङ्गस्य कर्मणः[1] कालः। उच्यते। पूर्वेद्युः। पूर्वस्मिन्नहनीत्यर्थो ऽर्थाद्विभक्तिर्विपरिणम्यते। इष्टिपशुबन्धेभ्यः पूर्वेद्युरिति। उपदिष्टः कर्ता होमद्रव्यं कालश्च। विधिमिदानीमुपदिशति।

२. आहवनीये ऽग्नौ महाव्याहृत्योत्तमया स्वरित्येतया समिधमादध्यात्। समिदाधानमन्त्राणां चेत्यन्ते स्वाहाकारः। महाव्याहृतयो विशिष्टक्रमाः सार्थवादाः व्यस्ताः समस्ता उक्ताः। ततः सूत्रकारस्य व्यवहारः।

३. गार्हपत्ये ऽग्नौ प्रथमया महाव्याहृत्या समिधमादध्याद्भूरित्येतया।

४. मध्यमया महाव्याहृत्या भुव इत्येतया दक्षिणाग्नौ समिधमादध्यात्।

५. द्वेद्वे त्रिष्वप्यग्निषु चशब्दात्समुच्चिताः[2] प्रत्येकं मन्त्रवत्या सह तूष्णीमादध्यात्।

६. पूर्वोक्ताः समिधो नव। दशमीं समिधमाहवनीय आद-

---

[1] A om. [illegible]। [2] A °शब्दात्समिधस्ताः प्र° B °शब्दात्समुचिता C °शब्दात्समुचितमशब्दाः प्र°; in marg. समुचिताः।

ध्यात्। समस्ताभिर्महाव्याहृतिभिर्भूर्भुवःस्वरिति। एतत्पैङ्ग्यमग्न्यन्वाधानम्।

७. पक्षान्तरमेतदग्न्यन्वाधानस्य। महाव्याहृतीनां मन्त्राणां स्थाने तेनैवाग्निक्रमेण चतस्र ऋचो विहव्यस्य ऋषेरेकदेशभूताः। आम्नायक्रमेण प्रथमा प्रयोक्तव्या समिदाधानमन्त्रत्वेन। तद्यथा। ममाग्ने वर्चो विहवेष्वस्त्वित्यनयाहवनीये समिदाधानम्। ततस्तूष्णीं द्वे। मम देवा विहवे सन्तु सर्व इत्यादिकया गार्हपत्ये। ततस्तूष्णीं द्वे। मयि देवा द्रविणमा यजन्तामित्येतया दक्षिणाग्नौ। ततस्तूष्णीं द्वे। मह्यं यजन्तु मम यानि हव्येत्यादिकया दशमीमाहवनीये।

८. यो विहव्यस्य शेषो देवीः षळुर्वीरुरु नः कृणोतेत्येवमादिकः सवर्गः सह खैलिकया विहव्यस्येत्यृषिनिर्देशात् तेन शेषेणाग्नीनामुपस्थानं प्रकरणात्। एतत्कौषीतकमग्न्यन्वाधानम्। अपरः कल्पो ऽग्न्यन्वाधानस्य उच्यते।

९. अप नः शोशुचदघमित्येताः सप्त। अग्ने नय सुपथा राये अस्मानित्येका। यस्त्वा हृदा कीरिणा मन्यमान इत्येका। त्वं नो अग्ने अधरादुदक्तादित्येका। एवमेता दश। एताभिर्वा दशभिराहवनीयादिषु पूर्वोक्तेन क्रमेण समन्त्रिकास्तिस्रस्तिस्रः समिध आधाय दशम्याहवनीय आदध्यात्।

१०. प्राग्नये वाचमीरयेति पञ्चकं सूक्तम्। इमं स्तोममर्हते जातवेदस इति षोडशकम्। आभ्यां सूक्ताभ्यामुपस्थानमग्नीनाम्। आरुणमेतदग्न्यन्वाधानम्।

११. पूर्वोक्तेनैव क्रमेण दशापि समिधस्तूष्णीमादध्यादित्येतन्मागहीयमन्व्याधानम्। आचार्यग्रहणं विकल्पार्थम्।

१२. यत्पूर्वमुक्तं महाव्याहृतिभिरन्व्याधानं तत्पैङ्ग्यं मतम्। आचार्यग्रहणं कीर्त्यर्थम्।

१३. विहव्येन यदुक्तमन्व्याधानं तत्कौषीतकं मतम्। आचार्यग्रहणं पूजार्थम्।

१४. अप नः शोशुचदघमित्येवमादिकमन्व्याधानमारुणं मतम्। तदेतदनेकविकल्पमन्व्याधानं शाखान्तरादाचार्येणोपसंहृतम्।

३.

१. पिण्डपितृयज्ञ इति वक्ष्यमाणस्य कर्मणो नामधेयं शास्त्रसंव्यवहारार्थं पिण्डप्रदानप्राधान्यदर्शनार्थं च। कालमिदानीमाह। अपराह्णेऽमावास्यायां कर्तव्य इति वाक्यशेषः। कथमित्याकाङ्क्षित आह।

२. स्वसंचरेण पात्राणि नयेत्। यथोद्दिष्टान्यविरोधात्।

३. गार्हपत्यस्याग्नेः पश्चाद्दक्षिणाग्रेषु दर्भेषु[१] स्फ्यं प्राञ्चं निदध्यात्। कुत एतत् प्राञ्चमिति। दक्षिणाग्रेषु कुशेष्विति न्यायप्राप्तस्य पुनर्वचनात्।

४. तस्यैव स्फ्यस्योपरिष्टात्पात्र्याधाराग्नौषौ निदध्यात्।

५. तस्यैव स्फ्यस्य पुरस्ताद्दक्षिणामुखे शूर्पे स्थालीं निदध्यात्।

६. आच्य सव्यं जानु भूमौ निपात्य। नीचा मुष्टिना अधो-

---

[१] A कुशेषु।

मुखहस्तमुष्टिनेत्यर्थः। व्रीहीन्गृह्णाति। सकृद्विशेषावचनात्। पितॄन्मनस्यनुस्मरन्[1]। क्व गृह्णाति। स्थाल्यां शूर्पस्थायां। संनिधानात्। स जघनेन गार्हपत्यं प्राचीनापवीती[2] भूत्वा दक्षिणासीन एवं गृह्णातीति च शतपथे। कियत्परिमाणान्[3] गृह्णातीत्यत आह।

७. नीचा मुष्टिना सकृदपि गृह्णन् आर्थेनोपायेन तथा गृह्णीयात् यथा स चरुर्भवति। न यवागूः। कुत एतत्। स इति वचनात्। किंविशिष्टश्चरुः। अधोबिलाशृतः। स्थालीबिलादध आशृतस्य। आङीषदर्थे। ईषच्छृत इत्यर्थः। अधोबिल आशृतस्येत्यधोबिलाशृतः। अपूर्णस्थालीको[4] मन्दस्विन्नस्येत्यर्थः[5]। एवमवस्थो यथा भवति तथा व्रीहीन् गृह्णीयात्।

८. पत्न्या एकवारं कण्डितानित्यर्थः[6]। ईदृशांस्तण्डुलान्।

९. पूर्वोक्तलक्षणं चरुम्।

१०. असंस्कृतेन घृतेन चरुमभिघार्य। कुत एतत् असंस्कृतेनेति। अदेवत्वात्[7]।

११. तं चरुं प्रतीच्यां दिश्युद्वासयेत्।

१२. अवसवि अप्रदक्षिणमित्यर्थः। परिसमुह्य गृह्योक्तेन विधिना। प्रकृतत्वाद्दक्षिणाग्निं परिस्तीर्यानियताग्रैर्दर्भैः। सर्वतः पर्युक्ष्य[8]। क्रियात्रयमप्येतदप्रदक्षिणं कुर्यात्। यावदुक्तं चात्र कर्मप्रकृतिविकाराभावात्।

---

[1] A B मनसा स्मरन्। [2] A om. च। [3] A B कियत्परिमाणान् C ॰परिमाणेन। [4] A C (sec. h.) ॰स्थालीपाको। [5] A मन्दपक्वस्ये॰ B मन्दशृतस्ये॰। [6] A C (orig.) खण्डितानि॰ B खण्डिता। [7] A B अप्रदेयत्वात्। [8] C (sec. h.) पर्युक्ष्य।

१३. दक्षिणं जानु भूमौ पातयित्वा ।

१४. यज्ञोपवीती विशिष्टविन्यासशरीरस्थसूत्रादिः[1] । प्राङ्मुख आसीनो मेक्षणेन दर्व्याकारेण प्रादेशमात्रेण प्राङ्मुखेन यज्ञियेन वक्ष्यमाणा आहुतीर्जुहोति । इह यज्ञोपवीतीति प्राङासीन इति वचनात्सर्वं प्राचीनापवीती[2] दक्षिणामुखः कुर्यात् । पत्न्या सकृत्फलीकृतानित्यारभ्य जुहोतीत्यन्तं सूत्रम् । तथापि क्त्वाप्रत्ययान्तानि खण्डशो व्याख्यायन्ते । सौत्रान् होममन्त्रानिदानीमाह ॥

४.

१. स्वाहाकारान्तैस्त्रिभिर्मन्त्रैः प्रतिमन्त्रं मेक्षणेनाङ्गुष्ठपर्वमात्रमवदाय तिस्र आहुतीर्जुहोति ।

२. इत्यारभ्यावाचीनपाणिनेति सूत्रान्तः । खण्डशस्तु व्याख्यायन्ते क्त्वान्तानि प्रतिपत्तिलाघवार्थम् । होमान्ते मेक्षणमनुप्रहरेत् । अग्नौ मेक्षणमभ्यादधाति तत्स्विष्टकृद्भाजनमिति शतपथश्रुतेः (२.४.२.) । आहुत्यङ्गत्वादनुशब्दाच्च यज्ञोपवीतीत्येव ।

३. दक्षिणाग्नेर्दक्षिणस्यां दिशि स्फ्येनोद्धन्यादपहता इत्येवमादिना मन्त्रेण वेदिषद इत्येवमन्तेन । विसर्जनीयान्तो मन्त्रः । आध्वर्यवे तथा दृष्टत्वात् । दक्षिणासंस्थं सकृदुन्मार्जनम् । दक्षिणान्यायानि पित्र्याणीति परिभाषितत्वात् । अथ दक्षिणेनान्वाहार्यपचनं सकृदुल्लिखति तद्वेदिभाजनमिति शतपथश्रुतेः ।

४. तदभ्यृष्टमुदकेनोपसिञ्चेत् ।

---

[1] A B सूत्रादि । [2] Bom. प ।

५. ये रूपाणीत्यादिना मन्त्रेण दक्षिणाग्न्युल्मुकं साग्नि उन्मृष्टस्य दक्षिणार्धे निदध्यात्। कुत एतत् दक्षिणाग्न्युल्मुकमिति। प्रकृतत्वात्। साग्नीति[1] मन्त्रवर्णात्। अथ परस्तादुल्मुकं निदधाति स निदधाति ये रूपाणीति शतपथश्रुतेः (२.४.२.१४)।

६. तस्मिन्नुन्मृष्टे कुशान्निदध्यात्। किंविशिष्टान्। मूले सकृच्छिन्नान्। अथ सकृदाच्छिन्नान्युपमूलं दिनानि भवन्तीति शतपथे। दिनानि छिन्नानि।

७. असाविति सर्वनाम्नः स्थाने। पितृनामामन्त्रितमुच्चार्य अवनेनिक्ष्व ये च त्वामत्रानु। अनेन मन्त्रेण कुशेष्वाधारेष्वपो निषिञ्चेत्। अवाचीनपाणिना अवाचीनहस्तेन[2] पितृतीर्थेन इत्यर्थः।

८. एवमवस्थेनैव हस्तेन दक्षिणतःपूर्वस्मादवनेजनप्रदेशात्पितामहस्यामन्त्रितनामोद्देशः। पूर्वकेण मन्त्रेणावनेजनं कुर्यात्।

९. एवं दक्षिणत इति वर्तते। प्रपितामहस्यामन्त्रितनामोद्देशः पूर्ववत्।

१०. अयमपि पितृनामोद्देशपूर्वको ऽवनेजनवत्। एतत्त इत्येतावता भिन्नः। तथापि संदेहव्युदासार्थः सकलः पठितः। अनेन मन्त्रेण हुतशेषपिण्डान्[3] यथावनेजितमिति वचनात्तेनैव क्रमन्यासेन निदध्यात्।

११. उभौ पिण्डौ निदध्यादेकस्मिन् स्थाने। पितृभेदे पितृद्वित्वे। पुत्रिकापुत्रादिविषयं च पितृद्वित्वम्। तथा मनुनोक्तम्।

---

[1] A inserts तु। [2] C अवाचा हस्तेन—C inserts in marg. दक्षिणतः पूर्वस्मात्। [3] C adds in marg. उद्धार्य।

दौहित्रो ह्यखिलं रिक्थमपुत्रस्य पितुर्हरम्।
स एव दद्यात्तत्पिण्डं पित्रे मातामहाय च॥ इति

(९.१३२) एवं द्विगोत्रत्वे पितामहप्रपितामहस्थानयोरपि द्वौ द्वौ पिण्डौ निदध्यात्। अवनेजनमप्येवं तादर्थ्यात्।

१२. जीवपितृकस्यैतत्कर्म न भवति। प्रेतेभ्यो ददातीति मन्त्रान्तरदर्शनात् वाक्यशेषाच्च। अथो परासु वै परावतं पितरो गता इति।

इमं जीवेभ्यः परिधिं दधामि
मैषां नु गादपरो अर्थमेतम्।
शतं जीवन्तु शरदः पुरूचीर्-
अन्तर्मृत्युं दधतां पर्वतेन॥

इति जीवेभ्यश्चैवैतां पितृभ्यश्च मर्यादां करोत्यसंभेदाय। तस्माद्ध्येतज्जीवाश्च पितरश्च न दृश्यन्त इति लिङ्गात्।

१३. जीवतान्तर्हितो जीवान्तर्हितः। कोऽसौ। पितामहादिः पित्रादौ जीवति[1]। तस्मा अपि पिण्डदानं न भवति। कुतः। न जीवन्तमतिददातीति श्रुतेः।

१४. जीवपितृकस्य पक्षान्तरम्। येभ्यः पिता पिण्डान्ददाति तेभ्यः पुत्रोऽपि दद्यात्। तथा च श्रुत्यन्तरम्। पितापुत्रौ चेदाहिताग्नी स्यातां येभ्यः पिता दद्यात्तेभ्यः पुत्रो ददातीति।

१५. न जीवपितुरस्तीत्यस्यैतत्पक्षान्तरम्। होमान्तं[2] वा पिण्डपितृयज्ञं[3] भवति।

---

[1] A inserts सति। [2] B in text and com. होमान्तरं। [3] ॰यज्ञं all MSS.

१६. अत्र पितर इत्यादिकं मन्त्रं जपेत्। अत्र जपत्यत्र पितरो मादयध्वं यथाभागं पितर आवृषायध्वमिति। यथाभागमश्नीतेत्येवैतदाहेति शतपथश्रुतेः। मन्त्रवर्णाच्चानुदेशो[1] ऽप्यवगम्यते।

१७. आसीन एव पर्यावृत्योदङ्मुखो भवेत्। अथ पराङ्पर्यावर्तते तिर इव वै पितरो मनुष्येभ्य इति श्रुतेः (श० २.४.२.२१.)।

१८. आ तमनात् को ऽर्थः। आ उच्छ्वासाभिकाङ्क्षणात्। एवं चिरासित्वा ततः।

१९. पिण्डाभिमुखो भूत्वा अमीमदन्त पितर इत्येवमादिकं मन्त्रं जपेत्। स वा आ तमितोरासीतेत्यु हैक आहुरेतावान् ह्यसुरिति स वै मुहूर्तमेवासित्वाथोपपत्य जपत्यमीमदन्त पितरो यथाभागमवीवृषतेति शतपथश्रुतेः (२.४.२.१७)।

२०. यथापूर्वमवनेजनं कृतं तेनैव प्रकारेणावनेज्यानन्तरम्।

५.

१. नमो वः पितरो जीवायेत्यादिना दत्तेत्यन्तेन मन्त्रेण पितृभ्यो नमस्कुर्यात्पिण्डेषु पितॄन्मनसारोपयन्।

२. एतद्व इत्यादिना मन्त्रेण त्रयाणामपि पिण्डानामेकं सूत्रमुपरि क्षिपेत्। कार्पासमविशेषात्। तथा द्वितीयम्। तथा तृतीयम्। शाखान्तरोपदेशात्।

३. ऊर्जमित्येवमादिना पितॄनित्येवमन्तेन मन्त्रेणावनेजनोदकशेषं पिण्डसंनिधौ निनयेत्।

---

[1] A ०देशो।

४. पिण्डान्यथान्युप्तानेवावजिघ्रेत् । शाखान्तरश्रवणात् । यत्पुनः शातपथमथावजिघ्रति प्रत्यवधाय पिण्डानित्यवधायावजिघ्रतीत्येतस्य प्रतिपादकम् । तेन सहास्य विरोधः । इत्येवं सर्वशाखाप्रत्ययत्वे ऽपि प्रतिशाखं व्यवस्थयैव[1] याज्ञिका अनुष्ठानमिच्छन्ति । शाखानानात्वान्यथानुपपत्तेः । इतरथा सर्व एवोपदेशः सापेक्षः[2] स्यादिति । विकल्पपक्षे ऽपि स्वशाखोक्तविधिः पक्षे ऽपि भवत्येवेति न दोषः । तथा च ।

ऊनो वाप्यधिको वापि यः स्वशाखोत्थितो विधिः ।

तेन संतनुयाद्यज्ञं न कुर्यात्पारतन्त्रिकमिति (गोभिलपरिशि० २. ९२.) ।

५. पिण्डानित्येतदधिकृतम् । निर्वापप्रदेशादादाय पिण्डाम् पात्रे ऽवधाय प्राश्नीयात् । प्राशनविधानादवधानमर्थप्राप्तमुच्यते । कर्मसमाप्तौ प्राशनं यथा स्यादिति ।

६. अथवा तान्पिण्डान् ब्राह्मणाय दद्यात् ।

७. अप्सु वा पिण्डाम् क्षिपेत् ।

८. पुत्रार्थिनी पत्नी मध्यमपिण्डमश्नीयादाधत्तेत्येवमादिना असदित्येवमन्तेन मन्त्रेण ।

९. पिण्डानवघ्रायानन्तरमुल्मुकं दक्षिणाग्नौ कुर्यात् ।

१० सकृदाच्छिन्नान् कुशान् दक्षिणाग्नावेवानुप्रहरेत् । अयं क्रमः शाखान्तरात् । [3]शतपथश्रुत्यानुक्रमान्यत्वं अग्नौ सकृदाच्छिन्नानभ्यादधाति. पुनरुल्मुकं विसृजतीति तथापि यथासूत्रमेव कर्तव्यमित्यत्राभिहित एव न्यायः ।

---

[1] A प्रतिशाखाव्यवस्थयैव B व्यवस्थयैव C प्रातिशाखं व्यवस्थैव । [2] A साक्षेपः ।
[3] A inserts यद्यपि ।

११. पिण्डपितृयज्ञो ऽपराह्णे ऽमावास्यायामित्यमावास्याधिकारमुपजीवन्नाह। अथामावास्यायां यवाग्वैवाग्निहोत्रं जुहुयात्। सायंप्रातर्होमद्रव्यनियमार्थं वचनम्। एवमेव शाखान्तरे श्रुतत्वात्। ननु संनयतो ऽयं नियमो यवाग्वाग्निहोत्रहोमः संनयतस्तां रात्रिमिति (का० ४. २. १७.) श्रुतिश्च शातपथी सायंदोहप्रकरणएवाह। अथ यवाग्वैवैतां रात्रिमग्निहोत्रं जुहोतीति (१. ७. १. १०)। सत्यम्। अस्ति त्वन्याश्रुतिरविशेषेणामावास्यां[1] प्रकृत्य मैत्रायणीयानाम्[2]। यवागूमग्निहोत्रं जुहोतीति। सैवाचार्येण सूचिता।

१२. पर्वाणि पक्षर्त्वयनसंवत्सरसन्धयः। पर्वणीति जात्यपेक्षमेकवचनम्। तत्रौपवसथ्यप्रयुक्तो[3] यजमानेन स्वयंहोमः कर्तव्यः। तथा चौपवसथ्यप्रयुक्ततां[4] स्वयंहोमस्यैकत्र शातपथी श्रुतिर्दर्शयति। स यदि ग्राम्या ओषधीरश्नाति पुरोडाशस्य मेधमश्नाति यद्यारण्या ओषधीरश्नाति बर्हिषो मेधमश्नाति यदि वानस्पत्यमश्नातीध्मस्य मेधमश्नाति यदि पयः पिबति सांनाय्यस्य चाज्यस्य च मेधमश्नाति यद्यपः पिबति प्रणीतानां मेधमश्नाति यदि नाश्नाति पितृदेवत्यो भवति। तदाहुः। किमशनमिति स्वयं हैवैतां रात्रिमग्निहोत्रं जुहुयात्स यद्धुत्वा प्राश्नाति तेनापितृदेवत्यो भवत्याहुतिर्वा एषा स यदेवैतामात्मन्याहुतिं जुहोति तेनो एतेषां मेधानां नाश्नातीति। ननु यद्येवं अग्निहोत्रायणिनः[5] पौर्णमास्यमावास्ययोः स्वयंहोमो न प्राप्नोति। सत्यम्। अविशेषेणैव श्रुतिरन्यत्रास्ति। तया भविष्यति।

---

[1] C ०वास्यं। [2] A C (by marg. add.) मैत्रावरुणीयानां। [3] A तत्रोपवसथ०। [4] A चोपवसथप्र०। [5] णीनां A।

तद्यथा। एते ह वै रात्रीं सर्वा रात्रयः समवयन्ति या आपूर्यमाणपक्षस्य रात्रयस्ताः सर्वाः पौर्णमासीं समवयन्ति या अपक्षीयमाणपक्षस्य रात्रयस्ताः सर्वा अमावास्यां समवयन्ति स यो हैवं विद्वान् स्वयमुपवसथे जुहोति सर्वदा हैवास्य स्वयं हुतं भवतीति शतपथे। अन्यत्राप्युपवसथ इति श्रुतिः। नेत्युच्यते। पौर्णमास्यमावास्ययोर्निगमनमात्रमेतत्। स्वयंहोमस्य पर्वणीति चशब्दादन्यत्र यदत्र शाखान्तरोक्तम्। किं च तत्। स्वयंहोमाशक्तौ उपासीनो ऽपसर्पणाशक्तावासनमधः[1]।

१३. एतेनैव धर्मेणेत्येवकारकरणाच्च गार्ह्येण। ततश्च दक्षिणातः पृथक्क्रियते। अनाहिताग्नेः कृतावसथ्यस्येत्यर्थः। पिण्डपितृयज्ञो भवतीति वाक्यशेषः। तथा च श्रुत्यन्तरम्। अप्यनाहिताग्निना कार्यः।

१४. पिण्डपितृयज्ञ इति वर्तते। विनापि दर्शाङ्गतया पिण्डपितृयज्ञो ऽवश्यं कर्तव्यः। तथा चानुपदर्शनम्। तदाहुर्यत्संवत्सराय संवत्सरसदो दीक्षन्ते कथमेषां पिण्डपितृयज्ञो ऽनन्तरितो भवतीत्यौपासनैरिति (१२.३.५.५) शतपथे।

६.

१. अग्नीनन्वादधातीष्टिपशुबन्धेषु (४.२.१) पूर्वेद्युरित्येतस्मात्सूत्रादिष्टिपशुबन्धेष्वित्यधिकारो ऽनुवर्तते। अग्निहोत्रं यवाग्वैव सायंप्रातरिति सायंप्रातर्ग्रहणस्यैतत्प्रयोजनम्। कथं नाम प्रातरग्नि-

---

[1] C in marg. पर्व ; ॰सीनो or ॰सीतो all MSS.

होत्रे कृते शाखान्तरीयं ब्रह्मवरणं स्यात्। वृतस्य च ब्रह्मत्वमुपदिश्यते। तच्च दक्षिणतोन्यायम्। कर्मणः क्रियमाणस्य दक्षिणतः स्थितेन ब्रह्मत्वमनुष्ठीयमानं न्यायवद्भवति। कुतः। सामर्थ्यात्। अथवा न्यायशब्दः प्राये वर्तते। दक्षिणतोन्यायं ब्रह्मकर्म बाहुल्यमेव। तथा च श्रुतिदर्शनानि। तेन दक्षिणतो ब्रह्मासीत्तस्य दक्षिणतो वर्षीयानुदीचीनप्रवणो यज्ञः संतस्थ इति। शतपथे च। ते होचुः। को नो दक्षिणत आसिष्यते। तथाभये ऽनाष्ट्रा उत्तरतो यज्ञमुपचरिष्याम इति (४.६.६.१)। अतश्च सोमे ऽप्ययं न्यायस्तुल्यत्वात्।

अभियुक्ततरैरन्यैरुक्ता ये ब्रह्मसंचराः।
न्यायतो वचनाच्चापि श्लोकैस्तान्निबोधत ॥१॥
व्रजेदाहवनीयं तु पूर्वेणाप्यपरेण वा।
इष्टिपश्वोरयं प्रोक्तः संचरो वरणात्सदा ॥२॥
दर्शे च पौर्णमासे च वरणात्प्राङ् न विद्यते।
न चैवोत्सर्जनादूर्ध्वं ब्रह्मकर्म पशौ तथा ॥३॥
न साध्यं पुरुषार्थेषु यज्ञमित्यधिकारतः।
नातः सन्ध्यावाग्यमने[1] शयने न प्रबोधने[2] ॥४॥
न विष्णुक्रमवात्सप्रे न कण्डूयनमेहने।
समिद्धनीवाहृतौ[3] नैव लब्धप्रवाचने[4] ॥५॥
भस्मोद्वापे तथारुह्य प्रतिपत्तिक्रियासु च।

---

[1] C ०यमने न। [2] C (orig.) प्रबोधयेत्। [3] C (orig.) समिद्धितीया०।
[4] C (orig.) लब्धस्य वाचने।

अग्निहोत्रे श्रुतो ब्रह्मा कुण्डपाय्ये ऽपि तत्तथा ॥६॥
कर्मणः क्रियमाणस्य प्राय आसनसंचरौ ।
दक्षिणान्यायतः सूत्रे अग्नीनां चाव्यवायतः ॥७॥
हुते हिरण्यवद्धोर्मे अनुगच्छति दक्षिणः ।
परीत्यानः क्रये वृत्त आ निधानात्तथा व्रजेत् ॥८॥
प्रवर्ग्याभिष्टवे पश्चाद्दक्षिणाग्नेरुदङ्मुखः ।
आसित्वा चानुसंयाने यायात्प्राग्दक्षिणेन तम् ॥९॥
आसीतोदङ्मुखो नित्यं वेद्यंसाद्दक्षिणाद्बहिः ।
वेदिमानप्रभृत्यान्तात्सति साम्यस्य संभवे ॥१०॥
अग्निप्रणयनं साग्नावन्यत्र च यथोदितम् ।
प्रवर्ग्योत्सादने त्वेति दक्षिणेनाविरोधतः ॥११॥
आग्नीध्रे यदि घर्मः स्याद्दक्षिणेनाग्निमासनम् ।
खरत्पाचोत्तरेणैत्य आस्तवादेष संचरः ॥ १२ ॥
अनुव्रज्य ततो घर्मं गत्वा तीर्थेन चासनम् ।
यज्ञसंचर एष स्यात्प्रत्यग्गमनमिच्छतः ॥१३॥
अध्वरं दक्षिणेनैव शालाग्नीनपरेण तु ।
मध्यन्दिने चेदाग्नीध्रे घर्मस्तत्रैव संचरः ॥१४॥
प्रविश्य दक्षिणेनैव तत्रैवास्त उदङ्मुखः ।
यज्ञसंचरमास्थायानुयायात्सदसः पुनः ॥ १५ ॥
तेनैवाग्नीध्रमागत्य प्राग्घोमात्तत्र चासनम् ।
प्राप्ते तेनैव निःसर्पेद्धर्मोत्सादनकर्मणि ॥१६॥
परिस्पन्दमनुव्रज्य प्रत्येयाच्च यथागतम् ।

दक्षिणेनैव सदसो हविर्धाने च संचरः ॥ १७ ॥
उत्पादनं चेदग्नौ स्यादव्यवायोऽत्र कारणम् ।
प्रणयन्ति यदाग्निं च सोमं चाध्वर्यवस्तदा ॥ १८ ॥
होतृवत्संचरो ज्ञेयः स एवापररात्रिकः ।
तत आदाय राजानमन्वेत्यग्निं परेच्छया ॥ १९ ॥
हुते वैसर्जने होमे ऋत्विक्को वा यथागतम् ।
राजानमन्यहस्ते तु कृत्वाग्नीध्रे सहासनम् ॥ २० ॥
एवमाहवनीयेऽपि यावद्वैसर्जनाहुतिः ।
अग्रेणैव वितानस्य प्रत्येत्य प्रविशेत्ततः ॥ २१ ॥
द्वारासोमः ससोमो वा हविर्धानं तु पूर्वया ।
इच्छन्ति पश्चिमेनान्ये द्वारेणैव प्रवेशितुम् ॥ २२ ॥
ब्रह्मणोऽपि तथैवात्र सोमहस्तस्य संचरः ।
मार्जालीयं तु पूर्वेण आगच्छेदृत्विक्को यदि ॥ २३ ॥
अनसो दक्षिणस्यैव आस्ते दक्षिणतस्ततः ।
उत्थाय पश्चिमे यामे साह्यमध्वर्युकर्मणः ॥ २४ ॥
कृत्वा होतुस्ततः कुर्यात्पठतः स्वासनस्थितः ।
ततः प्रदक्षिणं यज्ञं परीत्याभिषवेक्षणे ॥ २५ ॥
प्रविशेत्पूर्वया द्वारा सर्पतामनु तद्वशः ।
सदःप्रवेशः सूत्रोक्तः संचरश्च विसंस्थिते ॥ २६ ॥
बहिःसंस्थस्य सदसि पवमानस्य चेत्क्रिया ।
पूर्वेणैव प्रशास्तारं ब्रह्मणो गतिरागतिः ॥ २७ ॥
मानसे ब्रह्मवद्ये च चक्रारोहण एव च ।

यत्रसंचर एष स्यात्पर्येत्येवाभिषेचने ॥२८॥
कुर्वता न्यायवचनं व्यवायं प्रतिषेधता ।
उक्तमेव सुयत्नेन तदेवेदमुदाहृतम् ॥२९॥

२. पित्र्यायामिष्टौ पश्चान्न्यायम्। तुशब्दः स्वमतप्रकाशकः। शाखान्तरे कश्चित्पुरस्तात्प्रत्यङ्मुखौ ब्रह्मयजमानावासाते। कश्चिद्दक्षिणत उदङ्मुखौ। तथा च कात्यायनः। पितृयज्ञ उपांशुचरणं पुरस्तादुपचारो ब्रह्मयजमानयोः पूर्ववदेति।

३. ब्रह्मकर्मेत्येतस्माद्ब्रह्मण इत्येतत्प्रकृतम्। शाखान्तरेषु पित्र्यायां ब्रह्मयजमानयोर्विपर्ययश्रवणमस्ति। तद्यथा वाजसनेयके। इत्थं यजमानश्च ब्रह्मा च पश्चात्परीतः पुरस्तादग्नीत्। तथा हविःप्रचारकाले। यजमानश्च ब्रह्मा च पुरस्तात्परीतः पश्चादग्नीत्। पुनरनुयाजप्रचारे। यजमानश्च ब्रह्मा च पश्चात्परीत इति। ईदृशो विपर्ययो यजमाननिमित्तः। यजमानहेतुको[1] यजमानाभिप्रायो ब्रह्मणः। कुतः। शाखान्तरमवलम्ब्याचार्येण सूचितम्। दक्षिणतोन्यायं याजमानमिति। विपर्ययश्च पित्र्यायां ब्रह्मयजमानयोः शाखान्तरे संनियोगशिष्टस्तस्माद्यजमानवशाद्व्यवस्थेति।

४. ब्रह्मण इति वर्तते। अग्रेण पूर्वेणेत्यर्थः। तथा च कात्यायनः। दक्षिणतो ब्रह्मयजमानयोरासने पश्चाद्यजमानो वेदिस्पृगित्याह।

५. निरस्तः परावसुर्यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तेन सहेति शुष्कं तृणमुभयतः प्रतिच्छिद्य दक्षिणापरमवान्तरदेशं निरस्याप उपस्पृशेत्येतदुपदिष्टम्।

---

[1] A यजमाननिमित्तहेतुको।

६. उपवेशनकर्मापि होत्रा तुल्यम्। अभ्युक्षणनिधानमिदमहमर्वावसोः सदसि सीदामीत्येवमर्थमतिदेशः। सूत्रभेद उत्तरार्थः। कर्मादौ देशपृथक्त्वे चेत्यत्र यथासङ्ख्यं मा भूत्। क्वैतत् ब्रह्मण आसनमित्याकाङ्क्षित आह।

७. समानमनिर्दिष्टमिति सोमे वचनादिष्टिपशुबन्धेषु सोमे च योयः कर्मादिर्यच्च देशपृथक्त्वमेकस्यैव कर्मणो देशभेदेनानुष्ठानं तत्र-तत्रासनसंस्कार उपवेशनं जपश्चेति भवति। संचरः कर्मादिर्देशपृथक्त्वं चाध्वर्यवादवगन्तव्यम्। स परिक्रमाणां क्षेत्रज्ञो भवतीति श्रुतिदर्शनात्।

आसनस्य च संस्कार आसनं च यथोदितम्।
कर्मादौ देशभेदे च तदेवेदं प्रपञ्च्यते ॥ १ ॥
साह्यं चेति चशब्देन साह्यस्याप्यासनस्य च।
साहचर्यं सुयज्ञेन सर्वत्र प्रतिपादितम् ॥ २ ॥
आवृत्तेनैव मन्त्रेण होमे याज्यान्तवर्जिते।
सर्वत्रासनसंस्कारः कात्यायनमतं यथा ॥ ३ ॥
इष्टितन्त्रे पशोस्तन्त्रे यास्तासां नैतदिष्यते।
युक्तमन्यत्र सर्वत्र श्रुत्यन्तरनिदर्शनात् ॥ ४ ॥
न कुर्याद्गार्हपत्यस्य आधाने ऽप्येतरस्य तु।
दृष्टेनैव सहासीत दक्षिणाग्नेर्न विद्यते ॥ ५ ॥
पूर्वेद्युः पुनराधेये कालभेदात्प्रकीर्तितः।
शेषमाधानवत् ज्ञेयं विशेषो नानयोर्यतः ॥ ६ ॥
चातुर्मास्येषु यो वाच्यो विशेषः स इहोच्यते।

प्राकृतेषूच्यमानस्तु वैकृतेष्वातिदेशिकः ॥ ७ ॥
आ विमोकात्प्रणीतानां कृतः सांतपनीयकः ।
न कार्यो गृहमेधीये पूर्णदर्वे तथैव च ॥ ८ ॥
पित्र्यायामादितो वेदेः क्रियायामग्निसंचरे ।
विपर्यये च कर्तव्यस्त्र्यम्बकेष्वपरस्तथा ॥ ९ ॥
उखासंभरणे श्वभ्रे करणे धूपपाकयोः ।
आच्छर्दने सहोदापे महावीरा उखासमाः ॥ १० ॥
निर्ऋतिस्तम्बयजुषोः सीरस्य च नियोजने ।
सोमक्रयादावासीत पदे देशे क्रयस्य च ॥ ११ ॥
परिधाने च शालायां तूष्णीमेव कृतो यतः ।
चयने गार्हपत्यस्य चितिप्रणयने तथा ॥ १२ ॥
चयनादौ पुरीषादौ कुम्भक्षेपे तु चेष्यते ।
प्रवर्ग्यादौ च सर्वत्र अनुव्रज्यासनं ततः ॥ १३ ॥
अनिमित्ते ऽपि कर्तव्यो यत्र रात्रिर्व्यवायिका ।
आदौ तंतमनुव्रज्य घर्मोत्सादे समुच्चये ॥ १४ ॥
अग्निप्रणयने चैवमुक्तो ऽप्रतिरथे यथा ।
वैश्वानरस्य शालायां मारुतानां च तन्त्रतः ॥ १५ ॥
पुनरन्वेत्य होमादौ देशभेदादि हासनम् ।
स्वासनस्थो हविर्धाने सभ्यस्थे चेदनावृत्ते ॥ १६ ॥
आदौ नोपरवाणां तु प्रविष्टो यदि सभ्ययोः ।
आगारमासनस्यैक्यात्तूष्णीमेव सकृत्क्रिया ॥ १७ ॥
औदुम्बर्यास्तु संमाने संस्कारः स्यात्समन्त्रकः ।

आग्नीध्रीये धिष्ण्यकारे सदस्यपि सकृत्क्रिया ॥ १८ ॥
स्वस्थान एव संस्कारो मार्जालीये ऽथ तद्द्वये ।
एष एव विधिर्दृष्टस्तुल्यत्वाद्देशभेदयोः ॥ १९ ॥
हृतो यद्यपि वेद्यर्थे व्यवधानात्पुनःक्रिया ।
अग्नेः सोमस्य नयने अग्नीधः शरणे पुनः ॥ २० ॥
स्वासने चासनं कृत्वा पश्वोरादौ पुनःक्रिया ।
आहृतस्येद्धर्हिस्तन्त्रे यो ऽपि तत्राच वा यदि ॥ २१ ॥
ततः पशुपुरोळाशश्रपणे संनिधानतः ।
कुर्यात्पश्चिमरात्रे च शालायामेव चासनम् ॥ २२ ॥
आज्यग्रहण आग्नीध्रे स्वदेशे च पुनस्ततः ।
कार्यो निवापः सोमस्य हविर्धाने तथासवे ॥ २३ ॥
सदः प्रविश्य कर्तव्यः सर्वत्रैव प्रसर्पणे ।
होमे साध्यं सदा कुर्याद्वाक्यस्याविरोधतः ॥ २४ ॥
मानसादौ च कर्तव्यो रथचक्रे तृणं विना ।
इष्ट्यादौ सर्वहोमादौ पश्वादौ च प्रकीर्तितः ॥ २५ ॥

८. समानं होत्रा तृणनिरसनं तथोपवेशनमित्यतिदिष्टस्यात्र तृणस्य प्रागग्रता विकारः ।

९. बृहस्पतिर्ब्रह्मेत्येवमादिकमोंकारान्तं मन्त्रमुपविश्य जपेत् । अथोपविश्य जपति बृहस्पतिर्ब्रह्मेति श्रुतेः ।

१०. सर्वाणि कर्माणि क्रियमाणानि ब्रह्मणा द्रष्टव्यानि । चकारः पूर्वेण सह समुच्चयार्थः ।

११. मन्त्रवत्सु कर्मसु क्रियमाणेषु ब्रह्मा वाग्यमनं कुर्यात् ।

तस्माद्यावदृचा यजुषा साम्ना कुर्युस्तूष्णीं तावद्ब्रह्मासीतेति श्रुतेः।

१२. ऋत्विजामयं नियमः। बहुत्वयुक्तेन वाक्येन प्रकरणस्य बाधितत्वात्। सर्वेषां वेति च दर्शनात्। सर्वासु गतिषु समन्विकासु। मन्त्रवत्स्विति प्रकृतत्वात्। येन प्रकारेण व्रजन्ति। यथा आनुपूर्व्या देशान्तरमृत्विजो गच्छन्ति। ततो देशादन्येन प्रकारेण समागन्तव्यम्। यथा मैत्रावरुणप्रभृतयः सदः प्रविष्टा अच्छावाकप्रभृतयो निःसर्पन्ति। एवमन्यास्वपि गतिषु द्रष्टव्यम्। [1]सर्वशब्दात्सर्वासु समन्विकासु। असमन्विकासु चेत्यपरे। कुतः। अयं प्रत्यागमननियमः शाखान्तरात्।

१३. अग्निप्रणयनं विशिष्टधर्मकमुक्तमेव। तस्मिन् क्रियमाणे ब्रह्मानुसमियात्।

१४. स यदा इध्मः संभारेषु प्रतिष्ठाप्यते तदा ब्रह्मणोऽप्युपवेशनम्।

१५. प्रत्यङ्दक्षिणाग्न्याधेये ब्रह्मणो ऽर्थो भवति। तत्रापि सदेशेनोपवेशनमित्यनेन संबन्धेनेदमायातम्।

१६. सर्वेषां चाग्न्याधेयिकानामृत्विजामर्थो भवति।

१७. कर्मानुज्ञापनार्थमामन्त्रितो ब्रह्मन्निति संबुद्ध्यन्तेन[2] संबोधित ओमिति प्लुतमुक्त्वा[3] यथाकर्म प्रसौति। यद्यत्पृष्टस्तत्तदेवानुजानाति।

---

[1] C om. सर्वशब्दात्। [2] A C सबुध्यन्तेन, B संबुद्धा ते। [3] B C व्रतम॰।

७.

१. प्रणीताप्रणयनकाले ब्रह्मणो वाग्यमनं भवति। कालवचनादसत्यपि प्रणयने भवति । प्राक् पात्रासादनात्प्रकृतिवत् ।

२. हविष्कृदेहीत्युच्यमाने वाग्विसर्गो ब्रह्मणः । प्रणीतासु प्रणीयमानासु वाचं यच्छत्या हविष्कृत उद्वादनादिति श्रुतेः । पशौ हविष्कृतो ऽभावात्प्रणीताप्रणयने वाचं यत्नावधेरभावादनन्तरमेव विसृजेत् । ननु पशुपुरोलाशे हविष्कृदस्ति । सो ऽवधिर्भविष्यति । सत्यम् । पश्वर्थप्रणीतासंयोगेन वाग्यमनं कृतम् । न च तत्र हविष्कृदस्ति । अत एवोक्तं संयोगाद्व्यवतिष्ठत इति ।

३. इष्टे च स्विष्टकृति ब्रह्मणो वाग्यमनम् । किमवधिकम् । उच्यते । अनुयाजप्रसवेन वाग्विसर्गः । वक्ष्यति । ओं प्रतिष्ठेति प्रसौतीति सो ऽनुयाजप्रसवः । इष्टे च स्विष्टकृत्यानुयाजानां प्रसवादिति श्रुतेः । वाग्यमावधिनियमः ।

४. प्राशित्राख्यमवदानमध्वर्युणा पात्रस्थमाहृतं मित्रस्य त्वेत्यादिना मन्त्रेण ब्रह्मा प्रतीक्षते ।

५. प्रतीक्षणादनन्तरं देवस्य त्वेत्यादिना मन्त्रेण प्रतिगृह्णाति । तदञ्जलिना प्रतिगृह्णातीत्याश्वलायनसूत्रम्[1] ।

६. प्रतिगृह्य ततः पृथिव्यास्त्वेत्येवमादिना मन्त्रेण प्राग्दण्डं भूमौ स्थापयेदपोह्य दर्भान् । तद्गुह्य तृणानीति (६.१ ४) श्रुतेः ।

७. निधानादनन्तरमुपकनिष्ठिकयाङ्गुष्ठेन च प्राशित्रं गृह्णीयात्स पात्रम् ।

---

[1] From तदञ्जलिना to °सूत्रम् om. in C.

८. तत आदाय पात्रादग्नेष्ट्वास्येन प्राश्नामीत्यनेन मन्त्रेण प्राश्नीयादसंचूर्णयन्। दन्तैरनुपस्पृशन्नित्यर्थः।

९. प्राशित्रं प्राश्याचामेच्छान्तिरसीत्यनेन मन्त्रेण।

१०. आचमनादनन्तरं वक्ष्यमाणान्प्राणान्वक्ष्यमाणैर्मन्त्रैः संमृशति। ननु उभयं यदि सर्वमेव वक्ष्यमाणं को ऽस्य सूत्रस्यार्थः। उच्यते। प्राणसंमर्शनसंज्ञाकरणम्। अतो यत्रयत्रोच्यते समानं प्राणसंमर्शनमिति तत्रतत्रैतदुपस्थापितं भवति।

११. प्राणपा असीत्येवमादिना मन्त्रेण युगपन्नासिकाविवरप्रदेशं मुखविवरप्रदेशं च सलोमकं दक्षिणेन पाणिना संमृशेत्।

१२. चक्षुष्पा इत्येवमादिना मन्त्रेण चक्षुषी युगपत्संमृशेत्।

१३. श्रोत्रपा असीत्येवमादिना मन्त्रेण श्रोत्रे संमृशेत्। प्रतिश्रोत्रं मन्त्रावृत्तिः। युगपत्संमर्शनाशक्तेः।

१४. इन्द्रस्य त्वेत्येवमादिना मन्त्रेण नाभिमभिमृशेत्।

१५. को ऽदात्कस्मा अदादित्येवमादिना मन्त्रेणान्वाहार्यं ब्रह्मा प्रतिगृह्णीयात्। उपस्पृशतीतरदिति वचनादुपस्पृशन्।

१६. ब्रह्मा प्रकृत एव अध्वर्युणा ब्रह्मन्प्रस्थास्यामीति प्रचोदितः किं कुर्यादित्यत आह।

१७. देव सवितरित्येवमादिकं मन्त्रं जपित्वा ततः उत्तमया वाचा ओं प्रतिष्ठेति प्रसुयात्। ओकारो ऽत्र प्लुतः। अचोहः। तेन यज्ञपतौ इति द्वियजमानके। तेन यज्ञपतीनिति बहुयजमानके। तथा बृहस्पतिर्ब्रह्मेति तस्मिन्नपि मन्त्रे। स यज्ञपतौ इति द्वियजमानके। स यज्ञपतीनिति बहुयजमानके।

१८. प्रणीतासु विमुक्तास्वस्मिन्नवधौ ब्रह्मण उत्सर्जनमव्यावर्तनादीनां[१] नियमानाम्। क्वचित्कर्मान्तरेऽन्यस्मिन्प्रणयनमन्यस्मिन्विमोकः। यथा सांतपनीयाप्रणीतानां दर्विहोमान्ते विमोकः। यथा च महाहविःप्रणीतानां त्र्यम्बकान्ते। यथा चाग्निचित्यायामहरन्ते विमोकः। अन्तरोपसदौ चिनोतीति श्रुतेः। एवमादिषु ब्रह्मण आ विमोकादनुत्सर्ग।

१९. ब्रह्मभाग इति समाख्यात आध्वर्यवे। ब्रह्मभागो यजमानभाग इति। तस्य प्रणीतासु विमुक्तासु ब्रह्मणा प्राशनं कार्यम्।

८.

१. इष्टिपशुबन्धाधिकारोऽनुवर्तते। अदब्धेनेत्येवमादिना मन्त्रेणाज्यमवेक्षते पत्नी। कुतः। शाखान्तरात्[२]। शाखान्तर एव चावेक्षयितुरुपदेशात्तत्प्रयुक्तमवेक्षणम्[३]। अतश्च यूपाक्त्यादिषु न भवत्यवेक्षणम्। अग्नेर्जिह्वासीत्ययमौपमिकस्य आज्यस्य गुणस्तेन विकारेष्वनूह्यः। आत्मार्थो लिङ्गात्। अतो मुख्यः कुर्यात्परार्थानीत्ययं न्यायो न भवति।

२. आज्यमवेक्षत इत्यनुवर्तते। तेजोऽसीत्येवमादिना मन्त्रे-

---

[१] A C (see h) मभ्यावर्तना॰। [२] om. in A। [३] A adds असंस्कृतेन यूपाञ्जनिहोम इति कात्यायनः।

णाज्यमवेक्षते यजमानः । वेद्यासादनमध्वर्युकर्तृकं । तस्मिन्निवृत्ते । अतो न यूपाकृत्यादिषु । परार्थः । आशीर्योगाभावात् । इत उत्तरं यजमामाधिकारः ।

२. वाचं यच्छतीति सूत्रान्तः । खण्डशस्तूच्यन्ते । क्रमवर्तित्वाद्वाचः । ध्रुवा असदन्नित्येवमादिना मन्त्रेणाभिमृशेद्धवींषि सहाज्यैर्बहुवचनात् । आसन्नानि । आसादनक्रमेणेत्यर्थः । अत्र न्यायविदः प्रत्येकं मन्त्रावृत्तिमिच्छन्ति । तेषामसमवेतार्थत्वात्प्रकृतौ विकारेष्वनूहः । याज्ञिकास्तु सकृदुच्चारितेनैव सर्वेषामभिमर्शनमिच्छन्ति । तेषां समवेतार्थत्वाद्विकारेषु यथार्थमूहः । ध्रुवा असदन्ध्रुवाण्यसदन्नित्यर्थः । यदा त्वेकं तदा ध्रुवमसदत् । यदा द्वे तदा ध्रुवे असदताम् । ता विष्णो पाहि तानि विष्णो पाहीत्यर्थः । तत एकहविष्के तद्विष्णो पाहि । द्विहविष्के ते विष्णो पाहि[1] । यज्ञपतिशब्दो यजमानवचनस्तस्य विकारेषु यथार्थमूहः । यज्ञपती द्वियजमानके । यज्ञपतीन्बहुयजमानके । देशकालयोस्तु भेदे[2] पृथगभिमर्शनम् । तद्यथा । वरुणप्रघासेषु दक्षिणोत्तरयोर्विहारयोर्देशभेदात् । पश्वाज्यानां वपायाः पुरोलाशस्याङ्गानां च पृथक्पृथक्कालभेदात् । पश्वङ्गाभिमर्शने यद्यपि बह्वन्यङ्गानि तथाप्येकप्रदानत्वादेकवचनम् । कुतः । तयोर्नानैव हविषी श्रपयित्वेति दर्शनात् । सौत्रामण्यां सुराग्रहाणामभिमर्शनं पुरोलाशविकारत्वात् । पयोग्रहाभिमर्शनं सांनाय्यविकारत्वात् । अवभृथहविषो नाभिमर्शनमासादनाभावात् ।

---

[1] C (orig) om from द्विहविष्के to पाहि and adds (in marg) यज्ञो द्विसुत्याके । यज्ञान बहुत्वे । [2] C तुल्यभेदे ।

परार्थो ऽयम्। कुतः। अत्र हि यजमानो हविःपालनाय विष्णुमधीच्छति।

४. हविरभिमर्शनादनन्तरं यजमान आत्मानमुपस्पृशेत्पाहि मामित्येवमादिना मन्त्रेण। हृदयदेशस्याभिमर्शनमात्मायतनप्रसिद्धेः। भिन्नकाले हविरभिमर्शने सर्वान्तस्यानन्तरमात्मोपस्पर्शनं प्रकृतिवत्। आत्मार्थो ऽयम्।

५. आत्मोपस्पर्शनादनन्तरं वृष्टिरसीत्येवमादिना मन्त्रेणाचामेत्। एतावानेव मन्त्रो मा विशायीति सकलपाठः। प्रत्यागाशीर्योगादात्मार्थः।

६. आचमनादनन्तरमग्ने व्रतपत इत्येवमादिना मन्त्रेणाहवनीये समिधमाधाय वाग्यमनं कुर्यात्। अत्र हि यजमानेनाहवनीयो ऽधीष्यते[1]। हे भगवन्नग्ने व्रतपते दुःशकमप्येतद्व्रतं त्वत्प्रसादादहं चरिष्यामि। तत्र मे शक्तिरपरिहीणा भवतु। तच्च मे यथाभिलषितफलसंपत्त्या समृध्यताम्। यत इदमनृतान्मानुषात्सत्यं देवत्वमहमुपैमि। मनुष्येभ्यो देवतामुपैमीत्यर्थः। ततश्च सत्यानृतयोरिहान्यार्थत्वात्सत्यपि सत्यवादित्वे व्रतत्वेनाभ्युपगते चातुर्मास्यादिष्वपि प्रयोक्तव्य एवायं मन्त्रः। वरुणप्रघासेष्वाहवनीयद्वित्वे ऽन्यतरस्मिन्समिदाधानमुपैमीत्यभ्युपगतत्वात्। अवभृथे त्वभाव एवैवमादेर्यथा सोम इति वचनात्। सांतपनीया चेत् पूर्वकारिवशात् समिष्टयजुरन्ता ततस्तत्राविमुक्तत्वान्न गृहमेधीयायां व्रतग्रहणम्। सोमा-

---

[1] C °षीष्यते; sec. h °ध्येष्यते। A B °ष्यते।

न्तस्तन्त्रे न व्रतग्रहणं कृतत्वात्। तथा च कात्यायनः। अग्न्यन्वाधानव्रतोपायनारण्यभोजनदानब्रह्मवरणानि दीक्षणीयाप्रभृति प्रागुदवसानीयाया न भवन्ति[1] सोमे कृतत्वादिति। पित्र्यायां न व्रतग्रहणं महाहविषो ऽन्तर्भावात्। आत्मार्थं व्रतग्रहणं वाग्यमस्य। पुरुषार्थत्वात्। आचमनव्रतग्रहणयोः साहचर्यम्। मेध्यो भूत्वा व्रतमुपायानीति शतपथे श्रुतत्वात्।

७. अग्ने वायवित्येवमादिकं मन्त्रं जपन्मन्त्रार्थं मनसा ध्यायेत्। हे अग्न्यादयो देवा वो युष्माकं सलोकतामहं प्राप्नुयामिति। अकामो ऽप्युपदेशसामर्थ्यात्। प्रधानयागानन्तरमयं जपो ऽनिर्दिष्टस्थानत्वात्। आत्मार्थं आशीर्योगात्।

८. यत्कामो वा यजमानः प्रधाने भवेत्तं कामं ध्यायेत्सलोकतां व इत्यस्य पदद्वयस्य स्थाने। तद्यथा। कारीर्याम्। अग्ने वायो विद्युच्चन्द्रमो वृष्टिमशीयेति।

९. अनुपदस्यमित्येवमादिकं मन्त्रं जपन्नाकाशं समुद्रं वा मनसा ध्यायेत्। अस्यार्थ उच्यते। अनुपदस्यं न उपदस्यतीत्यनुपदस्यम्। अनुपक्षयार्हमित्यर्थः। किं तत्। अन्नाद्यम्। आप्नवानीति प्राप्नुयामहमित्यर्थः। उपदेशसामर्थ्यात् कामान्तरेष्वपि। निष्कामो ऽपि यथोक्तं ध्यायेत्। आत्मार्थं आशीर्योगात्।

---

[1] C. om. न भवन्ति का० ८. १ ४ ।

९.

१. मयीदमित्येवमादिकं मन्त्रं यजमानो जपेदुपहूतो ऽयं यजमान इत्येवमादाविलोपह्वानशेषे पठ्यमाने। ननु इलायामुपहूयमानायामित्युक्ते कुतो ऽयं विशेषः। उच्यते। शतपथात्। अथ यत्राशिषमाशास्ते तज्जपति मयीदमिन्द्र इत्यादि। आत्मार्थ आशीर्योगात्।

२. अश्न पिन्वस्वेत्यादिको राध्यासमित्यन्तः प्रथमो मन्त्रः। अत्र पितर इत्यादिक आवृषायध्वमित्यन्तो द्वितीयः। आभ्यां मन्त्राभ्यां पुरोलाशमभिमृशेद्बर्हिषदमध्वर्युणा कृतं सन्तम्। द्वितीयो मन्त्रः प्राचीनापवीतिना प्रयोक्तव्यः[1]। पित्र्यत्वात्। आत्मार्थः पूर्व आशीर्योगात्। अत्र केचिदध्वर्यवश्चतुर्धाकृतस्य पुरोलाशस्य व्यादेशं कारयन्ति। इदं ब्रह्मणः। इदं होतुः। इदमध्वर्योः। इदमाग्नीध्रस्येति। अस्य चावधौ[2] राध्यासमित्येवमन्तेन यजुषाभिमर्शने कृते। एतदपि याजमानं शाखान्तरात्।

३. कृत्वाभिमर्शनं ततः पात्र्यामवधाय पुरोलाशममीमदन्तेत्येवमादिकं मन्त्रं प्राचीनापवीती जपेत्।

४. प्रजापतेर्भागो ऽसीत्येवमादिना मन्त्रेणान्वाहार्यं ददद्यजमानो ऽभिमृशेत्। दक्षिणामभिमृशेत्यवचनाच्चान्यस्यां दक्षिणायामेतत्। अत्रोहः। द्वियजमानके। अक्षितिरसि मा नौ क्षेष्ठाः। बहुयजमानके। अक्षितिरसि मा नः क्षेष्ठाः। अस्य कर्मण एषा दक्षिणेति याज्ञिकप्रसिद्धा सर्वत्र वक्तव्यम्। परार्थः।

---

[1] B प्रोक्तव्य.। [2] C अवमशो।

५. अनुयाजेष्विष्टेष्वित्यनेनोभयं प्रतिपाद्यते। सत्यनुयाजयागे व्यूहनमिष्टेषु चानुयाजेष्विति व्यूहति प्रेरयतीत्यर्थः। स्रुचौ वक्ष्यमाणे। ननु तस्मादेव सिद्धम्। सत्यम्। अधिकानां प्रतिषेधार्थमेतत्। कथं व्यूहति। अग्नेरग्नीषोमयोरित्यादिना मन्त्रेण जुह्वं प्राचीं गमयति दक्षिणेन हस्तेनोत्तानेन। अग्निरग्नीषोमावित्यादिना मन्त्रेणोपभृतं प्रतीचीं गमयति न्युब्जेन सव्येन हस्तेन। आत्मार्थं आग्नीर्ध्रयागात्। ततोऽनेकयजमानके सर्वे सह कुर्युः। अग्रतश्चान्वारभेयुर्मन्त्रं ब्रुवाणाः।

६. याया प्रधानदेवता[1] तांतामुपलक्ष्य व्यूहनं कार्यम्। प्राप्तमेवैतददीक्षितायनार्थममावास्यार्थं चोच्यते।

७. पूर्वं गृहपतेरिति यः पत्नीसंयाजेषूक्तः सोऽत्रावधित्वेन गृह्यते। तस्मिन्ननिष्टे गार्हपत्ये स्रुवेण जुहुयादेवमेव शाखान्तरे श्रुतत्वात्। प्राग्गृहपतेरिति नोक्तम्। यत्रैव गृहपतियागस्तत्रैवैता आहुतयो यथा स्युरिति। आहुतिधर्मा होमद्रव्यं च परिभाषासिद्धम्। मन्त्रानिदानीमाह।

१०.

१. प्रथमा द्वितीयेषु पराक्रमध्वं[2] द्वितीयास्तृतीयेषु पराक्रमध्वं तृतीयाश्चतुर्थेषु पराक्रमध्वं चतुर्थाः पञ्चमेषु पराक्रमध्वं पञ्चमाः

---

[1] A C (sec. h) यथाप्रधान। [2] B adds वरुण धर्माणामधिपते इन्द्र ज्येष्ठानामधिपते प्रजापते प्रजानामधिपते देवा देवेष पराक्रमध्वम्।

षष्ठेषु पराक्रमध्वं षष्ठाः सप्तमेषु पराक्रमध्वं सप्तमा अष्टमेषु पराक्रमध्वं अष्टमा नवमेषु पराक्रमध्वं नवमा दशमेषु पराक्रमध्वं दशमा एकादशेषु पराक्रमध्वम्। ईदृशस्य शाखान्तरे पठितस्य प्रयोक्तव्यस्य संक्षेपमाह।

२. एवं सङ्ख्यानुपूर्व्येण प्रत्यादायोत्तरं प्रथमया विपरिणम्य ततः सप्तम्यन्तेन संदधदेकोत्तरमेकोच्चयेनेत्यर्थः। आ एकादशभ्यो यावद्दशमा एकादशेषु पराक्रमध्वम्। ततः।

३. अग्ने पृथिव्या इत्यारभ्य स्वाहाकारान्तो मन्त्रः। अयमित्यस्य स्थाने यत्कामो यजमानस्तं ब्रूयात्। यद्यथा। स्वर्गप्राप्तिर्मे समृध्यताम्। स्वर्गो मे कामः समृध्यतामित्यपरे।

४. प्रजापते न त्वदेतान्यन्य इत्यनया चतुर्थी होतव्या। सङ्ख्यावचनं नियमार्थम्। अनेकयजमानके ऽपि न प्रतियजमानं[1] होमः। ऊहस्तूच्यते। अयं नौ कामः द्वियजमानके। अयं नः काम इति बहुयजमानके।

११.[2]

१. आ प्यायतामित्येवमादिना मन्त्रेण यजमानः समिष्टयजुर्होमसंनिधौ स्रुचमाज्येनाप्याययेत् परार्थः[3]।

---

[1] A °म। [2] A adds विमार्था। आप्यायतां° द्भ्यः सूर्याया° म् यज्ञंयज्ञं तां तामाकृतिं प्रति। देवयद्भ्यो देवान्यष्टुमिच्छद्भ्यः पर्याप्तेन घृतेनेयं ध्रुवा आ प्यायताम्। पुनःपुनः पूर्यताम्। सूर्यायाः सूर्यपत्न्या उषाया गोरूपधारिण्या ऊधः पयःपूर्णस्तनसंघात इव आप्यायतां। किं च। अदित्या वेदिरूपायाः पृथिव्या उपस्थे वर्तमाना ध्रुवा उरुधारा महाधारा पुनःपुनः सिच्यमानाभिराज्यधाराभिर्वर्धिता भवत एव। [3] C ध्रुवाम् instead of स्रुचम् In marg. ध्रुवं घृतेन पूरयित्वा ध्रुवाभिधां स्रुचं वर्धयति।

२. अध्वर्युकर्तृकः समिष्टयजुरित्याख्यो होमः । तत्र यजमानः पात्रमन्वारभते । सामर्थ्यात्परार्थः ।

३. सदसि सन्न इत्येवमादिना मन्त्रेण पूर्णपात्रमध्वर्युसमर्पितमभिमृश्य यास्तत्रापस्ताभिर्दिशो व्युदुक्षति । वक्ष्यमाणकैर्मन्त्रैस्ता अभिषिञ्चतीत्यर्थः । आत्मार्थ आशीर्योगात् ।

४. वक्ष्यति । सकृत्सकृन्मन्त्रेण द्विर्द्विस्तूष्णीमिति । अतश्च प्राच्येत्येवमादिना मन्त्रेण प्राचीं दिशं व्युदुक्षति । मन्त्रलिङ्गात् । मन्त्रेणैकवारममन्त्रकं द्विः ।

५. अपसव्यं कृत्वा पूर्ववद्दक्षिणां दिशं व्युदुक्षति । दक्षिणयेत्येवमादिना मन्त्रेण ।

६. प्रतीच्येत्येवमादिना मन्त्रेण प्रतीचीं दिशं व्युदुक्षति। यज्ञोपवीती पूर्ववत् ।

७. उदीच्येत्येवमादिना मन्त्रेणोदीचीं दिशं व्युदुक्षति पूर्ववत् ।

८. ऊर्ध्वयेत्येवमादिना मन्त्रेणोर्ध्वां दिशं व्युदुक्षति । मन्त्रलिङ्गात् । इतिकरणो मन्त्रान्तप्रदर्शनार्थः । अर्थभेदात्तु प्रतिदिशं यथोक्तो मन्त्रभेदः ।

९. उक्तार्थमेतत् । पूर्णपात्राभिमर्शनमाशीर्योगादात्मार्थम् । दिशां व्युदुक्षणमपि तत्संयोगात् ।

१०. विष्णुक्रमान् क्रमत इत्येवमन्तं सूत्रम् । स्यवन्तानि खण्डशो व्याख्यायन्ते। क्रमार्थस्त्वायं प्रत्ययः। आपो हि ष्ठा मयोभुव इत्येवमाद्याभिस्तिसृभिर्व्युदुक्षणशेषा अपो ऽभिमृश्य ।

११. अच्छायं वो मरुतः श्लोक एतु। ययोरोजसा स्कभिता

रजांसीत्याभ्यां मन्त्राभ्यां ता अपः प्राचीर्निनीयोदीचीर्वेति दिग्विकल्पः ।

१२. समुद्रं व इत्येवमादिना मन्त्रेण प्रकृता अपो ऽभिमन्त्रयेतानुपस्पृशन्[1] । अभिमन्त्रणं तदभिमुखेन भक्त्या मन्त्रोच्चारणम् ।

१३. शं नो देवीरभिष्टय इत्येवमाद्याभिस्तिसृभिरपो ऽभिमृशेत् ।

१४. समिन्द्र णो मनसा नेषि गोभिः संवर्चसेत्याभ्यां मन्त्राभ्यां प्राणानुपस्पृशेत् । अङ्गलोकेन क्रमेण ।

१५. अनु न इत्येवमादिना मन्त्रेण मुखमण्डलं पाणिना विशोधयति ततः ।

१२.

१६. विष्णुक्रमाख्यं क्रमणं करोतीत्यर्थः । क्व पुनस्तत्करोतीत्यत आह ।

१. वेदेर्या दक्षिणश्रोणिदेशो दक्षिणापरः कोणः । तस्मादारभ्य क्रमते तावद्यावदाहवनीयः ।

२. स्थानाद्दक्षिणं पादं गमनाभिमुखमुद्यम्य वेदेस्त्रिभागमात्रे स्थापयेत् । दिवि विष्णुरित्येवमादिना मन्त्रेण । तस्मादध्वनो हीनतरं सव्यं स्थाययेत् ।

३. अन्तरिक्षे विष्णुरित्येवमादिना मन्त्रेण द्वितीयं क्रमणं कुर्यात् ।

---

[1] B अप उपस्पृशन् अ० ।

४. पृथिव्यामित्येवमादिना मन्त्रेण तृतीयं क्रमणं कुर्यात् ।

५. दिक्षु विष्णुरित्येवमादिना मन्त्रेण तिर्यक्पादं निदधाति। न तु क्रामति परस्मैपदोपदेशात् ।

६. तमहमित्येवमादिक[1] उदर्को वाक्यशेषः । समानस्तुल्यः । सर्वेषु मन्त्रेषु प्रयोक्तव्य इत्यर्थः ।

७. अगन्म स्वरित्येवमादिना मन्त्रेण प्राचीं दिशमीक्षते ।

८. ईक्षत इत्यनुवर्तते। सं ज्योतिषाभूमेत्यनेन मन्त्रेणाहवनीयमीक्षते। वरुणप्रघासेष्वाहवनीयौ द्वौ। तयोर्द्वयोरपीक्षणमविशेषात्। ऊहस्तु न भवति। ज्योतिःशब्दस्य दीप्तिवाचकत्वात्।

९. ईक्षत इति वर्तते। समहमित्येवमादिना मन्त्रेण प्राचीमेव दिशमीक्षते। एवकारान्न पूर्वेण सह विकल्पः।

१०. जपतीति सूत्रच्छेदः। ल्यबन्तानि तु खण्डशो व्याख्यायन्ते। एवं च निर्देशः क्रमार्थः। स्वयंभूरित्येवमादिना मन्त्रेणादित्यमुपतिष्ठते। दर्शनगोचरं गत्वा। कुत एतत्। अथान्वेवेत्येवमादिना ग्रन्थेन महाव्रते विशेषात्।

११. ऐन्द्रीमावृतमित्येवमादिना मन्त्रेण दक्षिणं बाहुमावर्तमानमन्वावृत्य। होतृवदिति नोक्तम्। तत्रावर्तनमात्रमत्र तु भ्रमणमिति विशेषात्[2]।

१२. सव्यावृद्भूत्वा एत्य गार्हपत्यमुपतिष्ठत इति शेषः। कथमुपतिष्ठते तूष्णीं मन्त्रेण वेत्यत आह।

१३. अग्ने गृहपत इत्येवमादिको मन्त्रो गार्हपत्योपस्थाने।

---

[1] C ॰त्येवमादिना। [2] C ॰मविशेषात्।

अमुष्यादित्यस्य स्थाने पञ्चम्यन्तं पुत्रनाम गृह्णीयात्। प्रत्येकम्। सर्वेषां तु पुत्राणाम्। नामानीति बहुवचनात्। नामग्रहणप्रयोग उच्यते। अस्थूरि नो गार्हपत्यानि सन्तु शतं हिमा मह्यं देवदत्तात्। अस्थूरि॰ मह्यं यज्ञदत्तात्। एवं यथापुत्रमस्थूर्यादेरावृत्तिः सामर्थ्यात्।

१४. भूर्भुव इत्यादिना मन्त्रेणास्य प्रकृतस्य गार्हपत्यस्याङ्गारमुपस्पृशेत्।

१५. यशो बभूवेत्येवमादिकं मन्त्रं स्वदेशे स्थितो जपेत्।

१६. यथा प्राग्वृतग्रहणात्।

१७. अग्ने व्रतपत इत्येवमादिना मन्त्रेणाहवनीये समिधमादध्यात्।

१८. विसृष्टवागनन्तरं कुर्यात्।

१३.

१९. यो नो दूर इत्येवमादिना मन्त्रेणाहवनीयस्य सक्तानि विद्यमाणि तृणकाष्ठादीनि दग्धशेषाणि तस्मिन्नाहवनीये प्रक्षिपेत्।

२०. गोमाँ अग्ने ऽविमाँ अश्वी यज्ञ इत्येवमादिकं तृचं यजमानदेश आसीनो जपति।

१. प्रजातिकाम इति सूत्रान्तः। त्र्यवन्तानि तु खण्डशो व्याख्यायन्ते। उद्वयं तमसस्परि। तच्चक्षुर्देवहितं शुक्रमुच्चरत्। संदृशस्त इत्येवमादिकं यजुः। एतैस्त्रिभिर्मन्त्रैरादित्यमुपस्थाय।

२. यथा पूर्वमुक्तं दक्षिणं बाहुमन्वावृत्येति।

३. सव्यावृत्त्योपविश्य ततः।

४. इदं हविरित्येवमादिना मन्त्रेण पयोभक्षं कुर्यात्। प्रजातिकामः प्रसूतिकाम इत्यर्थः।

५. संभूतिर्वृद्धिस्तामिच्छन् संबुभूषन्नित्युच्यते। दधिक्राव्णो अकारिषमित्यनेन मन्त्रेण दधिभक्षं कुर्यात्। वाशब्दात्समुच्चयप्रतिषेधः।

६. सं यज्ञपतिराशिषा। अनेन मन्त्रेण यः समाख्यातो यजमानभाग इति तं प्राश्नाति।

७. प्रवसति सति यजमाने समिष्टयजुषा सहाध्वर्युर्जुहुयात्। न प्रातिनिधिकः[1]। पत्नी वा भक्षयेत्। एवमर्थो होमोपदेशः।

१४.

१. यजमानाधिकारो ऽनुवर्तते। अग्निहोत्रदर्शपूर्णमासचातुर्मास्यादीनि कर्माणि मुमूर्षोर्यजमानस्य यथाचोदितकालानपेक्षया[2] जीवतो यजमानस्य शीघ्रं प्रधानकरणमात्रेणापि संस्थाप्यानि।

२. यद्यपि प्रक्रान्तापरिसमाप्ते[3] कर्मणि यजमानो म्रियते तथापि तदन्तं तत्कर्म। नास्ति तस्य समापनम्। समापयितुरभावात्।

३. एवमाद्याः क्रिया नैरन्तर्येण हत्वोपोषन्त्यग्निभिः। ताः क्रियाः क्रमेणोच्यन्ते। यानि यत्र प्रक्रान्ते कर्मणि हवींषि संभवन्ति तानि तत्र यो ऽयं आहवनीयो मुख्यस्तत्कार्ये वा वर्तते तत्र प्रक्षेप्तव्यानि।

---

[1] B ॰निधिका। [2] B ॰कालयोरपेक्षया। [3] B प्रक्रान्ते ऽपरिसमाप्ते।

४. संहार्य वापयित्वेत्यर्थः। रोमनखानीति रोमशब्दः केशश्मश्रोरप्युपलक्षणार्थः। प्रेतग्रहणं पत्न्या अपि पूर्वमारिण्याः क्रियार्थम्।

५. आप्लुत्य[1] प्रेतमनुलेपनपुष्पादिभिरलंकृत्य। एतद्गृहे कृत्वा अन्यद्वक्ष्यमाणदेशे कर्तव्यम्। कः पुनः स देश इत्यत आह।

६. किं कुर्यादित्यत आह।

७. इत उत्तरं प्राचीनावीतिना कर्तव्यम्। कुत एतत्। आचारार्थवादमन्त्रलिङ्गेभ्यः। अपेत वीत वि च सर्पतात इत्यादिना पूर्वोक्तं देशं पलाशशाखया विमृज्य।

८. स्फ्येन करणभूतेन उन्मृज्य उद्धृत्येत्यर्थः। अभ्युक्ष्य। अद्भिरुपसिच्येत्यर्थः। कृत्वैवं देशसंस्कारं ततः।

९. प्राग्दक्षिणाभिमुखीं प्राग्दक्षिणाग्रैः काष्ठैश्चितिं[2] कृत्वा।

१०. तस्या एव काष्ठचितेः पुरस्तादाहवनीयं निदध्यात्। पश्चाद् गार्हपत्यं दक्षिणतो दक्षिणाग्निम्। गृह एवोद्धरणं कृत्वा शकटेन नीयन्ते। अग्नयो यजमानस्य शाखान्तरात्[3]।

११. काष्ठचितिमारोपयितुं गार्हपत्यं दक्षिणाग्निं चान्तरेण यजमानशरीरं नयेत्। ननु प्राप्त एव न्यायतो यजमानस्य संचरः। उच्यते। प्रवासे मृतस्याहृतस्य व्यवेतो ऽग्नीन् प्रवमति तेन चैवोत्सृज्यत इत्याहवनीयं दक्षिणाग्निं चान्तरेणाहरणाशङ्का स्यात् तन्निवृत्त्यर्थं वचनम्।

---

[1] A C आप्लाव्य। [2] Com. काष्ठैः। [3] A om. the words from गृह to शाखान्तरात्।

१२. काष्ठचितौ उत्तानं शवं निपात्य ततः ।

१३. दक्षिणतश्चितेः पश्चाद्वा गां चानुस्तरणीमजां वा । अनुस्तरणीति तस्याः संज्ञा । वक्ष्यति । अनुस्तरण्या गोश्चर्माधिषवणमिति । अजां छागीं रोहिणीमेव । अनयोरन्यतरां दक्षिणामुखीं प्रोभ्य प्रकर्षेण गले गाढं बद्ध्वेत्यर्थः । ननु उभः कुम्भपूरणे स्मर्यते । सत्यम् । अनेकार्था हि धातव इत्यदोषः । प्रयोगश्च संदृश्यते । दासा यदीं सुसमुब्धमवाधुरिति । ननु छान्दसप्रयोगदर्शनात्तत्रैवायं साधुः कथं सूत्रकारेण प्रयुक्तः । उच्यते । वेदार्थव्याख्योन्मुखानां नायं दोषः ।

१४. तस्या अनुस्तरण्या जीवन्त्याः संज्ञप्ताया वा वृक्कावूरुसंलग्नावूरुभ्यामुद्धरेत् । पृष्ठतः पृष्ठेनेत्यर्थः ।

१५. तौ वृक्कौ दक्षिणाग्रावीषदुष्णौ कृत्वा तत अति द्रव सारमेयौ श्वानाविति द्वाभ्यामृग्भ्यां हस्तयोः प्रेतस्य निदध्यात् । अनाहिताग्नेरौपासने ऽन्वाहार्यविकारत्वात्[1] । पिण्डपितृयज्ञवदिति सर्वमेतद्भवतीति वृद्धसंप्रदायः ।

१६. प्राणायतनानि[2] मुखं नासिके चक्षुषी कर्णौ तेष्वेकैकं हिरण्यशकलं निदध्यात् ।

१७. अग्नेर्वर्म परि गोभिर्व्ययस्वेत्यनया ऋचा अनुस्तरणीवपया शवस्य मुखमण्डलं प्रच्छाद्य ततः ।

१८. दक्षिणे हस्ते ऽग्राण्याग्नेय्यभिमुखानि कार्याणि प्रेतपादौ चेति देवयुवं जुहूमाग्नेय्यग्रां सादयतीति शेषः[3] । जुह्वादीन्यमनेकत्व-

---

[1] B C (in marg.) पूर्वाभिकारत्वात् । [2] B om. प्राणायतनानि । [3] C has only दक्षिण हस्ते जुहूं सादयतीति ; in marg. आग्नेय्यग्रां । देवयुवं corrected A देवय ।

संभवे सर्वेषां यथास्थानं प्रतिपत्तिरविशेषात्। सत्त्रेषु सत्त्रिणां साधारणान्यन्यानि पात्राणि भवन्ति। तेषां सत्त्रान्त उत्सर्गः। तादर्थ्यात्[1]। अतश्च सत्त्रिणो मृतस्य स्वैरेव पात्रैर्दाहः। अपि वान्यानि पात्राणि साधारणानि कुर्वीरन्निति मीमांसकाः। संस्थितदर्शपूर्णमासस्य कृतप्रयोजनान्यपि धारयेद्दाहाय। अनाहिताग्न्यग्निहोत्रायणिनोः स्थालीपाकपूर्णाहुतिस्रुचौ जुह्वविकारत्वात्। घृतेन पृषदाज्येन च पूरयित्वा सादयेच्छ्रुत्यन्तरात्। आनुलोम्येन च न्यायात्।

१९. सव्ये पाणौ शवस्योपभृतं कुर्यात् पूर्ववत्।

२०. ध्रुवां घृतेन पृषदाज्येन च पूरयित्वा प्राग्दक्षिणाचीमेवोरसि[2] सादयेत्।

२१. तथैव पूर्णामनुलोमां च कण्ठे स्थापयेत्।

२२. अग्निहोत्रस्रुवमैष्टिकं च वपाया उपरि नासिकयोः प्रदेशे स्थापयेत्। ननु नासिकयोरित्युक्ते वपाया उपरीति कथं गम्यते। वपया मुखं प्रच्छाद्येति पूर्वविधानात्। एवं च सत्यन्येष्वपि प्रदेशेषु वस्त्रान्तर्हितेषु सादनं युज्यत[3] एव।

२३. प्राशित्रहरणपात्रं दक्षिणे कर्णे निदध्यात्।

२४. प्रणीताप्रणयनं सव्ये कर्णे निदध्यात्।

२५. पुरोलाशकपालानि शिरसि स्थापयेत्।

२६. दत्सु[4] ग्रावाण इति केचित्पठन्ति। स च पाठः सम्यगसम्यगिति श्रुतितो निर्णयः।

---

[1] B om तेषां to तादर्थ्यात्। [2] C (in marg.) चाग्नेय्यपाम्। [3] C (sec. h.) प्रयुज्यत। [4] C दस्यः in marg. त्सु।

२७. समवत्तधानीमिडापात्रीमुदरे कुर्यात्।

२८. निदध्यात्। पाण्यावित्यविवक्षितं वचनम्।

२९. पूर्ववत्।

३०. क्रत्वर्थस्य कृष्णाजिनस्य प्रतिपत्तिर्न पुरुषार्थस्य।

३१. उपस्थ उत्सङ्गः। तस्मिन्नरणी निदध्यात्। अत्रापि द्विवचनमविवक्षितम्।

३२. ऊर्वोर्द्वयोरुलूखलं निदध्यात्। अष्ठीवतोर्मुसलम्। अष्ठीवच्छब्देन[1] शुष्कमध्ये उच्यते।

३३. शूर्पं च शकटं च शूर्पशकटे। ते पादयोर्निदध्यात्।

३४. पादतोऽग्निहोत्रपात्राणि उपवेषस्थालीकूर्चादीनि। अनाहिताग्नेः[2] पार्वणपितृयज्ञपात्राणि। विकारैकत्वात्।

३५. जुह्वादीनि सर्वाण्युरीकृत्योक्तं[3] तानीति। एतेन पृषदाज्येन चासंस्कृतेनाप्रदेयत्वात्। सर्वाणि पूरयित्वा पात्राणीतराणि च। तानीति वचनात्।

३६. अयं वै त्वत्त्वमित्येवमादिकया षट्पदया उपोहन्ति। प्रापयन्त्यग्निभिराहवनीयगार्हपत्यदक्षिणाग्न्याख्यैर्यजमानशरीरम्। पुत्रादयो यथाधिकारम्[4]। असौ स्वाहेत्यसावित्यस्य स्थाने प्रेतनामग्रहणं प्रथमान्तं सामर्थ्यात्।

---

[1] A insert here अष्ठीवन्तौ जानुनी इति पञ्चमाष्टके षड्विंशानन्तरमिति मन्त्रभाष्ये। अष्ठीवद्भ्यां जानुभ्यामित्यष्टमे कक्षभ्यामिति मन्त्रभाष्ये च। [2] B °ग्नेः सर्वेण पितृपितृ°। [3] C सर्वाणि पुरीकृत्य The reading of B I have not noted. [4] B यथाविकारम्।

१५.

१. मैनमग्ने वि दहो माभि शोच इत्येवमाद्या दश जपित्वा सव्यावृतः सव्यं बाहुमन्वावृत्यानवेक्षमाणाः[1] पृष्ठतो ऽनिमीलयन्तः शीघ्रं प्रक्रामन्ति। प्रागुदङ्मुखाः।

२. मृत्योः पदं योपयन्तो यदैतेति द्वाभ्यामृग्भ्यामनुमन्त्रयते प्रक्रामतः पुरोहितो ऽन्यो वा।

३. आपो हि ष्ठा मयोभुव इत्येतत्सूक्तम्। सना च सोम जेषि चेति सूक्तम्। आभ्यां सूक्ताभ्यामुदकं संस्पृशन्ति। स्नान्तीत्यर्थः। कथं स्नान्ति। शिरांस्युदके नमनेनाप्रवेशयन्तः असंधावमानाः परस्परमङ्गान्यननुघर्षयन्त इत्यर्थः।

४. प्रत्यायन्तीति सूत्रच्छेदः। ल्यबन्तानि तु खण्डश उच्यन्ते। असाविति नामग्राहं सपिण्डा उदकाञ्जलिमेकं दद्युः।

५. उदकादुत्क्रामन्ति। आपो अस्मान्मातरः शुन्धयन्त्वित्येवमादिना मन्त्रेण।

६. अहतमधौतं नवं वासः परिधायानन्तरम्।

७. तच्चक्षुर्देवहितं शुक्रमुच्चरदित्येवमादिना मन्त्रेणादित्यमुपस्थाय ततः।

८. कनिष्ठो ऽग्रत इतरे तमनु। एवं प्रत्यागच्छन्ति गृहान्। सपिण्डा बहुवचननिर्देशात्।

९. एकस्मिन्नुदपात्रे दूर्वाकाण्डानि यवा धान्यत्वेन प्रसिद्धाः। सर्षपा ओषधिविशेषाः। एतत्त्रयं निक्षिप्यार्द्रे अशुष्के गोमये

---

[1] ०पेक्ष०।

निधाय ततः अश्मन्वती रीयते संरभध्वमित्येवमादिना मन्त्रेणाध्यक्रमश्मानमग्निं च यच्च पूर्वोक्तमुदपात्रमेतत्त्रयमपि संस्पृशन्ति सपिण्डाः।

१०. अधःशय्या भूमौ शयनम्। आसनमप्यध एव। अन्यत्र साहचर्यदर्शनात्। हविष्यमक्षारालवणं तद्व्रतता। भावप्रत्ययनिर्देशो लिङ्गसङ्ख्ययोरविवक्षार्थः। ततश्च सर्वे सपिण्डास्तत्स्त्रियश्च व्रतानि कुर्युः। प्रत्यूहनमकरणं नित्यानां कर्मणां सन्ध्योपासनादीनां दृष्टार्थानां च यथाप्राप्तानां च कृषिनिकर्तनादीनाम्। किमविशेषेण। नेत्युच्यते। वैतानवर्जम्। वैतानं त्रेताग्निकर्म। तस्याप्रतिबन्धः[1]। कियन्तं कालमेतानि व्रतानि। उच्यते। एकरात्रमेकमहोरात्रमित्यर्थः। त्रिरात्रं वा। एवमेव नवरात्रं वेति विकल्पः। आ वा संचयनाद्व्रतानि। अस्थिसंचयनं वक्ष्यति। अपरपक्षे संचित्येत्यादिषु। आ वा तस्माद्व्रतानि भवन्ति। स्मृतिसिद्धस्य वचनमन्यथाकरणे प्रातपत्यर्थम्।

११. अघशब्देनात्र मरणमुच्यते। येष्वहःसु सपिण्डमरणं संवृत्तं तान्यघाहानि। कतमानि पुनस्तानि। मरणादारभ्यैकरात्रादीनि। यानि व्रतैर्व्याप्तान्युक्तानि तानि न वर्धयेयुर्नाभ्यधिकानि कुर्युः। कर्मानधिकारव्रतैर्न व्याप्नुयुरित्यर्थः। एतदनेनोच्यते[2]। यद्यपरपक्षो ऽन्तर्नवाहं[3] भवति तत आ वा संचयनादित्ययं पक्षो ऽङ्गी-

---

[1] C तस्य प्रतिषेधः। [2] A C (orig.) अनेनोच्यते B C (sec. h.) अन्येनोच्यते।
[3] B प्राक् नवाहं C (orig.) सर्वं माह।

कर्तव्यः। अथ चेदूर्ध्वं नवाहान्नादर्तव्यः। वर्णत्रयस्याप्येतदसंयोगविधानात्। इति ह स्माह कौषीतकिरिति स्वपक्षदृढीकरणार्थं श्रुतिप्रदर्शनम्।

१२. अरण्ये निखनन्तीति सूत्रच्छेदः। अपरपक्षः कृष्णपक्षस्तस्मिन् या अयुजो विषमसङ्ख्याका रात्रयो मरणादारभ्यैकत्रिपञ्चसप्तसु संचयनमस्थ्नां संगोपनं पूर्वं पलाशपुटे तन्त्रान्तरदर्शनात्।

१३. यं त्वमग्ने समदह इत्येताभ्यामृग्भ्यामुदकेन क्षीरमिश्रेणास्थीनि निर्वाप्यास्थ्नां तापमुपशमय्येत्यर्थः। विगततापानामपि निर्वापणमविशेषात्[1]।

१४. शरीरशब्देनात्रास्थीन्युच्यन्ते। तान्यनन्तरं पुराणे घटे प्रक्षिपेत्।

१५. उत्ते स्तभ्नामि पृथिवीं त्वत्परीत्यनेन मन्त्रेण तं घटं मृल्लोष्टेनापिदध्यात्।

१६. उच्छ्वञ्चस्व पृथिवि मा निबाधथा इत्यनेन मन्त्रे खाते सुरुंगयामित्यर्थः। तस्यां निखाय प्रवेश्य ततः।

१७. उच्छ्वञ्चमाना पृथिवी सु तिष्ठत्वित्यनेन मन्त्रेण परिमितेऽवदध्यात्। परिमितं चित्यकं कुलकं श्मशानमित्येको ऽर्थः। तत्र परिमितद्वारं क्रियते। तत्रास्थिकुम्भं सुरुङ्गायां[2] प्रवेश्यावस्थापयेत्।

१८. यद्येतत्संचयनं निखननोपलक्षितमेतदरण्ये कुर्वन्ति।

१९. अग्निभिः संस्कुर्वन्तीति सूत्रान्तः। उपलभ्यमानानि शरीराण्येवाहृत्य यथोक्ता क्रिया। शरीरेष्वदृश्यमानेषु पुरुषास्थि-

---

[1] C निर्वाणम्; in marg. र्वप। [2] C सुरुंगयां A सुरुंगायां।

समानसङ्ख्याकैः पलाशवृन्तैः प्रतिनिधिकरणम्। तदुच्यते। त्रीणि षष्टिशतानि पलाशवृन्तानि विन्यस्तव्यानीति वाक्यशेषः। कथमित्याकाङ्क्षित आह।

२०. वक्ष्यति। पुरुषाकृतिं कृत्वेति। तस्या आकृतेः शिरसि कर्तव्ये चत्वारिंशत्पलाशवृन्तानि निदध्यात्।

२१. ग्रीवायां कर्तव्यायां दश यथाप्रदेशं निदध्यात्।

२२. बाह्वोः कर्तव्ययोः शतं निदध्यात्। किं विशिष्टयोर्बाह्वोः। अंसान्वंसयोः। एकोऽंसशब्दोऽंसफलकवचनः। अपरोऽंसतिर्धातुरनुशब्दपूर्वो गत्यर्थः। तेनैतदुक्तं भवति। अंसानुगतयोः अंससहितयोरिति यावत्[1]।

२३. उरःस्थले कल्पयितव्ये त्रिंशत्पलाशवृन्तानि निदध्यात्।

२४. जठरमुदरं तस्मिन् कल्पयितव्ये यथाप्रदेशं विंशतिपलाशवृन्तानि निवेशयेत्। पलाशवृन्तानि लौकिकेन शब्देन पलाशविटकान्युच्यन्ते।

२५. वृषणप्रदेशे षट् पलाशवृन्तानि अवस्थापयेत्।

२६. चत्वारि पलाशवृन्तानि शिश्ने कल्पयेत्।

२७. ऊर्वोः कर्तव्ययोः शतं पलाशवृन्तानि निवेशयेत्।

२८. द्वयोरपि जानुजङ्घाष्ठीवत्समुदाययोः त्रिंशत्पलाशवृन्तानि निदध्यात्।

२९. पादयोरङ्गुलीषु च सर्वासु यथाप्रदेशं त्रिंशतिपलाशवृन्तानि निवेशयेत्।

---

[1] B यमात्।

२०. अविकलाङ्गे यजमाने प्रमीत एवं त्रीणि षष्टिशतानि। विकलाङ्गेऽपि सङ्ख्याहानिराकृतेः प्रतिनिधित्वात्।

२१. उक्तया पलाशवृन्तरचनया पुरुषाकृतिं कृत्वा तत ऊर्णासूत्रैः स्थूलास्थूलमध्यमैः स्नायुवत्परिवेष्ट्य क्रमेण यवचूर्णैर्मांसवदस्थिभिन्नैः प्रलिप्य सर्पिषाभ्यज्यानन्तरमग्निभिर्दाहादिसंस्कारेण संस्कुर्वन्ति पुत्रादयः। एवमेव शाखान्तरविहितत्वात्। जीवतः कर्माणीत्युक्तम्। यदा पुनर्जीवत एव पत्नी म्रियेत ततो यजमानेन किं कर्तव्यमित्यत आह।

२२. अस्मिन्वाक्ये नियोगत्रयमुत्प्रेक्ष्यते। पूर्वमारिण्या अग्निसंस्कारोऽन्यानयनमाधानं[1] च। तत्र पूर्वमारिण्या अग्निसंस्कारायाथाकाम्यं वचनात्। अन्यानयनमर्थाक्षिप्तं पुनराधानं तु विधीयत इति। सांतपनेन वेति। संतापजैरित्यर्थः। संतापजैरितिकर्तव्यता[2] यजमानदाहविषया शतपथे पठ्यते। इहाप्यविरोधात्सैव द्रष्टव्या। इत्थमेव कुर्यात्तिस्र एव स्थालीरेष्टवै ब्रूयात्तासु गोमयानि च शुम्बलानि चावधाय नाना त्रिष्वग्निषु प्रवृञ्ज्यात्। ते ये ततः संतापादग्नयो जायेरंस्तैरेनं दहेयुरिति[3] (१२.५.२.३)। इतरेषां परित्यागः कृतार्थत्वात्।

१६.

१. परिधिकर्मेति वक्ष्यमाणस्य कर्मणो नामधेयम्। परिधि-

---

[1] A पुनराधानं च। [2] A C संतापजैरितिकर्त° B not quite legible. [3] B दाहयेयुः।

मङ्गलं शान्तिरनिष्टान्तर्धानमित्येको ऽर्थः। तदर्थं कर्म परिधिकर्म। तद्धुतापवर्गं कर्तव्यम्। व्रतान्युक्तान्यधःशयादीनि। तदन्ते प्रेतकर्म कृत्वा प्रत्येनसा सपरिवारेण गृह्ये ऽग्नौ कर्तव्यम्। प्रत्येना मृतस्य प्रत्यनन्तरो रिक्थभागुच्यते। कथं कर्तव्यमित्यत आह।

२. अनड्वान् बलीवर्दः। तदीयं चर्म रोहितं वर्णतः। तत्पश्चादग्नेरुदग्ग्रीवं प्राग्ग्रीवं वोपरिलोम चोपस्तीर्य तस्मिन्रिक्थभाजः सर्व एवोपविशन्ति। दर्भेषु चोदगग्रेषु प्रागग्रेषु[1] वा।

३. जुहोतीति सूत्रान्तः। ये चर्मण्युपविष्टास्तांश्चाग्निं[2] चान्तरेणाश्मानं घृताभ्यक्तं स्थापयित्वेदमन्यत् प्रतिश्रुतहोमविधेरभ्यधिकम्।

४. शम्या रथाङ्गत्वेन प्रसिद्धास्ताः परिधिवदात्ममध्यस्य पश्चाद्दक्षिणत उत्तरतश्च कृत्वावस्थाप्येत्यर्थः।

५. कृत्वेति वर्तते। शमीमयमनियतसङ्ख्याकमिन्धनार्थं पालाशं वेध्मं च तूष्णीं प्रोक्षितमग्नौ प्रक्षिपेत्।

६. वरणविकारेण कंसविकारेण वा स्रुवेण वक्ष्यमाणा आज्याहुतीर्जुहोति।

७. दक्षिणं पादं तिर्यञ्चमितरस्य जङ्घाया अधो न्यस्येतरं चैवमेवेतरस्य एवमासीनः कृतोपस्थ उपस्थकृत् उच्यते। इत्थंभूत ऋत्विक् जुहोति। किं चान्यत्। समन्वारब्धेषु यानि कर्माणि प्रत्येनसा सहोपदिष्टानि तेष्वन्वारब्धेषु। संशब्दात् कृतोपस्थेष्वन्वारब्धेष्विति लभ्यते। कतमे पुनस्ते आकृतिमन्त्रा इत्याकाङ्क्षित आह।

८. इमं जीवेभ्यः परिधिं दधामि इत्येवमादिकाम्। याशु-

---

[1] C om. प्रागग्रेषु वा। [2] A C तांश्चाग्नि रिक्थभां चा°।

र्वैदिकां[1] परैतु मृत्युरित्येवमादिकां द्वितीयाम्। अप नः शोशुचदघमिति समाग्ने नय यस्त्वा हृदा त्वं नो अग्न अधरादित्येता[2] आरुणे ऽग्न्यन्वाधान उक्तास्ता इहातिदिष्टा याश्चारुणे दशान्वाधान इति।

९. तूष्णीमित्येवमन्तं सूत्रम्। खण्डशस्तु व्याख्या क्रियते। द्वादश कृत्वा प्राक् स्विष्टकृतो वक्ष्यमाणमित्येवमर्थं सङ्ख्यावचनम्।

१०. यथाहान्यनुपूर्वं भवन्तीत्याभ्यामृग्भ्यां दक्षिणमंसमनु चर्मोपविष्टानीक्षते।

११. अञ्जनं त्रैककुदादि घृतेन संमृश्य[3] ततः।

१२. दर्भशलाकाभिः स्त्रीणामविधवानां चर्मण्युपविष्टानामक्षीण्यनक्ति दक्षिणं पूर्वं सव्यमुत्तरमिमा नारीरविधवाः सुपत्नीरित्यनेन मन्त्रेण।

१३. प्रतिस्त्रियमेवं कुर्यात्।

१४. उत्तिष्ठ ब्रह्मणस्पत इत्याभ्यामृग्भ्यां हावको ऽनुमन्त्रयते। प्रत्येनःप्रभृतीनुत्तिष्ठतो ब्राह्मणस्य दक्षिणं बाहुमन्वारब्धान्। एवं च सति तैर्ब्राह्मणस्य दक्षिणं बाहुमन्वारभ्योत्थातव्यमिति गम्यते।

१५. अनडुहो वा पुच्छमन्वारब्धानुत्तिष्ठतो ऽनुमन्त्रयते।

१६. अनड्वान् शकटवाहः। नवं वस्त्रम्। कांस्यस्य स्रुवो यदि कृतः स एव देयः।

---

[1] B om. याजुर्वैदिकां। [2] C अधरादिति वा दशभिरित्येता आरुणे। [3] B संमृज्य।

१७. दक्षिणतो ऽग्नेर्वस्त्रहिरण्यादिवित्तमवस्थाप्य[1] प्रत्येनाः पैतृकर्णापाकरणसमर्थः त्रिः प्रदक्षिणं धनं करोति ।

१८. यदेतत्परिधिकर्मोक्तमेतत्प्रत्येनसि सति भवति ।

१७.

१. गार्ह्यकर्मप्रसङ्गेनायं[2] शूलगवाख्यः काम्यः शाखापशुरिहोच्यते । श्रुत्यन्तरोक्तत्वात् । स्वशाखायामप्यथ यत्स्वैरग्निभिर्यजमानं संस्थापयन्तीत्यस्यानन्तरं (कौ० ब्रा० ६.१०) प्रजापतिः प्रजातिकामस्तपो ऽतप्यतेत्युपक्रम्य भवशर्वादीनां नाम्नां शूलगवजपाहोममन्त्रदृष्टानामर्थवाददर्शनादिहैव सूत्रकारेणोक्तः । तत्र रुद्रं गवा यजत इत्यनेन श्रुत्यनुकरणेन रुद्राय गोद्रव्यको यागो विधीयते । स्वस्त्ययनायानर्थोपशमनायेत्यर्थः ।

२. प्रसिद्धा ह्यस्य शाखान्तरेष्वप्येषा संज्ञा । रौद्राश्च भूरिशः शूलादयो रोगाः । या ते दिद्युदवसृष्टा दिवस्परीत्येवमादिभिर्मन्त्रलिङ्गैस्तत्रतत्र दृश्यन्ते । तन्निवारणार्थं चैतत्कर्म भवतीत्येतदपि संज्ञया ज्ञापितं भवति । इतिकर्तव्यतामिदानीमाह ।

३. शुद्धपक्षे शुक्लपक्ष इत्यर्थः । उपोष्येति पूर्वेद्युर्व्रतं यथोक्तं कृत्वा । पुण्ये नक्षत्रे पुष्यादौ । प्रागुदीच्यां दिशि एतत्कर्म भवति ।

४. कर्मणैवमादीन्पदार्थान् कृत्वा नियुनक्ति मन्थनमात्रमप्य-

---

[1] C वस्तुहिरण्या० । [2] B गार्हपत्य० C गार्ह्य ।

स्याग्नेररणिभ्यां समारोपपूर्वकम्। वैश्यकुलादाहृतस्यापि वचनात्। प्राञ्चं प्रणीय न प्रागुदञ्चम्। एकदेशस्य प्रणयनमुत्तरत्र पश्चिमे ऽग्नौ पूर्वे ऽग्नाविति (१४) कार्यदर्शनात्।

५. प्रणीतस्याग्नेः पुरस्तात्सपर्णां पलाशशाखां निखनेत्।

६. तस्याः शाखाया उत्तरतः पशुं यथाचोदितमुपस्थापयेत्। पशुवचनात्केचिच्छागमपीच्छन्ति।

७. उपाकरणमाध्वर्यवं तस्यायं मन्त्रो लिङ्गात्।

८. पूर्ववत्।

९. रुद्राय त्वा जुष्टं नियुनज्मीत्यनेन मन्त्रेण पशुं नियुनक्ति पलाशशाखायाम्।

१० पर्यग्निकृतमाध्वर्यवेण पर्यग्निकरणेन तमेवोदञ्चं नयन्ति। बहुवचनमविवक्षितं शाखान्तरे शमितुः पशुनयनोपदेशात्।

११. यं नयन्ति तं पशुं संज्ञपयन्ति। प्राक्शिरसं प्राच्यां दिशि शिरः कृत्वा। उदीच्यां पादान्। प्रतीच्यां वा दिशि शिरः कृत्वोदीच्यामेव पादानिति। एवंस्थितं संज्ञपयन्ति। अत्रापि बहुवचनमविवक्षितभ्। शाखान्तरे शमितुरेकत्वात्। प्रयोजकत्वेन वा विवक्षा। अरवमाणमवाश्यमानमित्यर्थः।

१२. यत्पशुरित्येवमादिना मन्त्रेण रवमाणे सति पशौ जुहुयात्। प्रायश्चित्ताहुतिरेषा। ततश्च ब्रह्मा चतुर्गृहीतं जुह्वा जुहुयात्। कुत एतत् जुह्वेति। शाखापशोः सूत्रे उपदेशात्।

१३. आज्याहुतीर्जुहोतीति सूत्रच्छेदः। वपोद्धरणं नाभिप्रदेशात्कृत्वा। तथैव वपाश्रपण्योः प्रोर्णवनं कृत्वा ततः प्रक्षाल्य।

१४. यो ऽसौ प्रणीतस्तस्मिन् वपां श्रपयित्वा ततः।

१५. वपामभिघार्य प्रचरयित्वेत्यर्थः[1]। उद्वास्योपस्तीर्णायां पात्र्यां निधाय।

१६. पूर्वमग्निं शिवंशिवमित्यनेन मन्त्रेण[2] त्रिः पर्युक्ष्यानन्तरम्।

१७. वक्ष्यमाणैर्मन्त्रैः।

१८.

१. स्रुवेण जुहोति। स्रुवः पात्रमिति गृह्ये[3] तद्धर्मकाणां परिभाषितत्वात्। या तिरश्चीत्येवमादिना मन्त्रेण स्वाहाकारान्तेन।

२. यस्येदमित्येवमादिना मन्त्रेण स्वाहाकारान्तेन द्वितीयामाज्याहुतिं जुहोति। हवामह इति मन्त्रान्तसंदेहव्युदासार्थं द्वितीयावचनम्।

३. अग्ने पृथिव्या अधिपते वायो ऽन्तरिक्षस्याधिपत इत्येवमादिना मन्त्रेण तृतीयामाहुतिं जुहोति। तृतीयाग्रहणं यादृशेन मन्त्रेण याजमाने तृतीया तादृशेनात्रापि यथा स्यात्।

४. प्रजापत इत्येवमादिना मन्त्रेण चतुर्थीमाज्याहुतिं जुहोति। चतुर्थीग्रहणात्प्रायश्चित्तमप्यन्तरा न होतव्यमिति।

५. अनुप्रहरति पलाशानीति सूत्रान्तः। त्रीणि पलाशपत्राणि मध्यमानि संवृत्तानि[4] संवृह्य संसीव्यौत्तराधर्येण सौकर्यात्। आज्येनोपस्तीर्य गृह्ये दृष्टत्वात्।

---

[1] C श्रपयित्वेत्यर्थः। [2] C adds स्वाहाकारान्तेन। [3] A B गृह्यते। [4] C संवृत्तानि A om.

६. उपस्तीर्णे वपामवधाय ततो ऽभिघारणमस्या आज्येन कुर्यात्।

७. यावतामहमित्येवमादिना मन्त्रेण स्वाहाकारान्तेन वपां हुत्वा ततः।

८. आहुत्यनन्तरं पलाशपर्णानि[1] तस्मिन्नेवाग्नौ प्रक्षिपेत्।

९. वपाश्रपण्यौ चानुप्रहरेदाध्वर्यवोक्तलक्षणे। तथैवानुप्रहरेद्यथा तेषामुक्तम्।

१०. दर्शाय त इत्यनेन मन्त्रेण वपाश्रपण्यनुप्रहरणादनन्तरमुत्तरामाज्याहुतिं हुत्वा तथैव पर्युक्षति। यथा पूर्वमुक्तं शिवंशिवमिति त्रिः पर्युक्षति। आज्यग्रहणमसंदेहार्थम्। उत्तराग्रहणमन्येष्वपि शाखापशुषु भावार्थम्।

११. स्थालीपाकग्रहणं तद्धर्मप्राप्त्यर्थम्। पश्चिमाग्निग्रहणं पूर्वे ऽग्नावधिकृतत्वान्मा भूत्।

१२. तस्यैवाग्नेरुत्तरतो ऽवदानानि श्रपयेत्। मांसमिति नोक्तम्। कथं नामावदानधर्मा आध्वर्यवोक्ता भवेयुरिति।

१३. यो ऽसौ स्थालीपाकः शृतः तं च यूषं च। यूषशब्देन वसोच्यते। मांसमङ्गेभ्यो ऽवखण्ड्याज्यं[2] च संस्कृतं पाठक्रमेण पात्रान्तरे[3] समस्य जुह्वा स्थालीपाकधर्मवत्पूर्वे ऽग्नौ शंयोःशंयोरिति मन्त्रेण[4] त्रिः पर्युक्षणं कृत्वा जुहोति। कुत एतत् पूर्वे ऽग्नाविति। अग्नौ पश्चिम इति वक्ष्यमाणत्वात्।

---

[1] C पत्राणि। [2] C ऽवखण्ड्यावखण्ड्य B and A are corrupt. [3] A inserts ॰कर्दंशतः। [4] From शंयोः to कृत्वा om. in C.

१९.

१. स्वाहाकारान्तैः पञ्चभिर्मन्त्रैः पञ्चाहुतयः। स्थालीपाकधर्मेण जुहुयात्।

२. शंयोःशंयोरिति त्रिः पर्युक्ष्येत्यर्थः।

३. तान्येवावदानानि स्थालीपाकादीनि। न तु जाघनीमेव केवलाम्। न च संनीतावशिष्टं संनीयेति वचनात्।

४. जुहोतीति शेषः।

५. अत्रापि जुहोतिधर्मेणैव। स्वाहाकारान्तैः पञ्चभिर्मन्त्रैः पञ्चैवावदानधर्मविशिष्टा[1] आहुतीर्जुहोति।

६. शंयोःशंयोरित्यहुते हुते चाविशेषात्[2]।

७. अनुदिशतीति सूत्रान्तः[3]। पश्चिमादग्नेरारभ्य यावद्विकर्तनप्रदेशस्तावत्प्रागुदीच्यभिमुखानि[4] षट् पलाशपत्त्राणि मध्यमानि निदध्यात्।

८. तेषु पर्णेषु लोहितमिश्रमूवध्यमवदध्यात्।

९. तदूवध्यं लोहितमिश्रं रुद्रसेनाभ्यो ऽनुदिशेत्। अनुदेश इदमस्येदमस्येत्यवधार्य समर्पणम्।

१०. षडेता रुद्रसेनाः। षडेव पर्णानि निहितानि। तत्र यथासङ्ख्यमनुदेशो युज्यते। आघोषिण्य इति स्त्रीलिङ्गामन्त्रितबहुवचनान्तः साकाङ्क्षः। तथा प्रतिघोषिण्यः। एवं संघोषिण्यः। तथा विचिन्वत्यः। एवं श्वसनाः। षष्ठस्तु निराकाङ्क्षो मन्त्रः। तदीयो

---

[1] A C om. धर्म। [2] C om. अहुते। [3] MSS. om. अनु। [4] C (in marg.) चा instead of च्य।

वाक्यशेषः सर्वेष्वनुवक्तव्यस्तुल्ययोगित्वात्। अतश्चैवं प्रयोगः। आघोषिण्य एष वो भागस्तं जुषध्वं स्वाहा। एवमितरेष्वपि द्रष्टव्यम्।

११. रुद्रं मन्त्रवर्णात्। यजमानश्च यश्च प्रकृतो[1]ऽनुपदेशकः।

२०.

१. भूपत इत्येवमादिना मन्त्रेण नम इत्येवमन्तेन कर्तृयजमानौ प्राङ्मुखौ रुद्रमुपतिष्ठेते। असंयुक्तं प्रधानस्येति न्यायात्[2]।

२. कद्रुद्राय प्रचेतसे। इमा रुद्राय तवसे कपर्दिने। आ ते पितर्मरुतां सुम्नमेतु। इमा रुद्राय स्थिरधन्वने गिरः। एतानि सूक्तानि रुद्रस्यैवोपस्थाने विनियोक्तव्यानि। सूक्तानीति वचनात् यद्यपि प्रथमे सूक्ते तिस्रः सौम्यस्तथापि सकलस्यैव विनियोगः।

३. श्रेष्ठस्य गवादेर्दानम्। प्राक् सव्ये पाणौ ये कुशास्तान्दक्षिणेनाग्रे संगृह्येत्येवमादिकर्मणः (१.८.१२)। न त्वन्या आज्याहुतयो गृह्योक्ताः परिसंख्यातत्वात्[3]। कुशानुप्रहरणं[4] समिदाधानं च पूर्वेऽग्नौ। तत्राहुतिभूयस्त्वात्। अपरे [4]कुशानुप्रहरणमन्यतरस्मिन्निच्छन्ति[5]। समिदाधानं तूभयत्र। पर्युक्षणं नेच्छन्ति। कृतत्वात्। न्याय्यमेव[6] तु नित्यं पर्युक्षणम्। अतुल्यत्वादितरस्य। अत्र पद्धतिः।

पूर्वेद्युरुपोष्य प्रातरावसथ्यं हुत्वा। तमरण्योः समारोप्यायं ते योनिरिति यथोक्तम्। ततः प्रागुदीचीं दिशं गत्वा दीर्घचतुरस्रे उपलिप्ते पश्चार्धेऽग्निं मथित्वा। ततो लेखाकरणाभ्युक्षणाग्निप्रणयन-

---

[1] B प्रकृतौ। [2] B वचमात्। [3] B ॰मत्वात्। [4] C कुशाननुप्र॰। [5] C अन्यतमस्मिन्। [6] A त्याज्यमेव।

परिसमूहनानि। ततस्तस्मात्प्रणयनम्। तस्याप्येषैवेतिकर्तव्यता। अस्यैव दक्षिणतो ब्रह्मयजमानावुत्तरतः प्रणीताः। अत्रैव स्तरणं पवित्रच्छेदनमभ्युक्षणं ताभ्यां पर्युक्षणमाज्यस्थाल्यादानमधिश्रयणं पश्चिमे ऽग्नौ। उद्वासनमुत्पवनं प्रोक्षणमेतद्गृह्योक्तं कृत्वा तत आज्यस्य बर्हिष्यासादनम्। पूर्वस्याग्नेः पुरस्तात्पलाशशाखानिखननं। पशोरेकतृणेनोपस्पर्शनमुपाकरणम्। प्रोक्षणं प्रोक्षणावशिष्टाभिरद्भिः। द्विगुणरशनया द्विव्यामया कौश्या पाशं कृत्वान्तराशृङ्गमभिदक्षिणं बद्ध्वा नियोजनं यथासूत्रम्। तत उल्मुकेन त्रिः प्रदक्षिणं पर्यग्निकरणम्। पशोरालम्भस्तस्य च ततो यथासूत्रम्। पर्युक्षणान्ते सव्येन कुशानादाय दक्षिणेन मूले स्रुवं विष्णोर्हस्तो ऽसीति। ततो या तिरश्चीत्यादि यथासूत्रम्। अवदानानामाध्वर्यवः क्रमः श्रपणं च। दक्षिणादानं प्राक् कुशप्रतिपत्तेः।

४. अमन्त्रिकाः पाशुबन्धिक्य आवृत उपाकरणप्रोक्षणपर्यग्निकरणरूपा अतिदिश्यन्ते। यत्रासामुपदेशस्ततो गृहीतव्याः। आध्वर्यवे च सः।

५. यद्यपि श्रौते पशौ यूप्यवृक्षविशेषाः[1] प्रमाणविशेषाश्च अभ्यञ्जनाष्टाश्रिनियमाश्च सन्ति तथापि शाखापशुषु पलाशशाखैव। इति देवतायै वपामिति। इतिकरणस्तद्धर्मप्रापणार्थः। देवतावचनं यावतामहमीश इत्यस्य[2] निवृत्त्यर्थम्। देवतायै हविः स्विष्टकृते चेति वचनात् वनस्पतियागवपापशुपुरोडाशनिवृत्तिरपि[3]। ननु केन

---

[1] A यूपे instead of यूप्यः। [2] B यस्ये C यर्थः instead of यस्य। [3] A om वपापशु B om वपा C has वपापशुपुरोडाशयोर्नि॰।

वनस्पतियागपशुपुरोलाशयोः शाखापशुषु प्राप्तिः। उच्यते। श्रौता अपि शाखापशवो[1] ऽवकीर्ण्यभिशस्तादीनां लौकिके ऽग्नौ भवन्ति। तत्रास्ति प्राप्तिः[2]। ननु भूमौ पशुपुरोलाशश्रपणं[3] कात्यायनेनोक्तमवकीर्णिपशोः। सत्यम्। मनुना तूक्तम्। (११.११९)।

अवकीर्णी तु काणेन गर्दभेन चतुष्पथे।
पाकयज्ञविधानेन यजेत नैर्ऋतं निशि॥ इति॥

ननु[4] पाकयज्ञविधानेन पशुपुरोलाशवनस्पत्योः कुतः प्राप्तिरिति। उच्यते। कात्यायनीये प्रत्यक्षा श्रुतिः। मानवे त्वानुमानिकीति। सत्यमेव। तथापि वनस्पतेः प्रतिषेधार्थमेतद्वचनम्। देवतायै हविः स्विष्टकृते चेति। गार्ह्यं तु नानया परिसङ्ख्यया निवार्यते। अप्रकृतत्वात्तस्य। संनिपत्योपकारकमपि शूलगवोक्तमन्येषां पशूनां न प्रतिषिध्यते। कुतः। आरादुपकारकाणां परिसङ्ख्यानात्। अतो ऽन्येष्वपि पशुषु यथाप्राप्तं कर्म लिख्यते। तत्रार्घ्यपशुवर्जं पूर्वेद्युरुपवासः आवसथ्यसमारोपो मन्थनं प्रणयनं परिसमूहनं ब्रह्मयजमानयोरुपवेशनं प्रणीताप्रणयनं स्तरणं पवित्रच्छेदनं आज्यस्थाल्यादानं पश्चिमे ऽग्नावधिश्रयणमुद्वासनमुत्पवनं प्रोक्षणं शाखानिखननं उत्तरतस्तस्याः पशोरुपस्थापनं तृणेनोपस्पर्शनं अमुष्मै त्वां जुष्टमुपाकरोम्यमुष्मै त्वा जुष्टं प्रोक्षाम्यमुष्मै त्वा जुष्टं नियुनज्मीति यथादैवतं पलाशशाखायां नियोजनं पर्यग्निकरणं उदग्नयनं संज्ञपनं पुरस्तान्नाभेर्वपोत्खेदनं वपाश्रपण्योः प्रच्छादनं प्रक्षालनं

---

[1] A C om. शाखा। [2] A om प्राप्तिः। [3] A om पशु। [4] B C अतः instead of अतः।

पूर्वेऽग्नौ श्रपणं अभिघारणं उद्वासनं ततो विष्णोर्हस्तोऽसीति कुशस्रुवयोरादानं आघारौ महाव्याहृतिहोमः ततस्त्रिषु पलाशपर्णेषु संहृतेषूपस्तरणं[1] वपावधानं अभिघारणं ततोऽमुष्मै स्वाहेति देवतामुद्दिश्य होमस्ततः पलाशानुप्रहरणं वपाश्रपण्योश्च ततः पश्चिमेऽग्नौ स्थालीपाकश्रपणं उत्तरतोऽवदानश्रपणं स्थालीपाकयूषमांसाज्यादीनां संनयनं ततः स्रुचावदानधर्मेणामुष्मै स्वाहेति देवतामुद्दिश्य होमस्ततः स्विष्टकृत्ततो महाव्याहृतयः ततः सर्वप्रायश्चित्तं ततः प्राजापत्यान्तं हुत्वा ततो दक्षिणादानं ततः सव्ये पाणौ ये कुशा इत्यादि अग्नेर्वामोऽसीति ततः [2]पर्युक्षणमिति ।

६. ये पश्वर्थाः स्थालीपाका येषां वा पशुना सह विकल्पः यथाष्टकायां गोपशुरजपशुः स्थालीपाको[3] वेति (गृ० ३.१४.३) तेषामाग्नेयः सौम्यश्चाज्यभागौ । प्राप्तयोरेवाज्यभागयोः पुनर्वचनं शाखापशुषु प्रतिषेधार्थम् । देवतायै वपामिति चरोरुपरि या त्वगिव सा त्वपाकारसामान्येन[4] वपोच्यते । तां देवतायै जुहुयात् । देवतायै हविः स्विष्टकृते चेति परिसंख्यानात् स्थानापत्तेः प्राप्तानां पशुधर्माणां प्रतिषेधार्थं । आज्याहुतिस्त्वेवंप्रकारेष्वेव स्थालीपाकेषु स्विष्टकृदनन्तरं पाठक्रमादनुमतये स्वाहेत्यनेन मन्त्रेण स्रुवः पात्रमिति गार्ह्येषु वचनात् स्रुवेण होतव्या ।

---

[1] A सौवितेषु। [2] B ins. समिदाधानं। [3] B चरुः स्था॰। [4] A सा वपाकारसामान्येन वपोच्यते ।

२१.

१. शाखापश्वनुकल्पसंबन्धेनेदमुच्यते। अतो यद्यप्याचार्यायाशेय इत्येवमादयः शाखापशवो गृह्योक्तास्तथापि तेषामिह पाठाद्वैकल्पिकमनुष्ठानम्। मधुपर्कस्तु [1]नियमतस्त्रैवर्णिकानामाचार्यादीनां परिसंवत्सराद्गृहमागतानामवश्यं कर्तव्यः। तेनेहाभिधीयते। ऋत्विजो वृणीत इत्यनेनापि वक्ष्यमाणेन यादृशस्तादृशो वास्य संबन्धो नास्ति[2]। तेनेहोपदिश्यते। आचार्यादयश्चत्वारः प्रसिद्धाः। स्नातकश्चात्र समावृत्तमात्रो गृह्यते। प्रियस्य दुहितुः परिणयनार्थमागतो वरः। एते ऽर्घ्या भवन्ति। अर्घ्य इति विशिष्टेतिकर्तव्यताको मान्य इत्युच्यते। प्रियशब्दो विशेषणं मा विज्ञायीति षड्ग्रहणम्।

२. अहं वर्ष्मेत्येवमादिना मन्त्रेणाचार्यादिरर्घ्य उदङ्मुखः प्राङ्मुखो वा विष्टरमधिष्ठायास्ते तं[3] वाधितिष्ठति। वक्ष्यति। कूर्चः पाद्यमर्घ्यमाचमनीयं मधुपर्को गौरिति वेदयेतेति। अतश्चार्घप्रदात्रा पूर्वमावेदितो ऽध्यासनाधिष्ठानयोर्विकल्पः। विष्टरं कूर्चं वोपादाय।

३. अर्घदात्रावेदितं पाद्यं प्रतिगृह्णाति। विराजो दोह इत्येवमादिना मन्त्रेण पादप्रक्षालनार्थमुदकं प्रतिगृह्णीयात्।

४. अर्घ्यमित्युक्तो ऽर्घदात्रानन्तरमपः प्रतिगृह्णीयात्।

५. आचमनीयमिति प्रचोदितो ऽर्घदात्रानन्तरमापो हि ष्ठा मयोभुव इत्येवमाद्याभिस्तिसृभिः प्रत्येकं त्रिराचामेत्।

---

[1] C नियमः। [2] A C (orig.) om. न। [3] C ०तिष्ठेत्। कूर्चं वा०।

६. मधुपर्क इत्युक्तो ऽर्घदाता पात्रसंपुटे[१] सदधि मधु यथा प्राशित्रं[२] ब्रह्मा ईक्षते तथेक्षणं कुर्यात्। कथं च तत्। मित्रस्य त्वा चक्षुषा प्रतीक्ष इत्यनेन मन्त्रेण। ततो ऽनन्तरम्।

७. तथैव प्रतिगृह्णाति यथा ब्रह्मा। कथं च तत्। देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि। तत्रैतावान्मन्त्रो ऽत्र तु यशसे ब्रह्मवर्चसायेति मन्त्रोपजनः।

८. तत्पात्रं कांस्यमकांस्यं वा[३] कांस्यशब्देनोच्यते। तत्प्रतिगृह्य सव्ये पाणौ निधाय तस्मान्मधुपर्कं गृहीत्वाङ्गुष्ठेनोपकनिष्ठिकया चाङ्गुल्या पूर्वार्धादुपहृत्य पूर्वार्धे कांस्याख्यस्य पात्रस्य निक्षिपेत्। वसवस्त्वेत्येवमादिना मन्त्रेणैकवारं द्वौ वारावमन्त्रकम्।

९. पितरस्त्वेत्येवमादिना मन्त्रेण दक्षिणार्धादुपहृत्य दक्षिणार्धे निक्षिपति। अमन्त्रकं द्विः। कांस्यस्येत्येतदनुवर्तत एव।

१०. आदित्यास्त्वेत्येवमादिना मन्त्रेण निक्षिपनमादानं च पूर्ववत्। पश्चार्ध इति विशेषः।

११. रुद्रास्त्वेत्येवमादिना मन्त्रेणोत्तरार्धे निक्षिपेत् पूर्ववत्।

१२. पात्रमध्यान्मधुपर्कमङ्गुष्ठोपकनिष्ठिकाभ्यामादाय विश्वे त्वा देवा इत्येवमादिना मन्त्रेणोर्ध्वं क्षिपेत्सकृन्मन्त्रेण द्विस्तूष्णीम्।

१३. उक्तार्थमेतत्।

१४. तं मधुपर्कं महाव्याहृतिभिर्मन्त्रैस्तिसृभिर्भूर्भुवः स्वरिति प्रत्येकं प्राश्नीयात्।

१५. महाव्याहृतिभिस्तिसृभिरित्यनुवर्तते। समस्ताभिस्तिसृ-

---

[१] C ०पुटं। [२] C ins. in marg. प्रतीक्ष। [३] A om. मकांस्यं वा।

भिर्महाव्याहृतिभिश्चतुर्थं पिबेत्। प्राशनत्रयस्य पश्चान्मधुपर्कशेषस्य कियतोऽपि पानं कृत्वा ततः।

१६. मधुपर्कोच्छिष्टं ब्राह्मणाय प्रदद्यात्। लिङ्गमत्राविवक्षितम्।

१७. सर्वं वा मधुपर्कं पिबेत्।

१८. अप्सु वा प्रक्षिपेदिति शेषप्रतिपत्तिपक्षत्रयम्।

१९. शं नो देवीरभिष्टय इत्यादिकाभिश्चतसृभिर्ऋग्भिरुरःस्थलमभिमृशेत्।

२०. समानं तुल्यमित्यर्थः। ब्रह्मत्वविहितेन वा याजमानविहितेन वा प्राणसंमर्शनमविशेषात्। अत एव च समानमुरोऽभिमर्शनादीति नोक्तम्। साहचर्याद्याजमानेनैव [1]नियमो मा भूत्।

२१. समानं चशब्दाद्याजमानविहितेन। अन्यथासंभवात्[2]।

२२. अनन्तरमर्घदात्रा गौरित्येव वक्तव्यम्। यद्यपि गोच्छागस्थालीपाकानां विकल्पितानामन्यतमस्योपादानं कृतं तथापि गौर्गौरित्येवं वक्तव्यम्। अतः प्रागेतस्माद्गोप्रवदनात्तूष्णीमर्घ्य आसीत।

२३. इयं गौस्त्वदर्थमस्माभिर्हन्तव्येत्यनेनाभिप्रायेण गौरित्यर्घ्य इममर्थं बोधितः।

२४. अर्घ्यः प्रतिब्रूयात्। ओं कुरुतेति। यथाभिलषितं[3] संपादयतेत्यर्थः। ओमित्येतस्य श्रुतिरभ्यादानार्थत्वात्।

२५. माता रुद्राणां दुहिता वसूनामित्येवमादिकामृचं जपित्वा ततः ओमुत्सृजत तृणान्यत्तु एवं वा ब्रूयात्।

---

[1] B ins. इति। [2] A अन्यथासं°। [3] B °लक्षितम् A °लिषितं।

२६. कूर्चादीनि यथाकालमर्घप्रदो[1] वेदयेत। त्रिस्त्रिर्वेदयेतेति तन्त्रान्तरात्।

द्विरभ्यासो ऽध्यायपरिसमाप्तौ शिष्टाचारस्तदाचरणं चायुष्यमिति।

इति शाङ्खायनश्रौतसूत्रभाष्ये चतुर्थो ऽध्यायः समाप्तः।

शाङ्खायनकसूत्रस्य मम शिष्यहितेच्छया।
वरदत्तसुतो भाष्यमानर्तीयो ऽकरोन्नवम्[2] ॥

---

[1] A अर्घ्यपाद्यप्रदो B अर्घ्यायार्घप्रदो। [2] om. in A (B?)

अथ पञ्चमो ऽध्यायः ।

१.

[1]उक्तानि प्रागैष्टिकानि कर्माणि[2] सौमिकानि कर्माणि । सोमस्यावसरः । तदर्थमाह ।

१. श्रुताध्ययनग्रहणधारणश्रौतस्मार्तकर्मानुष्ठानवन्तो ब्राह्मणा ऋषय इहोच्यन्ते । कुतः । को न ऋषिर्भविष्यतीति त एतानननूचानानपश्यन्निति निरुक्तदर्शनात् । शतपथश्रुतेश्च । यो वै ज्ञातो ऽनूचानः स ऋषिरिति । तेषां पुत्रा आर्षेयास्तान्यूनस्तरुणाननूचानानध्ययनव्याख्यानक्षमानृत्विजो यज्ञकृतो वृणीते । यज्ञव्यापारायाभिप्रसादयतीत्यर्थः । सोमेन यक्ष्यमाणः । सोमेन यक्ष्य इत्यभिप्रवृत्तः[3] । (आश्व०गृ० १.२२.१) ।

२. चतुरो महर्त्विजो वृणीते । सर्वान् वा सदस्यसप्तदशान् । उभयं शाखान्तरात् ।

३. चन्द्रमा मे दैवो ब्रह्मा एतदुपांशु । त्वं मानुष एतदुच्चैर्ब्रूयात् । एवं ब्रह्माणं वृणीते मन्त्रलिङ्गात् ।

४. एवं सर्वान् वक्ष्यमाणानृत्विङ्नामान्तं मन्त्रमुपांशूक्त्वा शेषमुच्चैरिति ।

---

[1] B ins अथ । [2] B C add सौमिकानि कर्माणि, C has वैदिकानि कर्माणि in marg. [3] C ०प्राय० in marg. instead of प्र ।

५. उद्गातारं वृणीते मन्त्रवर्णात्। नौ देव इति द्वियजमानके। नो देव इति बहुयजमानके[1]। एवं सर्वेषु वरणमन्त्रेषु पूर्वेषु चोत्तरेषु च।

६. अनेन मन्त्रेण होतारं वृणीते मन्त्रवर्णादित्युक्तम्।

७. वायुर्म इत्येवमादिना मन्त्रेणाध्वर्युं वृणीते।

८. प्रजापतिर्म इत्येवमादिना मन्त्रेण सदस्यसंज्ञकं वृणीते। प्रजापतिर्नौ देव इति द्वियजमानके। नो देव इति बहुयजमानके। अयमुपद्रष्टा[2] भवति। सर्पत्सु न शून्यं सदस्कुर्यादिति छन्दोगानाम्।

९. ऋतवो म इत्येवमादिना मन्त्रेण होत्राशंसिनो वृणीते। होत्रका होत्राशंसिन उच्यन्ते।

१०. भर्गं म इत्येवमादिकं मन्त्रं वृत ऋत्विक् जपित्वानन्तरं जपात्पृच्छति यदि पूर्वं न ज्ञातो यो ऽयं यज्ञः कर्तव्यः। किमयमहीन उत नेति। कच्चिच्छब्दः किंशब्दस्यार्थे। अनुदेश्यः स उच्यते यः कृत्वान्यस्मै जीवते मृताय वा अनुदिश्यते। यथा कात्यायनेनोक्तम्। उखां चेद्बिभ्रन्म्रियेत सोपकरणमाहिताग्न्यावृता दग्ध्वा नेदिष्ठ्यग्निं चित्वा तमस्मा अनुदिशेदित्येक इति[3]। न्यस्तार्त्विज्यस्तु न्यस्तं परित्यक्तमार्त्विज्यं यस्मिन्नन्येन केनचिद्यजमानस्य दोषेण। नीतासु दक्षिणासु यः शेषः स नीतदक्षिणो यज्ञशेषः। एवं दृष्टादृष्टदोषपरिहारार्थम्। यद्येतेषामन्यतमो न भवति ततः प्रतिशृणोतीति। इतरथा प्रत्याचष्टे। प्रतिश्रवः क्रियाभ्युपगमः। प्रत्याख्यानं तद्विपर्ययः।

---

[1] B m-. सर्वर्षा। [2] C अयमपि द्रष्टा। [3] का० १५. १४ १।

२.

१. ऋत्विग्वरणादनन्तरं देवयजनजोषणम्। महर्त्विजो यजमानस्य प्राक्प्रवणं देवयजनं जोषयेरन्। शाखान्तरात्।

२. पूर्वोत्तरयोर्दिशोर्यदन्तरालं तदवनतं देवयजनं यज्ञकामस्य कुर्यात्।

३. यस्मिन्देवयजने स्थितो होता सामिधेन्याद्यनुब्रुवन्नाहवनीयमादित्यमपश्च नदीतडागादिष्ववस्थिताः पश्येत्तद्ब्रह्मवर्चसकामस्य देवयजनं भवति।

४. शुक्लपक्षे दीक्षाप्रक्रमः। पुण्ये नक्षत्रे पुष्यादौ समापनं च सोमस्य।

३.

१. अपराह्णे दीक्षणीयासंज्ञका अग्नाविष्णुदेवताका इष्टिर्भवति। संज्ञाकरणं क्षित्रविश्व[1] दीक्षणीयेत्येवमाद्यर्थम्।

२. नियमार्थं वचनम्। पूर्वकारिवशाद्धविरन्तरेऽपि।

३. पञ्चदश सामिधेनीरन्वाहेति श्रुतेः।

४. इष्टिर्विशेष्यते। उपांशुहविरियमिष्टिर्यत्रापि बहूनि हवींषि भवन्ति।

५. प्रेद्धो अग्न इमो अग्न इति विराजौ स्विष्टकृतो याज्यानुवाक्ये भवतः शाखान्तरात्[2]।

---

[1] A ins. दीक्षणीया पूर्वाह्णे। [2] C om. शाखान्तरात्।

६. नित्ये वा स्विष्टकृतो याज्यानुवाक्ये भवतः। विराजौ स्विष्टकृतो वेति सूत्रे कर्तव्ये विराण्नित्ययोस्तुल्यताप्रज्ञापनार्थं सूत्रभेदः। अतश्च यत्र यातयामत्वदोष आशङ्क्यते तत्राविनियुक्तयोः क्रिया सिद्धा भवति।

७. उत्तरस्यां देवयज्यायामुपहूतो भूयसि हविष्करण इदं मे देवा हविर्जुषन्ताम्। एता इळायां तिस्र आशिषः। एतासां स्थाने ऽस्य यज्ञस्यागुर उदृचमशीय इत्येतानि[1] षट् पदानि भवन्ति। उपहूतो ऽयं यजमान इत्यस्य प्राकृतस्येह पाठः सन्ध्यर्थः। इतिकरणश्च विस्पष्टार्थः। इळायामुक्तो विशेषः। सूक्तावाके उच्यते। उत्तरां देवयज्यां भूयो हविष्करणमायुः सुप्रजास्त्वं दिव्यं धामेति पञ्चाशिषो नामग्रहणस्यानन्तराः। तासां स्थाने ऽस्य यज्ञस्यागुर उदृचमशीयेति षट् पदानि भवन्ति। तत्र[2] वक्ष्यमाणसूत्राभिप्रायेण यजमाननामग्रहणमुत्सृज्य तस्मात्पूर्वं पदत्रयं गृहीत्वा सूत्रकारेण प्रयोगः प्रदर्शितः। आशास्त इति चावमानार्थं पठन्ति। एवं व्यवस्थितमिळायां सूक्तावाके च कुर्यात्। प्राक्तार्तीयसवनिक्याः पुरोळाशेळायाः। तृतीयसवने भवा तार्तीयसवनिकी। पुरोळाशेळा सवनीयपुरोळाशसंबन्धिनी इळा। प्राक् तस्या आगुर उदृचमशीयेत्येवमादि यथोक्तं कर्तव्यम्।

८. वक्ष्यत्याग्नेयः सवनीय इत्यादि। प्राक्तस्मात् ये सूक्तवाकास्तेषु चोदकप्राप्तं यजमाननामग्रहणं प्रतिषिध्यते।

९. इयं दीक्षणीया इष्टिः पत्नीसंयाजान्ता भवति। तथैव

---

[1] A C om. इति। [2] B तत्र।

श्रुतत्वात्। आहवनीयोपस्थानमप्रतिषिद्धमासीत्तदप्यनेन प्रतिषिध्यते। चशब्दादयमपि दीक्षणीयाधर्मो न केवलं पौर्णमासीविकारादयः।

४.

१. दीक्षणीयानन्तरं नवनीताक्तं कृताञ्जनं निर्वृत्तवापनवाचनं त्यक्ताङ्गुलिं यजमानं शालां प्रवेश्याध्वर्युरौद्ग्रभणानि जुहोति। तमध्वर्युमन्वारभ्य मनो म इत्यादिकैः पञ्चभिर्मन्त्रैः पञ्चैवाकूतीरनुमन्त्रयेत। याजमानमेतच्च हौत्रम्।

२. एतैरेव पञ्चभिर्मन्त्रैः।

३. एकदीक्षे च यज्ञे वक्ष्यमाणमुपस्थानमौद्ग्रभणानन्तरं कुर्यात्। एतदपि याजमानं चशब्दात्।

४. मनो दीक्षामित्येवमादिना मन्त्रेणाहवनीयमुपतिष्ठत इति वाक्यशेषः।

५. वाचं दीक्षामित्येवमादिना मन्त्रेण गार्हपत्यमुपतिष्ठते।

६. प्राणमित्येवमादिना मन्त्रेण दक्षिणाग्निमुपतिष्ठते।

७. बहवो दीक्षासंख्याविकल्पाः शाखान्तरेषु। तदभिप्रायेणोक्तम्। अपरिमिता दीक्षा इति। दीक्षाधर्मयुक्तान्यहानि दीक्षा इति उच्यन्ते। तासां दीक्षाणामपवर्गे परिसमाप्तावित्यर्थः। [1]प्रायणीयसंज्ञका इष्टिर्भवति। इष्टिग्रहणं विस्पष्टार्थम्।

---

[1] A ins. अतः श्वोभूते।

५.

१. यजतीति वाक्यशेषः। हविरुपदेशो याज्यानुवाक्यानियमार्थः।

२. चोदनानुपूर्व्येण याज्यानुवाक्यायुगलान्याह। पथ्यायाः स्वस्तेः पुरोनुवाक्या स्वस्ति नः पथ्यासु धन्वसु। याज्या स्वस्तिरिद्धि प्रपथे श्रेष्ठा।

३. आग्नेयस्य पुरोनुवाक्याग्ने नय सुपथा राये अस्मान्। याज्या अग्ने त्वं पारया नव्यो अस्मान्।

४. सोमस्य पुरोनुवाक्या त्वं सोम प्र चिकितो मनीषा। याज्या या ते धामानि हविषा यजन्ति।

५. सवितुः पुरोनुवाक्या तत्सवितुर्वरेण्यं। याज्या य इमा विश्वा जातानि।

६. अदितेः पुरोनुवाक्या सुत्रामाणं पृथिवीं द्यामनेहसम्। याज्या महीमू षु मातरं सुव्रतानाम्।

७. इयं प्रायणीया पञ्चदशसामिधनीका भवति।

८. अस्या एवापरो धर्म उपांशुहविष्ट्वम्।

९. चोदकप्राप्तयोः प्रतिषेधः शाखान्तरात्।

१०. त्वां चित्रश्रवस्तम स्विष्टकृतः पुरोनुवाक्या। यद्वाहिष्ठं तदग्नय याज्या।

११. शंय्वन्ता प्रायणीयेति श्रुतेः। एतावन्तो वैशेषिकाः प्रायणीयाधर्मा नान्य इति चशब्दः। अतश्च ये ऽस्मिन् प्रकरण उक्ताः प्रायणीयाधर्मास्त एवोदयनीयायामतिदिश्यन्ते। नान्ये आशिषामनिर्वचनमित्येवमादयः।

६.

१. प्रायणीयानन्तरं सोमक्रयः। ततः परिवहनम्। तत्र होतुः संप्रेषितस्यानुवचनम्। तदेतस्मिन्नवधौ भवति। राजानमिति सोमस्य पर्यायो ऽन्यस्मिन्प्रदेशे संव्यवहाराय।

२. शकटचक्रयोस्खलतोः प्रतिरुद्धे[1] वर्त्मनी उच्येते। तयोरन्तरेण तिष्ठन् भद्रादभि श्रेय इत्यादिकामनुब्रूयात्।

३. इमां धियं शिक्षमाणस्य देव वनेषु व्यन्तरिक्षं ततान सोम यास्ते मयोभुव इति चतस्रः। एताः षडप्यन्तरेण वर्त्मनी अनुसंयन्ननुब्रूयात्।

४. शालां पूर्वेणाध्वर्यवः शकटमवस्थाप्य प्रपादयन्ति प्रवेशयन्ति शालायां सोमम्। दशपेये तु ब्रह्मागारं नयन्ति। तत्रापि कथं नाम होतान्वियादित्याध्वर्यवस्य शालामग्रेणेत्यादेरुपदेशः।

५. येनाध्वर्य्वादयो व्रजेयुर्यथाहवनीयं पूर्वेण वापरेण वा तेनानुसमियाद्धोता।

६. या ते धामानि हविषा यजन्तीति गृहीतसोमान्प्रपद्यमानाननुप्रपद्य ततः।

७. येन व्रजेयुस्तेनानुसमियादिति यद्यपरेणाप्याहवनीयं गतस्तथापि प्रत्येत्याग्रेणाहवनीयं दक्षिणामुखः स्थित आगन्देव ऋतुभिर्वर्धतु क्षयमिति परिदध्यात्।

८. उपस्पृश्याप उत्सृज्यते वाग्यमादिः।

---

[1] B. °रुद्धे C (orig.) °रुद्दे।

९. उपसर्जनीरधिश्रयति मदन्तीस्वित्यातिथ्यायां । मदन्त्य आध्वर्यवोक्ता[1] मदन्त्याख्या आपः । ताभिरुदकार्थं उदकप्रयोजनमुपस्पर्शनादि कुर्यादत ऊर्ध्वमाग्नीषोमप्रणयनात् ।

७.

१. सोमपरिवहनादनन्तरमातिथ्यानामेष्टिर्भवति[2] । वैष्णवी विष्णुदेवत्यमस्यां हविः कर्तव्यम् । संज्ञाकरणं शास्त्रसंव्यवहारार्थम् ।

२. वार्त्रघ्नावाज्यभागावित्युक्तं भवति ।

३. प्रधानयाज्यानुवाक्ये । विष्णोर्नु कं वीर्याणि प्र वोचमिति पुरोनुवाक्या । प्र तद्विष्णुः स्तवते वीर्येणेति याज्या ।

४. होतारं चित्ररथमध्वरस्य यस्त्वा स्वश्वः सुहिरण्यो अग्न इति संयाज्ये इति श्रुतेः ।

५. अग्निमन्थनीयानुवचनमासन्ने हविष्यभिमृष्ट[3] इत्यभिप्रायः । एवं व्रतग्रहणाभावानुवृत्तिर्यजमानस्य प्रदर्शिता भवति । तथा च कात्यायनः । अग्न्यन्वाधानव्रतोपायनारण्यभोजनदानब्रह्मवरणानि दीक्षणीयाप्रभृति प्रागुदवसानीयायाः सोमे कृतत्वादित्यत आह ।

६. इयमिष्टिरेवंधर्मिका भवति ।

७. एवमेव श्रुतेः ।

---

[1] B om. मदन्त्याख्या । [2] C (in marg.) ०प्रणयनात् instead of ०वहनान
[3] C (in marg.) ष instead of ष्ट ।

८.

१. आतिथ्यानन्तरं सर्वे सयजमानका ऋत्विजो मदन्तीरुपस्पृश्य वक्ष्यमाणं तानूनप्त्रावमर्शनं कुर्युः। सर्ववचने होतैव केवलः स्यात्परिभाषितत्वादिति।

२. अनाधृष्टमित्येवमादिना मन्त्रेण तानूनप्त्राख्यमाज्यमृत्विजो यजमानश्च समवमृशन्ति। तदाज्यं च विशेष्यते। सहिरण्यं ध्रुवाया आगतं पात्रीस्थं बर्हिषि स्थापितं सत्। सहिरण्यमिति हिरण्यस्याप्राधान्यात् पक्षे केवलमपि। ध्रौवमाज्यमिति पूर्वकारिवशात् सर्वेषामाज्यग्रहणमिति ज्ञापनार्थम्। बर्हिष्यासन्नमिति निराधारशङ्कया पात्रीस्थमित्युक्तम्।

३. तानूनप्त्रावमर्शनादनन्तरं मदन्तीरुपस्पृश्याग्रेणाहवनीयं परीत्य अंशूनुपस्पृशन्तस्त्रिपर्वाणः सोमांशवस्तानुपस्पृशन्तो राजानं सोमं स्पर्शनेन मन्त्रेण चाप्याययन्ते। यजमानषष्ठा होतृब्रह्मोद्गात्राग्नीध्राध्वर्यवः। अंशुरंशुष्ट इत्येवमादिना मन्त्रेण। अत्र मन्त्रे सुत्यापदस्य विकृतौ सुत्याद्वित्वे सुत्याबहुत्वे च साधारणे सोमे वचनोहः[1]। सुत्ये उदृचं सुत्या उदृचमिति।

४. सोमाप्यायनं कृत्वा तत्रैव स्थिता उरोऽभिमर्शनं कुर्वन्ति यमादित्या इत्येवमादिना मन्त्रेण।

५.[2] उपस्पृश्येति गृह्यसिद्धस्य वचनं निह्नवाङ्गार्थम्। सोमाप्याययितार उरोऽभिमर्शनं कृत्वा मदन्तीरुपस्पृश्य प्रत्येत्य निह्नुवते।

---

[1] A B (sec. h) °नस्य नोहः। [2] A om. the comm. on 5. 6 and the beginning of 9, 1.

यज्ञं परिभूय यद्दक्षिणतः सोमाप्यायनाय गतास्तद्दुरितं[1] नमस्कारेणापनयन्तीत्यर्थः। कथं तदित्यत आह। दक्षिणोत्तानाम्पाणीन्। दक्षिणा उत्ताना इतरे तद्विपरीतास्तानेवं विन्यस्य तादृशान्प्रस्तरे कृत्वा निह्नुवते पौर्वाह्णिके निह्नवने[2]। सव्योत्तानानपराह्णे। आपराह्णिके निह्नवने[2]। एष्टा राय इत्येवमादिना मन्त्रेण।

६. आप्यायनमुरोऽभिमर्शनं प्रस्तरे निह्नवनमित्येवमाद्युपसद्युपसदि[3] प्रतीष्टि परिसमाप्त्यनन्तरं कर्तव्यम्। आतिथ्यानन्तरं श्रुतिपाठक्रमेण प्रवर्ग्यो वक्तव्यो यतोऽतस्तमाह।

९.

१. प्रवर्ग्य इति वक्ष्यमाणस्य कर्मणो नामधेयम्। तद्रहितः प्रथमप्रयोगो भवति। तन्न प्रथमयज्ञे प्रवृञ्ज्यादिति (कौ० ८. ३) श्रुतेः।

२. अधिगतसकलवेदार्थस्यानूचानस्य प्रथमयज्ञेऽपि विकल्पतः प्रयोगो भवति। कामं तु योऽनूचानः श्रोत्रियः स्यात्तस्य प्रवृञ्ज्यादिति श्रुतेः।

३. प्रवर्ग्यप्रचार इति वाक्यशेषः। सूत्रारम्भो होतुस्तत्र पश्चादुपवेशनं कथं नाम स्यादिति।

४. अभिष्टौतीति सूत्रच्छेदः। क्त्वानिर्देशः क्रमार्थः। महावीरपात्राणि प्रवर्ग्योपयोगीनि। तेषु साद्यमानेषु पूर्वेण द्वारेण पत्नीशालां प्रविशेत्। न्यायप्राप्तमप्येतदुच्यते। यदा मध्यन्दिने प्रवर्ग्य-

---

[1] C (in marg.) परीतो। [2] A B निह्नुवने। [3] B इत्यतदुप०।

खरणमाग्नीध्रीये भवति तदा तस्मिन् प्रवेशो दक्षिणेन द्वारेण व्यवायात्।

५. आहवनीयखरपात्राणामुत्तरत इति नोक्तम्। क्वचित्सर्वेषामसंभवात्। तद्यथा। आग्नीध्रीये नाहवनीयो नापि द्वौ खरौ। यथासंभवं संचर आहवनीयासमासाल्लभ्यते[1]।

६. प्रवर्ग्यप्रचारप्रदेशस्य पश्चात्संनिधावुपविशेत्।

७. अध्वर्युणा।

८. अर्धर्चं संदधदेकैकां मकारान्तप्रणवावसानयुक्तामभिष्टौति।

९. एकशतसङ्ख्याको ऽयमृग्गणस्तस्येयं प्रथमा।

१०. शाखान्तरीयत्वात्सकलपाठः।

११. विकल्पितान्तस्य शाखान्तर आम्नानात्[2]। ब्रह्म जज्ञानं प्रथमं पुरस्तादिति प्रतीकग्रहणात् सावित्रीः प्रथमा अभिष्टौतीति च श्रुतेः (कौ० ८.३)।

१२. अञ्जन्ति यं प्रथयन्तो न विप्रा इत्येतां महावीरमुखे ऽज्यमाने ऽभिष्टुयात्। स यदेतां होताभ्याहाञ्जन्ति यं प्रथयन्तो न विप्रा इति तदेतं प्रचरणीयं महावीरमाज्येन समनक्तीति शतपथश्रुतेः (१४.१.३.१३)। अध्वर्युश्रुतिवशात्[3] पूर्वमभ्यञ्जनादारब्धव्यम्।

१३. सं सीदस्व महाँ[4] असीति खरस्थयोर्मुञ्जप्रज्वलयोरुपरि महावीरे साद्यमाने ऽभिष्टुयात्।

१४. भवा नो अग्ने सुमना उपेतौ तपो ष्वग्ने अन्तराँ[5]

---

[1] A आहवनीयादीनामसमासात्, C (sec. h.) यम over याम and भ over भ्य।
[2] C (in marg.) दर्शनात्। [3] C om. श्रुति। [4] C महं। [5] C अन्तरं।

अभिचान् यो नः सनुत्यो अभिदासदग्ने। एतास्तिस्रो ऽङ्गारेषूपोह्यमानेष्वभिष्टुयात्।

१५. कृणुष्व पाजः प्रसितिं न पृथ्वीमित्येवमाद्याः पञ्चाभिष्टुयात्।

१६. परि त्वा गिर्वणो गिरः। अधि द्वयोरदधा उक्थ्यं वचः। एते अभिष्टुयात्। ऐन्द्र्यावभिरूपे अभिष्टौतीति (८. ४) श्रुतेः।

१७. शुक्रं ते अन्यद्यजतं ते अन्यत्। अर्हन्बिभर्षि सायकानि धन्वेति। पौष्णीं च रौद्रीं चाभिरूपे अभिष्टौतीति श्रुतेः।

१८. पतङ्गमक्तमसुरस्य मायया तृचं सूक्तम्। स्रक्के द्रप्सस्य धमतः समस्वरन्निति नवकं सूक्तम्। एते अभिष्टौति।

१९. पवित्रं ते विततं ब्रह्मणस्पते द्वे ऋचौ[1]।

२०. वि यत्पवित्रमित्यादिकां कल्पजामभिष्टौति। ता द्वादश पावमान्य इति (८. ५) श्रुतेः।

२१. अयं वेनश्चोदयत्पृश्निगर्भा इत्येतदष्टकं सूक्तमभिष्टौति[2]। नाके सुपर्णमुप यत्पतन्तमित्येतां वर्जयित्वा[3]।

२२. गणानां त्वा गणपतिं हवामहे इत्येकोनविंशतिकं सूक्तम्।

२३. बृहद्वदेम विदथे सुवीरा इति एतदवसरप्राप्तं पठन् वीरकामायै पत्न्यै यथाभिलषितं वीरं पुत्रं ध्यायात्।

२४. का राधद्धोत्राश्विना वामिति एता नवाभिष्टुयात्।

२५. आ नो विश्वाभिरूतिभिरित्येतास्तिस्रो ऽभिष्टुयात्।

---

[1] C adds ता द्वादश पावमान्य इति श्रुतेः। [2] C om. अभिष्टौति। [3] C इत्येतामुद्धृत्याभिष्टुयात्।

२६. प्रातर्यावाणा प्रथमा यजध्वमिति पञ्चर्चं सूक्तं पौर्वाह्णिके प्रवर्ग्यप्रचारे ऽभिष्टुयात्।

२७. आ भात्यग्निरुषसामनीकमिति पञ्चर्चमेवापराह्णिके प्रवर्ग्यप्रचारे ऽभिष्टुयात्।

२८. ईळे द्यावापृथिवी पूर्वचित्तय इत्येतत्पञ्चविंशतिकं सूक्तं सर्वमुत्तमेन स्वरेणाभिष्टुयात्। उत्सृज्य मध्यमां वाचम्[1]।

२९. अग्नस्वतीमित्येतां पठित्वा द्युभिरक्तुभिरित्येतां परिधायाध्वर्युणा इषितो घर्म इत्युक्ते ऽरूरुचदुषसः पृश्निरग्रिय इत्येतामभिष्टुयात्। क्त्वानिर्देशः क्रमार्थः।

३०. ईळेद्यावीयस्योत्तमयानुवचन परिसमाप्य। अत्रापि परिधायेति क्रमार्थो निर्देशः।

३१. अनुवचनान्ते मदन्तीरुपस्पृश्योत्थाय ततो ऽवकाशानामनुवाकेनाध्वर्यवोक्तेन महावीरमुपस्थाय मदन्तीरुपस्पृश्योपविशति[2]।

१०.

१. त्रयस्त्रिंशदुत्तरा अभिरूपा दोहनीया अभिष्टौतीति श्रुतत्वात्। दोहनीयाद्यवसर इदानीम्। तत्र यदा गामाह्वयत्यध्वर्युर्दोहाय तदा उप ह्वये सुदुघां धेनुमेतामित्येतामभिष्टुयात्।

२. हिंकृण्वती वसुपत्नी वसूनामित्यागच्छन्त्यां गवि।

३. गवीत्यनुवर्तते। अभि त्वा देव सवितरित्येतामनुब्रूयात्। अभिधीयमानायां बध्यमानायामित्यर्थः।

---

[1] A C om. उत्सृज्य मध्यमां वाचम्। [2] The Comm. on 31 is om. in B.

४. समी वत्सं न मातृभिः सं वत्स इव मातृभिरिति द्वे। अप्येते अभिष्टुयात् उपसृज्यमानायां गवि। सवत्सीक्रियमाणायामित्यर्थः।

५. यस्ते स्तनः शशयो यो मयोभूरित्येतामभिष्टुयात्। वत्से स्तनं गृह्णति सति।

६. गौरमीमेदनु वत्सं मिषन्तमित्येतामभिष्टुयात् स्तनादुन्मुच्य वत्से नीयमाने।

७. नमसेदुप सीदत संजानाना उप सीदन्नभिज्ञु इत्येते दोग्धर्युपसीदत्यभिष्टुयात्।

८. दोहेन गामुप शिक्षा सखायम्। दुहन्ति सप्तैकाम्। आ दशभिर्विवस्वतः। आत्मन्वन्नभो दुह्यते घृतं पयः। समिद्धो अग्निरश्विनेति कल्पजा। समिद्धो अग्निर्वृषणा रयिर्दिव इति कल्पजेव। तदु प्रयक्षतममस्य कर्म। एताः सप्ताभिष्टुयाद्दुह्यमानायां गवि।

९. अधुक्षत्पिप्युषीमिषम्। उत्तिष्ठ ब्रह्मणस्पते। एते अभिष्टुयादुत्तिष्ठति सति दोग्धरि।

१०. उप द्रव पयसेत्यादिकां कल्पजामाह्रियमाणयोः पयसोरभिष्टुयात्। ननु कतमे एते द्वे पयसी। उच्यते। येनैव क्रमेणाध्वर्युर्गां दोग्धि तेनैव क्रमेण प्रतिप्रस्थाता अजां मयूखे बद्ध्वा दोग्धि। अतो गव्यं आजं च द्वे पयसी।

११. केषां चिदध्वर्यूणामानीय पयसी खरस्थ एव महावीरे आसेकक्रिया। तत्रासिच्यमानयोः पयसोर्यथासंख्यम्। सुते सिञ्चत श्रियमित्येकस्मिन्ना नूनमश्विनोर्ऋषिरित्यपरस्मिन्नभिष्टुयात्।

१२. उदु ष्य देवः सविता हिरण्ययेत्युद्यम्यमाने खरान्महावीरे।

१३. वाजसनेयके पयआहरणादनन्तरं खरान्महावीरमुद्यम्योपयमन्यामाधायासेकः। तत्रासेकोद्यमनकर्मणोर्विपर्यासे यथाकर्माभिष्टुयात्।

१४. अनन्तरं यागार्थमध्वर्य्वादय[1] आहवनीयं व्रजन्ति तेषु प्रवृत्तव्रजनेषु[2] प्रैतु ब्रह्मणस्पतिरित्येतामभिष्टुयात्।

१५. नाके सुपर्णमुप यत्पतन्तमित्येतामृचमनुसंयन्नभिष्टुयात्। काननुसंयन्निति चेत्। येषु प्रव्रजत्सु पूर्वोक्ता।

१६. यत्र तस्य संभवः। क्व च तस्य संभवः। सौत्ये ऽहनि प्रवर्ग्ये क्रियमाणे सदसि होतृषदनमस्ति। तत्राग्नीध्रीयाद्यजतिदेशमनुगत्य प्रत्येत्योत्तरेणाग्नीध्रीयं गत्वा पूर्वया द्वारा सदः प्रपद्य होतृषदन उपविश्य वक्ष्यमाणं कर्म करोति। अन्यत्रासनमाचम्। आसीनन्यायमिति परिभाषितत्वात्।

१७. अध्वर्युणा संप्रेषितः।

१८. उभा पिबतमश्विना गायत्री। तप्तो वां घर्म इत्यादिका कल्पजा त्रिष्टुप्। आभ्यामेकीकृत्य मध्ये ऽनवस्यन् वषट्कुर्यात्। द्वाभ्यां यजेत् त्रिष्टुब्वतीभ्यां पूर्वाह्ण इति (८. ७) श्रुतेः।

१९. घर्मस्याग्ने वीहीत्यनेनानुवषट्करोतीति पूर्वाह्णे पौर्वाह्णिके प्रवर्ग्यचरण इत्यर्थः।

२०. यावदुक्तमेव। नाभ्यधिकं सामिधेन्याद्यपीत्यथशब्दस्यार्थः।

---

[1] A यदासिक्तयोः पयसोर्होमार्थम्, C (in marg) आसिच्यमानयोः पयसोः।

[2] A प्रव्रजत्सु।

२१. अस्य पिबतमश्विना गायत्री। यदुस्रियास्वाहुतमित्येवमादिका जगती कल्पजा। जगद्वतीभ्यामपराश्च इति श्रुतेः।

२२. यथा पूर्वाह्ने।

२३. स्वाहाकृत इत्येवमाद्युभयत्र असंयुज्यविधानात्।

२४. सखे सखायमभ्या ववृत्स्वेत्येतामागच्छति सत्यभिष्टुयात्। उत्तरपूर्वार्धं गत्वाध्वर्युरागच्छति। सो ऽस्याभिष्टवावधिः।

२५. साद्यमाने इति महावीरं खरे सादयत्यध्वर्युस्तस्मिन्नवधौ गन्धर्व इत्था पदमस्य रक्षतीत्येतामभिष्टुयात्।

२६. आवर्तनं महावीरपात्रस्य न्युब्जताकरणम्। तत्कुर्वति सत्यध्वर्यौ तं घेमित्था नमस्विन इत्येतामभिष्टुयात्। प्रागाथमष्टमं मण्डलं तत्रभवा प्रागाथिका।

२७. तत्राध्वर्यूणामग्निहोत्रावृता होमस्ततः पुरा हविर्हविष्मो महि सद्म दैव्यमित्येतामभिष्टुयात्।

२८. हुतशेषस्य प्राणभक्षो ऽवघ्राणमात्रमित्यर्थः।

२९. शाखान्तरादुभयोस्तानेव समुपह्वयेति।

३०. एवमेव द्रष्टव्यम्।

३१. हुतं हविरित्येवमादिको भक्षमन्त्रः। ययोरेव भक्षस्तयोरेवायं भक्षमन्त्रः। न केवलस्य यजमानस्यानन्तरत्वात्।

३२. आ यस्मिन् सप्त वासवा इत्येवमादिकां कल्पजामभिष्टुयात्। संसाद्यमानेषु अध्वर्युणा महावीरपात्रेषु।

३३. सूयवसाद्भगवती हि भूया इत्याशीर्वत्या परिदधातीति (८.७) श्रुतेः।

३४. मदन्तीरुपस्पृश्य वाग्यमादुत्सृज्यते। शान्तिकरणं शुक्रियसूक्तं (वा० ३६. १) वाचमित्यादिकमध्वर्युवशादाद्यन्तयोर्भवत्येव।

३५. सुत्ये प्रवर्ग्यो वा भवत्यहन्यहनि यावत्सुत्यम्। आग्नीध्रीये प्रवर्जनम्। होमस्त्वाहवनीय एव। स्तुते बहिष्पवमाने पौर्वाह्णिकः प्रचारः। माध्यन्दिने पवमाने आपराह्णिकः। एवमेव श्रुतत्वात्। पूर्वकारिवशात्तु क्रिया।

३६. आतिथ्यानन्तरं तानूनप्त्रसोमाप्यायनोरोभिमर्शनप्रस्तरेनिह्नवनं तत्कालोपसदा चरन्ति। प्रवर्ग्यरहिते यज्ञे। प्रवर्ग्यवति तु प्रवर्ग्यं संस्थाप्य।

११.

१. उपसत्स्वरूपमिदानीमुच्यते। उपसद्याय मील्हुष इत्येतास्तिस्रः सामिधेनीराह पूर्वाह्णे। पौर्वाह्णिक्यामुपसदीत्यर्थः। कथं पुनराह। अर्धर्चं संदधदनुच्छ्वसन्नेकैकां सप्रणवां मकारान्तप्रणवावसानां द्विरुक्त्वा तृतीयेन वचनेनोत्तरां संधायावस्येत्।

२. सामिधेनीराहेति संबध्यते। इमां मे अग्ने समिधमित्येतास्तिस्रः आपराह्णिक्यामुपसदि।

३. अनवानमेकैकां सप्रणवां द्विरुक्त्वा तृतीयेन पूर्वस्या वचनेन शुद्धप्रणवान्तेनोत्तरां संधायावस्यति द्वे अनुच्छ्वसन्पठतीत्यर्थः।

४. तृतीयायास्तृतीये वचने यः प्रणवस्तेनाग्निमावह सोममावह विष्णुमावहेति संदध्यात्। यथापठितमेवैतन्नाभ्यधिकं[1] परिसंख्या-

---

[1] A नान्यदधिकं।

नात्। प्रणवेन संधानोपदेशात् अग्ने महाँ असीत्येवमादेरावह देवान्यजमानायेत्येवमन्तस्य चाभावः। तिस्र एव देवता व्यवस्थयावाहयेत्।

५. स्रुगादापनेनाग्निर्होतेत्यादिना सकलेन स्रुचावादाप्य। आदाप्येति निर्देशः क्रमार्थः।

६. तस्माद् तत्रोपांशु चरेयुरिति श्रुतेः (९.१)।

७. अग्निर्वृत्राणि जङ्घनत् अग्नेः पुरोनुवाक्या। य उग्र इव शर्यहेति याज्या।

८. त्वं सोम क्रतुभिः सुक्रतुर्भूः सोमस्य पुरोनुवाक्या। अषाल्हं युत्सु पृतनासु पप्रिमिति याज्या।

९. यः पूर्व्याय वेधसे नवीयसे विष्णोः पुरोनुवाक्या। तमु स्तोतारः पूर्व्यं यथा विदेति याज्या।

१०. यावदादिष्टं यावदुक्तमित्यर्थः। प्राकृतस्य स्विष्टकृदादेर्निवृत्त्यर्थं वचनम्।

११. अग्नेर्य उग्र इवेति पुरोनुवाक्या। अग्निर्वृत्राणीति याज्या। सोमस्याषाल्हं युत्स्विति पुरोनुवाक्या। त्वं सोम क्रतुभिरिति याज्या। विष्णोस्तमु स्तोतारः पूर्व्यमिति पुरोनुवाक्या। यः पूर्व्यायेति याज्या। एवमापराह्णिके उपसच्चरणे विपर्यासः। एवमियमिष्टिद्वयेनैकोपसद्गण्यते[१]। इतरे अप्येवमेव द्रष्टव्ये।

१२. इमां मे अग्ने समिधमित्येतास्तिस्रः सामिधेनीर्द्वितीयेऽहनि पौर्वाह्णिक उपसच्चरणे ऽनुब्रूयात्।

---

[१] A गण्या।

१३. द्वितीय एवाहन्यपराह्ण उपसद्याय मील्हुष इत्येतास्तिस्रः सामिधेनीरनुब्रूयात्। शेषं ह्यस्तनवत्।

१४. येनैव प्रकारेण प्रथमेऽहन्युपसत्तेनैव तृतीयेऽप्यहनि कर्तव्या। एवमेतास्तिस्र उपसदः स्वश्रुतौ। श्रुत्यन्तरे तु ज्योतिष्टोम एव द्वादशाप्याम्नातास्तत्र किमयमेव त्रिको दण्डकलितवत् चतुरावर्तत उत[1] स्वस्थानवृद्ध्या द्वादशसंख्यापूरणमिति संशय आह।

१५. या प्रथमेऽहनि सा चतुरहं क्रियते। या द्वितीये साप्येवमेव चतुरहम्। या तृतीये सा चतुरहमिति। एवमेताः स्वकालाः स्वस्थानस्था[2] एव विवर्धेरन्नेवं क्रमो न बाधितो भवति। तुशब्दः संशयव्युदासार्थः।

१६. प्रत्यहं वा विपर्यासं कुर्यात्। यद्युपसदो विवर्धेरन् एवमपि श्रुतत्वात्। केचित्तु श्रुतिमन्यार्थां मन्यमानाः पूर्वपक्षमेतदिच्छन्ति। सिद्धान्तसूत्रं[3] तु पूर्वम्।

१७. श्वोभाविन्यां सुत्यायां यदहस्तदुपवसथशब्दवाच्यम्। तस्मिन्प्रातरुभे पौर्वाह्णिकमुपसच्चरणमापराह्णिकं च समाप्य। ततोऽन्यत्कर्म।

१२.

१. अग्निप्रणयनं चातुर्मास्येषूक्तं तदिहोपवसथेऽहनि भवति। प्रवर्ग्यरहिते यज्ञे।

---

[1] B om. स्व। [2] C om स्था। [3] C om तु।

२. [1]उपवसथे प्रातः सप्रवर्ग्ये यज्ञे प्रवर्ग्योपसदौ समस्य[2] महावीरपात्रोद्वासनं भवति।

३. तत्र महावीरपात्रोद्वासने प्रस्तोता सामगानं करोति। किं ततः।

४. तत्र तस्मिन्प्रस्तोतुः सामगाने होतुरपि निधनोपायः। सामनिधनोपगमनं पठनं होतुरपि भवति। होतृवचनं ब्रह्मादिनिवृत्त्यर्थम्। तत्र प्रस्तोता साम गायति तत्र होतुर्निधनोपाय इति सूत्रद्वयकरणं सौत्ये ऽहनि प्रवर्ग्यपक्षे तत्रैव प्रवर्ग्योत्सादनं तत्रापि होतुर्निधनोपाय इति ज्ञापनार्थम्।

५. ननु भ्रष्टावसरत्वादप्रवर्ग्ये[3] च विधानान्न प्राप्नोति। उच्यते। श्रुतावविशेषेण व्याख्यातम्। ब्रह्म वा अग्निस्तद्यदुपवसथे ऽग्निं प्रणयन्तीति। तत्प्रवर्ग्योत्सादनादूर्ध्वमुपवसथे यथा स्यादिति सूत्रारम्भः। येषामपि सौत्ये ऽहनि महावीरपात्रोद्वासनं तेषामप्युपवसथ एवाग्निप्रणयनम्। व्याख्यातवचनात्।

१३.

१. श्रुतिक्रमेणाग्निप्रणयनादनन्तरं हविर्धानप्रवर्तनमाह[4]। हविर्धानप्रवर्तनमिति वक्ष्यमाणस्य कर्मणो नामधेयम्। तदर्थमामन्त्रितो आहूतो होता यत्करोति तदुच्यते।

२. हविः सोमाख्यं धीयते ऽवस्थाप्यत इति। हविर्धाने शकटे

---

[1] C (in marg.) क्रमो न बाधितो भवति। [2] A C (sec. m.) समाप्य। [3] C (in marg.) सप्रवर्ग्ये। [4] C om. श्रुति० माह।

उह्येते। ते प्राची शालामग्रेणाध्वर्युणावस्थापिते तयोर्दक्षिणस्योत्तरं वर्त्मोत्तरस्य च दक्षिणमन्तरेण तिष्ठन् होता हविर्धानाभ्यां प्रवर्त्यमानाभ्यामनुब्रूहीति संप्रेषितः। किं करोतीत्यत आह।

३. अपेतो जन्यमित्येवमादिना मन्त्रेण लोष्टं प्रक्षिपेत्। कथम्। दक्षिणपादाग्रतलेन प्रतीचीं दिशं प्रति।

४. प्रेतां यज्ञस्य शंभुवेति तिष्ठन्ननुब्रूयात्। आसीनन्यायप्रतिषेधार्थं पुनस्तिष्ठद्वचनम्।

५. द्यावा नः पृथिवी इमं तयोरिद्घृतवत्पयः। यमे इव यतमाने यदैतम्। एतास्तिस्रो दक्षिणस्य हविर्धानस्योत्तरं वर्त्मोपसंलग्नो ऽनुमंयन् अनुब्रूयात्। स प्राच्यं दक्षिणस्य हविर्धानस्योत्तरं वर्त्मोपनिश्रयेतेति (९.४) श्रुतेः।

६. अधि द्वयोरदधा उक्थ्यं वच इत्येतामनुब्रूयात् छदिषि कीलादावुपरि दीयमाने[1]।

७. विश्वा रूपाणि प्रतिमुञ्चते कविरित्येतामनुब्रूयात्। परिश्रीयमाणयोः रज्जुभिर्बध्यमानयोर्हविर्धानयोः।

८. नाभिर्यस्मिन्फलके तन्नभ्यम्। तत्स्थयोर्हविर्धानयोरा वामुपस्थमद्रुहेत्येतामनुब्रूयात्। यदैने नभ्यस्थे कुर्युरथा वामुपस्थमद्रुहेति (९. ४) श्रुतेः।

९. केचिदध्वर्यवो नभ्यस्थकर्म पूर्वं कुर्वन्ति। ततो मध्यमस्य छदिष आरोपणम्। तत्र कर्मविपर्यासे ऽध्वर्युवशाद्यथाकर्म। आ वामुपस्थं पूर्वाधि द्वयोरित्युत्तरा।

---

[1] C विवेकिलं जादावुपरि दीयमाने।

१०. परि त्वा गिर्वणो गिर इत्येतया परिधाय परिसमाप्यानुवचनं ततो ऽन्यत्कर्म।

११. यत्र स्थितेनानुवचनस्य प्रथमोक्ता तत्र स्थित्वा उत्सृज्यते व्यवायवाग्यमनभ्रमणादिनियमात्। यत्र तिष्ठन्तन्स्थित्वेत्यनुवादपरेण स्थानविधानमतो नासीनन्यायः।

१४.

१. अतिक्रमेणाग्नीषोमप्रणयनं वक्तव्यम्। तस्य तावदवधिमाह। मितेषु निष्पादितेषु। यज्ञागारेषु सदोहविर्धानाग्नीध्रेषु अग्नीषोमौ प्रणयन्ति। तत्राग्निमाग्नीध्रीयं प्रणयन्ति। सोमं हविर्धानम्। ततः किमित्यत आह।

२. तत्प्रभृतीत्यग्नीषोमप्रणयनप्रभृतीत्यर्थः। आनूबन्ध्यायाः संस्थानात्। वक्ष्यति। मैत्रावरुणी च वशानूबन्ध्येति। आ तदीयव्यापारपरिसमाप्तेः। अन्तरेण मध्ये चात्वालोत्करौ तीर्थं प्रवेश इत्यर्थः।

३. कर्म कुर्यादिति वाक्यशेषः।

४. उत्तरेणाग्नीध्रीयं धिष्ण्यं आग्नीध्रशरणस्थमग्निं सदश्चोत्तरेण गत्वा ततः।

५. अध्वर्युश्च प्रतिप्रस्थाता चाध्वर्यू। तावुत्तरेण यज्ञपात्राणि चान्तःपात्यदेशस्थानि[1] तानि चोत्तरेण गत्वा। पूर्वया द्वारा शालां प्रविश्य। अयं यज्ञसंचरः सूत्रान्तरे प्रसिद्धः। तत्प्रतिपत्त्यर्थमव्यवायोदाहरणप्रपञ्चार्थं चोक्तम्।

---

[1] (पात्रदेश॰।

६. शालामुखे भवः शालामुखीयो ऽग्निस्तस्य पश्चादुपविश्य संप्रैषमपेक्षत इति शेषः।

७. इति कार्यान्तरे। तेन[1] कदाचिदध्वर्युवशादग्नये प्रह्रियमाणायानुब्रूहि सोमाय प्रह्रियमाणायेति वेति।

८. एतामेवासीनः शेषमनुवचनस्य तिष्ठन्।

९. उत्तिष्ठ ब्रह्मणस्पत इति लिङ्गादुत्तिष्ठतु।

१०. प्रैतु ब्रह्मणस्पतिरित्येतां प्रव्रजतु लिङ्गादेव।

११. होता देवो अमर्त्य इत्ययं तृचः। उप त्वाग्ने दिवेदिव इति तृचः। एतौ तृचावनुसंयन्ननुब्रूयात् लिङ्गान्न्यायाच्च।

१२. होता देवो अमर्त्य इत्यस्य तृचस्य तृतीयायामृचि भूतानां गर्भमा दध इति यः पादस्तं ब्रुवन् गर्भकामायै पत्न्यै गर्भमियं लभतामिति ध्यायादुत्तरेण सदो ऽनुसंयन्। उदरं वै सद इति सामान्यात्[2]।

१३. आग्नीध्रीयशरणे ऽध्वर्यवो ऽग्निं निदधति स्थापयन्तीत्यर्थः। अतःप्रभृत्याग्नीध्रीये प्रायश्चित्तमाध्वर्यवं यथा स्यादिति सूत्रारम्भः।

१४. अग्ने जुषस्व प्रति हर्य तद्वच इत्येतामाग्नीध्रीय आहुतौ हूयमानायामनुब्रूयात्। तां संप्रत्येतामनुब्रूयात्। अग्ने जुषस्व प्रति हर्य तद्वच इति तस्या एवैषा याज्येत्यर्थवादादाहुतिग्रहणाच्च तदावृत्तावावृत्तिः। (कौ० ब्र० ९.५)

१५. उत्तरेणाग्नीध्रीयमग्निं अनुसंयन्। सोमो जिगाति गातुविदित्येतास्तिस्रो ऽनुब्रूयात्।

---

[1] A इति प्रकारे। [2] A सामान्यश्रुतेः।

१६. उप प्रियं पनिप्नतमित्याहवनीये हूयमानायामाहुतावनुब्रूयात्। अस्यामप्याहुतिरेव[1] प्रयोजिका। अर्थवादात्।

१७. तमस्य राजा वरुणस्तमश्विनेति हविर्धानं प्रपाद्यमाने सोमेऽनुब्रूयात्। व्रजं च विष्णुः सखिवाँ अपोर्णुत इत्येतद् ब्रुवन् गोचपदं गृह्णीयादिति वृद्धवार्त्ता।

१८. अन्तश्च प्रागा अदितिर्भवासीत्यनुब्रुवन्ननुप्रपद्य ततोऽन्यत्कुर्यात्।

१९. दक्षिणेऽनसि कृष्णाजिनमास्तीर्य तस्मिन् सोमं निदधातीत्याध्वर्यवे निवृत्ते श्येनो न योनिं सदनं धिया कृतम्। गणानां त्वा गणपतिं हवामहे। अस्तभ्नाद् द्यामसुरो विश्ववेदा इत्येता उत्तरतो दक्षिणस्यानसो दक्षिणामुखस्तिष्ठन्ननुब्रूयात्।

२०. एवा वन्दस्व वरुणं बृहन्तमित्याशीर्वत्या परिदधातीति (९.६) श्रुतेः।

२१. मध्याद्धविर्धानयोर्यदागारं तस्य पूर्वस्यां द्वारि। प्रवेशनिष्क्रामाविरोधेन बहिरुपविशतीति। विनापि कर्मणेहोपवेशनविधिरयम्।

२२. यद्यपरया द्वाराध्वर्युभिः सोमः प्रपाद्यते ततस्तेनैव होतानुसमियान्न ब्रह्मयजमानौ होतृवचनात्।

२३. प्रपाद्यमानेऽनुप्रपद्येत्येवमाद्यपरयापि द्वारा प्रपाद्यमाने पूर्वेणैव तुल्यम।

२४. दक्षिणेन बाहुना आवृतो दक्षिणावृत्। तादृशाऽपरया

---

[1] ('अस्या आहु०।

द्वारा निष्क्रम्य ततः सव्यावृत्तमनुत्तरेण हविर्धाने हविर्धानशकटोपलक्षितमागारमुत्तरेण गत्वा तत्रैव पूर्वस्यामेव द्वार्युपविशति।

१५.

१. अग्नीषोमदेवताकेन पशुना श्वोभाविनि सौत्ये यजते। य एवासौ सोमस्योपवसथे ऽग्नीषोमीयस्तमेव तेनाप्नोतीति लिङ्गात्। नन्वन्यत्रोपवसथशब्देन पौर्णमास्यमावास्ये उच्येते। सत्यम्। प्रधानयागात्पूर्वमहस्तत्राप्युपवसथशब्दवाच्यम्। अत्रापि तत्समानमेव। ननूपवसथशब्दो ऽतिरिच्यते। प्रकृतत्वात्। सत्यम्। अग्नीषोमीयस्यैवायं कालनियमो यथा स्यात्। नान्येषां तत्प्रकृतीनाम्। तथा च निरूढेनायनाद्यन्तयोर्यजत इतीज्यार्थेष्वेवाग्नीषोमीयधर्मा नान्येषु।

२. यूपायाज्यमानायानुब्रूहीत्युक्तः अञ्जन्ति त्वामध्वरे देवयन्त इत्यन्वाह।

३. उच्छ्रीयमाणायानुब्रूहीत्युक्तः उच्छ्रयस्व वनस्पते। समिद्धस्य श्रयमाणः पुरस्ताज्जातो जायते सुदिनत्वे अह्नाम्। ऊर्ध्व ऊ षु ण ऊतये। ऊर्ध्वो नः पाह्यंहसो नि केतुना। इत्येता अनुब्रूयात्।

४. परिवीयमाणायानुब्रूहीत्युक्तः युवा सुवासाः परिवीत आगादिति परिधाय परिसमाप्यानुवचनम्। यूपायाज्यमानायेत्येवमादिसंप्रैषग्रहणं प्रयोजकार्थम्। अतस्तद्वशादपशये ऽपि यूपधर्मप्राप्तिः।

५. रज्जुकायावस्थो ऽग्निमन्थनीया अन्वाह। तिष्ठन्निति वचनाच्च पश्चाद्वेदेः। अन्वाहेति वचनात् सति मन्थने। मन्थनमन्वित्यर्थः।

६. यज्ञेन यज्ञमयजन्त देवा इत्येतया परिदध्यात्तं मर्जयन्तेति सकृदुक्त्वा । एतया त्वत्र च चातुर्मास्येषु चाथ यत्र पशुरालभ्यते तदेतां पराचीमनूच्य यज्ञेन यज्ञमयजन्त देवा इति त्रिष्टुभा परिदधातीति (८.२) श्रुतेः ।

७. अत्रैव तिष्ठन्सामिधेनीरन्वाह[1]। मनोतासूक्तादनन्तरं श्रुतानुक्तत्वात् । स एव क्रमो मा भूदिति वचनम् । नन्वाकृतिक्षपणार्थत्वादिध्मस्य श्रुतिक्रमाच्च तत्रैवेध्माधानमनुवचनं च युक्तम् । उच्यते । नेध्मस्य[2] हविःक्षपणार्थतैव[3] सङ्ख्यानियमात् । मनोतासाम्प्रदश्यार्थवादसंबन्धेनार्थवादार्थं[4] । तत्र श्रुतिः ।

८. पशुशब्दः प्रधानावदानवचनम् । अतः प्रधानावदानदेवतामावाह्य अव्यवहितं वनस्पतिमावाहयेत् । एवमेव श्रुतत्वात् ।

९. प्रकृतिवदध्वर्युमाग्नीध्रं च संमृश्य षण्मोर्वीरित्येवमादिकं मन्त्रं जपित्वा तिष्ठति ।

१०. मित्रावरुणयोरित्येवमादिना मन्त्रेण यजमानो मैत्रावरुणाय दण्डं समर्पयति ।

११. मित्रावरुणयोरित्येवमादिना मन्त्रेण यथार्थम् । यादृशं प्रतिग्रहणार्थस्तादृशं विपरिणम्य दक्षिणपूर्वार्धे होतुस्तिष्ठन् प्रतिगृह्णीयात् ।

१२. दण्डं प्रतिगृह्य मैत्रावरुणो दक्षिणादृद्दक्षिणेन होतारं गत्वाग्रतः स्थितः पूर्वो होतुः प्रतिपद्यते ।

---

[1] C om. अत्रैव °न्व । [2] A C (sec. h.) आकृति instead of इध्म । [3] A °र्थं । [4] B °वदनार्थं ।

१४. उत्तरेण हविर्धाने इति हविर्धानागारमुत्तरेण दक्षिणेनाग्नीध्रीयं धिष्ण्यमदूरे गत्वा पूर्वया द्वारा सदः प्रपद्य स्वस्य धिष्ण्यस्य पश्चादुपविश्य मैत्रावरुणः होता तु[1] होतृषदने एवमनेन क्रमेण संचरप्रवेशनोपवेशनानि कृत्वा एकादश वक्ष्यमाणकान् प्रयाजान्यजति। कथमित्यत आह।

१६.

१. प्रैषा होता यक्षदग्निमित्येवमादयः पाशुकाः। होता यक्षदिन्द्रं हरिवानित्येवमादयश्च सौमिकाः प्रसिद्धाः। ते सर्व एव मैत्रावरुणस्य भवन्तीति लाघवार्थं परिभाषणम्।

२. संप्रैषे च प्रदाने पुरोनुवाक्या मैत्रावरुणस्य भवन्ति। चकारः पूर्वेण सह समुच्चयार्थः।

३. प्रयाजाधिकारादूर्ध्वम् उत्सृज्यते मैत्रावरुण इति यावत्। यथा प्रैषा मैत्रावरुणस्य तथानुवचनान्यपि। पर्यग्निकरणादीनि तस्यैव भवन्ति।

४. प्रैषानुवाक्यानुवचनानि प्रह्वाणः कुवक इव तिष्ठन्दण्डावष्टम्भस्थो मैत्रावरुणो ऽनुब्रूयात्।

५. समिधः प्रेष्येति विशिष्टेन संप्रैषेण संप्रेषितो होता यक्षदग्निं समिधा सुषमिधा समिद्धमित्येवमादिना प्रैषसूक्तेनोभयवता तनूनपान्नराशंसान्यतरप्रयोगेण प्रत्येकमुत्तरेषु[2] प्रेष्यप्रेष्येत्युक्तो मैत्रावरुणः प्रेष्यति। प्रैषानाहेत्यर्थः।

---

[1] C om. होता तु। [2] B ins. प्रैषेषु।

६. दाशतयीषु दशैवाप्रीसूक्तानि। तेषां सामान्यविनियोगार्थमेतत्सूत्रम्। तेन घृतं मिमिक्षे देव त्वष्टर्यद्ध चारु त्वमानळित्येतयोर्विशेषविनियोगे सति प्रयाजत उद्धारः। एतयोः स्थाने ऽन्यार्षेये कर्तव्ये। यातयामत्वदोषपरिहारायेति वृद्धसंप्रदायः।

७. यदार्षेयो यजमानस्तदार्षेय्या आप्रियो भवन्ति। तद्यथा। वैश्वामित्रस्य यजमानस्य समित्समित्। वासिष्ठस्य जुषस्व न इति।

८. अथवा समिद्धो अद्य मनुष दुरोण इत्येताः सर्वेषां भवन्ति। येषामपि समानार्षेयमाप्रीसूक्तमस्ति। अब्राह्मणस्य तु समिद्धो अद्येत्येतदेव भवति। न पुरोहितार्षेयम्। प्रवरमात्रस्य तदीयस्य वचनात्।

९. यस्तु नाराशंसयाजी[1] संभवत्स्वार्षेयनाराशंसस्तस्य स्वैव कार्या समिद्धो अद्य मनुष इत्यत्रासंभवान्नाराशंस्याः। अत्रोदाहरणम्। आत्रेयस्य समिद्धो अद्येति वैकल्पिके प्रयोगे नराशंसः सुषूदतीति भवति। येषां स्वा न विद्यते तेषां वासिष्ठी। निरुक्ते तथा दृष्टत्वात्।

१०. दशभिः प्रयाजैश्चरित्वा पर्यग्नये ऽनुब्रूहीत्येवं[2] संप्रेषितो ऽग्निर्होता नो अध्वर इत्याद्यास्तिस्र ऋचो ऽन्वाह मैत्रावरुणः परिभाषितत्वात्।

११. उप प्रेष्य होतर्हव्या देवेभ्य इत्यध्वर्युणा संप्रेषितो मैत्रावरुणो ऽजैदग्निरसनद्वाजमित्येवमादिकमुपप्रेषसंज्ञकं प्रैषमाह।

१२. उक्ते मैत्रावरुणेनोपप्रैषे दैव्याः शमितार इत्यादिक-

---

[1] A संभवस्वार्षेयेन०, C ०र्षेये०। [2] A ०त्यध्वर्युणोक्तो।

मध्रिगुसंज्ञं प्रैषं होतानुब्रूयात् । उक्तवचनादध्रिगोरावृत्तावुपप्रैषस्यावृत्तिः ।

१७.

१. मेधपतिशब्दस्योहविकारो वक्ष्यत एव ।

२. [1]अस्मा इति पुल्लिङ्गैकवचनम् । [1]आभ्यामिति द्विवचनम् । [1]एभ्य इति बहुवचनम् । तत एवं पशुद्वित्वे पशुबहुत्वे च वचनोहः । एकस्मिन्स्त्रीपशौ आस्या अग्निं भरत । द्वयोः आभ्यामग्निं भरत । बहुषु आभ्यो अग्निं भरत । पुल्लिङ्गपशुद्वित्वे अन्वेनौ माता मन्यतामिति । बहुत्वे अन्वेनान्माता मन्यतामिति । स्त्रियाम् । अन्वेनां माता । द्वित्वे अन्वेने माता । बहुत्वे अन्वेना माता । मन्यतामित्यस्यानूहो ज्ञातिनामभिः समानाधिकरणत्वात् ।

३. पुरुषे एकस्मिन्नालभ्यमाने उदीचीनाँ अस्य पदो निधत्तात् । पुरुषपशुद्वित्वे[2] उदीचीनाँ एनयोः पदो निधत्तात् । पुरुषबहुत्वे उदीचीनाँ एषां पदो निधत्तात् । स्त्रिया एकत्वे उदीचीनाँ अस्याः पदो निधत्तात् । स्त्रीपशुद्वित्वे उदीचीनाँ एनयोः पदो निधत्तात् । बहुत्वे उदीचीनाँ आसां पदो निधत्तात् । ननु चास्येति प्रथमादेशस्तेन द्विवचने अनयोरिति प्राप्नोति । नेत्युच्यते । अस्मा अग्निं भरतेति प्रथमकथनादन्वेनमिति च प्रकृतत्वात् । चरकाणां[3] चानुदात्तपाठादन्वादेशो ऽस्यशब्दः । पृथिवीं शरीरमिति पश्वेकत्वे । शरीरे शरीराणीति द्विबह्वोः ।

---

[1] C ins. अ । [2] C om. पशु । [3] C च कारकाणां ।

४. एकधैकधेति वक्ष्यत्येव। अस्येति पूर्ववदूहो विकारेषु। पुराशब्दोऽव्ययम्। तस्य द्विवचनबहुवचनयोर्विशेषाभावात् वीप्सया द्वित्वबहुत्वप्रदर्शनमन्यथानभिधानात्। पिश अवयवे पिश छेदने वा धातुः। अतो निरवयवां वपामुत्खिदतादच्छिन्दन्त इति वेति। अपिशम इत्येकवचने प्राप्ते ऽपिशम इति बहुवचनं तेनायथार्थनियमादनूह्यम्[1]। वपामुत्खिदतात्। वपे उत्खिदतात्। वपा उत्खिदतात्। यथावचनं विकारेषु। अन्तरित्यव्ययम्। तस्य वीप्सयैव द्वित्वबहुत्वयोरभिधानम्[2]।

५. अस्येति प्रदर्शितम्। द्वित्वे वक्षसी बहुत्वे वक्षांसि। प्रशसेति प्रकृष्टेन शासेनेति[3] केषांचिन्मतिः। अपरेषां प्रशस्तौ बाहू इति। ततश्चोदनासंदेहादनूहः। बाहूनिति बाहुबहुत्वे। दोषाणीति बहुवचनं तद्बहुत्वे। कश्यपेवांसानच्छिद्राः श्रोणीः कवषोरूस्रेकपर्णाष्ठीवतः। पश्वनेकत्वे बहुवचनान्येतानि। ननु छान्दस आकारः सर्वासां विभक्तीनामविशेषेण स्मर्यते। किं तत्रोहेन। उच्यते। शलादिप्रतिषेधो ज्ञापकम्। भवत्येवंरूपाणामूह इति।

६. षड्विंशतिशब्दस्योपरिष्टाद्विचारः करिष्यते। अस्येति कृतविचारम्। अनुष्ठ्येत्यव्ययं निश्चयेनेत्यर्थः। गात्रंगात्रमिति वीप्सयैवाभिहितत्वादविचारः। अस्येति पूर्ववत्। अनूनमित्यस्याविकारः। प्रकृतावनूहितत्वात्।

---

[1] C (orig. °नियमत्वादूह्यं alt. to नियमादनूह्यं)। [2] A °धाम्, C °धानात्।
[3] A शासनेनेति।

७. ऊवध्यगोहमिति वक्ष्यति। पार्थिवमित्यस्येहानूहः। ऊवध्यविशेषणत्वात्।

८. अस्नेति विकारेषु यथासमाम्नातमिति वक्ष्यति।

९. वनिष्ठु स्थूलान्त्रम्। पश्वनेकत्वे तस्योहः। अस्येति पूर्ववदूह्यम्। मा राविष्ट मा छित्सीष्टेत्यर्थः। ततश्च पशुद्वित्वे वनिष्ठू एनयोर्मा राविष्ट। बहुत्वे वनिष्ठूनेषां मा राविष्ट। स्त्रियाम्। अस्या एनयोः आसामिति यथोक्तम्। वनिष्ठुसंनिधानादुरुकेण वपाभिधानमिति मीमांसकाः। तस्माद्वपाभिधानं। सर्वबहुत्वादुरु करोतीत्युरुकम्। हविरभिप्रायं नपुंसकम्। अत ऊहः। उरुके उरुकाणीति यथावचनम्। नेद्युष्माकमपि पुत्रे वा पौत्रे वा रविता छेत्तेत्यर्थः। रवच्छिद्यादित्यर्थः। हे शमितारो युष्माकमपि कल्याणमत्रेत्यभिप्रायः। न्यूने ऽप्यध्रिगौ नवैवोच्छ्रासाः। तदधिकारे सत्यध्रिगुवचनात्। नवकृत्वो ऽध्रिगावववानिति (१०.४) श्रुतेः। हृदयनाग्रे ऽन्यमालभेतेति वपानिवृत्तौ पुरा नाभ्या अपिशसो वपामुत्खिदतादुरुकं मन्यमाना इत्युद्धरेत्। प्रास्मा अग्निं भरतोवध्यगोहमस्मा रक्षः संवृतादिति च कृतत्वात्। तत्र षष्ठ उच्छ्रासे मध्ये ऽवसानम्। मृतेन संस्थापने सर्वमध्रिगुं ब्रूयात्। अनन्तरायमु तर्हि यजूंषि जपेदिति शतपथे (१.१.२.८) पात्र्यां हविर्ग्रहणे आनीयजुषां दर्शनात्।

१०. अध्रिगो शमीध्वमित्यादिना त्रिः परिधाय तत उभावपापस्येत्युपांशु जपेत्।

११. मेदस्य संज्ञप्यमानस्याध्यक्षा अमामेति शतपथे (३.८.१.१५) सर्वेषामविशेषात्संज्ञप्यमानस्येक्षणप्रतिषेधः।

१२. पृषदाज्यावेक्षणमेव न सर्वप्रायश्चित्तमपि । प्रायश्चित्तवचनात् ।

१३. यां कांचिद्वैष्णवीमित्यविशेषात् । प्रथमं वा नियम्येति न्यायादिदं विष्णुर्वि चक्रम इति ।

१८.

१. स्तोकेभ्योऽनुब्रूहीति संप्रेषितो मैत्रावरुणो जुषस्व सप्रथस्तममित्येकां इमं नो यज्ञममृतेषु धेहीति पञ्चकं सूक्तमन्वाह ।

२. स्वाहाकृतिभ्यः प्रेष्येति संप्रेषितो होता यक्षदग्निं स्वाहाज्यस्येति प्रेष्यति ।

३. आप्रीणां विनियुक्तानामविनियुक्तोत्तमा याज्या ।

४. प्रसिद्ध उत्तमः प्रयाजः । तं वपां चान्तरेण होतृमैत्रावरुणयोर्वाग्यमनं भवति । न स्वाहाकृतीश्च वपां चान्तरेण वाचं विसृजेतेति (१०.५) श्रुतेः ।

५. तौ न पशौ न सोमे करोतीति वचनात् । सवनीये[1] चावाहनश्रुतेरथावाहन आवह देवान्यजमानायाग्निमग्न आवह वनस्पतिमावहेति दर्शनात् ।

६. यदि यजति ततोऽग्निः प्रत्नेन सोम गीर्भिरित्येवेति । श्रुत्यन्तरादयं विकल्पः ।

७. ये दार्शपौर्णमासिका निगमा आवाहनादयस्तानाज्यभागदेवते अग्नीषोमौ निगच्छतः । यथायथं निगमान् लभेते इत्यर्थः ।

---

[1] C (in marg.) चासावाहनं । चा instead of चावाहन० ।

ानु सिद्धमेवैतदिज्यमाना देवता निगच्छन्तीति वचनात्। सत्यम्। ावनावाहनश्रुतिदर्शनादाज्यभागयोर्यागपक्षे ऽपि निगमाभावसंदेहः शात्। स मा भूदिति सूत्रारम्भः। ननु तस्या आवाहनश्रुतेः का ाति:। उच्यते। तत्रैतावन्मात्रं विवक्षितम्। प्रधानादनन्तरं वनस्पतेरावाहनमिति। दार्शपौर्णमासिका निगमास्तेष्विति बहुवचनद्दिश्यमानविशेषणत्वादविवक्षितम्।

८. दार्शपौर्णमासिकान्निगमादूरभवेषु प्रैषेषु नाज्यभागौ निगच्छतः। शाखान्तरेष्वन्यथापाठात् संदेहो मा भूदिति स्पष्टार्थं सूत्रम्।

९. अग्नीषोमाविमं सु म इति वपायाः पुरोनुवाक्या कर्तव्या।

१०. होता यक्षदग्नीषोमौ छागस्येत्येष प्रैषो भवति।

११. युवमेतानि दिवि रोचनानीति याज्या। वपाया इत्येत्प्रकृतमेव। विकारेषु यथाचोदितम्[1]। पशुद्वित्वे छागयोर्वपयोर्मेदसोः[2]। पशुबहुत्वे छागानां वपानां मेदसाम्[3]। एकदेवत्ये जुषतां द्विदेवत्ये जुषेतां[4] बहुदेवत्ये जुषन्ताम्।

१२. मैत्रावरुणः पूर्वस्ततो होतेति। यथाप्रपन्नमुपनिष्क्रम्य चात्वालं गत्वा तस्मिन्निदमापः प्र वहतेति तृचेनोपस्पृश्य मार्जयित्वेत्यर्थः। अथ चात्वाले मार्जयन्त इति शतपथश्रुतेः शान्तिराप इति च वाक्यशेषादद्भिर्मार्जनं तत्कृत्वोत्सृज्येते होतृमैत्रावरुणौ। सवायादेर्नियमात्।

---

[1] B यथादेवतम्। [2] B om. वपयोः resp. वपानां C मेदसः। [3] C मेदसः। [4] C om. द्वि॰ जु॰।

१९.

१. पशुपुरोळाशप्रचारायाध्वर्युणामन्त्रितौ होतृमैत्रावरुणौ चात्वालोत्करावन्तरेण प्रविश्याग्नीध्रीयं धिष्ण्यमुत्तरेण होतृधिष्ण्यं चोत्तरेण गत्वा यथाधिष्ण्यमुपविशतः।

२. पशुपुरोळाशस्याग्न्यन्वाधानादीन्यङ्गानि प्राप्तानि प्रतिषिध्यन्ते। पश्वर्थान्यङ्गानि[1] पशुपुरोळाशस्याप्यर्थं प्रयोजनं साधयन्ति। य एव पशोस्तैरर्थः क्रियते स एव पशुपुरोळाशस्यापीति। कुतः। विभवात्। विभवः सामर्थ्यम्। दृष्टादृष्टसंबन्धिन्युपकारे कर्तव्ये। पशुप्रयुक्तान्यपि समर्थानीत्यर्थः।

३. तत्रोदाहरणम्। अग्नीषोमीयस्य पशुपुरोळाशमन्वञ्चि देवसूभ्यो हवींषि इति वक्ष्यति। तेषां च प्रैषरहितं प्रदानम् पशुपुरोळाशस्य च सप्रैषम्। तत्र स्विष्टकृति संदेहः। किं पशुपुरोळाशस्विष्टकृदिळामग्न इत्येवमादिर्भवतु पशुपुरोळाशप्राधान्यात् किं वा ऐष्टिको देवसूहविषां भूयस्त्वादिति। तत्र सूत्रेणैव निश्चयः। पुरोळाशस्विष्टकृत्समवाये ऽपि। पशुपुरोळाशस्विष्टकृदिळामग्न इत्यादिर्भवति समवाये ऽपि। बहुत्वे ऽप्येषामागन्तूनाम्[2]। कुतः। प्राधान्यात् पशुपुरोळाशस्य। तत्रैव देवसूहविषां प्रक्षेपात्। तथा च तत्रैव माध्यन्दिनश्रुतिः। आश्राव्याहाग्नये स्विष्टकृते प्रेष्येति। यत्पुनः सपशुषु चातुर्मास्येषु कात्यायनवचनं पशुपुरोळाशमनु हवींषि

---

[1] A पशुप्रयुक्तानि यान्यङ्गानि तानि पशुपुरो°, C om. पशुपुरो° साधयन्ति।

[2] A B (orig.) om. एषाम्।

निर्वपति तेषां स्विष्टकृद्भूयस्त्वादिति युक्तं तत् । तेषां[1] तत्र प्राधान्यात् भूयस्त्वात् [2]न्यायस्य परिपुष्टत्वादिति[2] हेत्वर्थः ।

४. प्रयोगः कर्तव्य इति वाक्यशेषः । अन्वायातानि हवींषि अतुल्यानि । अतस्तेषामतुल्यानामनूहेन प्रयोगः कार्यः । कस्यायमूहप्रतिषेधः । हविरभिधानस्येति ब्रूमः । यद्ययमूहप्रतिषेधो न स्यात् ततश्चरुपुरोलाशानामन्वायातने ऽग्निमद्य होतारमवृणीतायं यजमानः पचन् पक्तीः पचंश्चरुपुरोलाशानिति प्राप्नुयात् । न चेष्यते । तदर्थं प्रतिषेधः क्रियते ।

५. नेति प्रतिषेधस्य सन्तीत्यनेन सह संबन्धः । निगमा निगदाः । आवृत्त्यपेक्षं बहुवचनम् । स्विष्टकृन्निगदस्य चायं प्रतिषेधः । केषाम् । पशुतन्त्रे चोद्यमानानाम् । यदि पुनः कथं चिदिष्ट्यावृत्तिर्भवति हविषो नाशदोषापहारनिमित्ता ततः स्विष्टकृन्निगदो भवत्येव । कुतः । पशुतन्त्रे चोद्यमानानामिति विशेषणात् ।

६. अग्नीषोमा यो अद्य वामिति [4]पशुपुरोलाशस्य पुरोनुवाक्या भवति ।

७. होता यक्षदग्नीषोमौ पुरोलाशस्य इत्येवमादिकः प्रैषो भवति । पुरोलाशयोः पुरोलाशानां जुषतां जुषन्तामिति यथाप्राप्तो विकारेषूहः ।

८. अग्नीषोमा पिपृतमर्वतो न इति पशुपुरोलाशस्य याज्या ।

---

[1] A कात्यायनानां चातुर्मास्यदेवतानां तेषां । [2] C प्राधान्यभू॰ B C ॰कान्याय॰ ।
[3] C ins. तत्र । [4] C om. पशु ।

९. इळामग्ने पुरुदंसं सनिं गोरिति पशुपुरोळाशस्विष्टकृतः पुरोनुवाक्या भवति।

१०. होता यक्षदग्निं पुरोळाशस्येत्येवमादिकः पशुपुरोळाशस्य स्विष्टकृतः[1] प्रैषो भवति।

११. अग्निं सुदीतिं सुदृशं गृणन्त इति याज्या।

१२. संमार्जनान्तामिळां निर्वर्त्य पशुना चरन्ति। क्रमार्थं सूत्रम्।

१३. मनोतायै हविषोऽवदीयमानस्यानुब्रूहीत्युक्तस्त्वं ह्यग्ने प्रथमो मनोतेत्येतन्मनोतासूक्तमन्वाह। मनोतेति संव्यवहारार्थं संज्ञाकरणम्।

१४. अग्नीषोमा य आहुतिमित्येषा पशोः पुरोनुवाक्या। प्रधानपश्ववदानानामित्यर्थः।

१५. होता यक्षदग्नीषोमौ छागस्येत्येवमादिकः प्रैषो भवति देवतान्यत्वे प्रातिपदिकोहः। एकत्वबहुत्वयोर्वचनोहः। छागस्येति द्वित्वबहुत्वयोर्वचनोहः। स्त्रियां लिङ्गोहः। मेषादिषु प्रातिपदिकोहः। पुनश्चान्य ऊहविकारो वक्ष्यते।

१६. अग्नीषोमा हविषः प्रस्थितस्येत्यस्या याज्याया अर्धर्चे तावद्विरमेद्यावद्वसाहोमः।

१७. कृते वसाहोमे अस्या एव याज्याया उत्तरार्धर्चान्ते वषट्करोति प्रधानक्षेपाय।

---

[1] Com. स्विष्टकृतः।

१८. देवेभ्यो वनस्पते हवींषीत्येवमादिका वनस्पतेः पुरोनुवाक्या।

१९. होता यक्षद्वनस्पतिमित्येवमादिकः प्रैषः। अत्र छागस्येति यथाविकारमूह्यम्। छागयोश्छागानामिति। तच्चैतौ पशुद्वित्वे तच्चैतान्पशुबहुत्वे। स्त्रियां तच्चैतामिति एकत्वे तच्चैते इति द्वित्वे तच्चैता इति बहुत्वे। रभीयांसं वक्ष्यति।

२०. वनस्पते रशनया नियूयेत्येवमादिका याज्या भवति।

२१. पिप्रीहि देवाँ उशतो यविष्ठेति स्विष्टकृतः पुरोनुवाक्या कार्या। प्रकृतिसिद्धस्याप्युपदेशो नियमार्थः। ततो बार्हस्पत्यमैत्रावरुण्योर्विराजौ।

२२. छागस्येति विकारेषूक्त ऊहः।

२३. ये यजामहे ऽग्ने यदद्येति याज्या। निगदप्रतिषेधः शाखान्तरात्।

२४. इळामुपह्वास्यमानस्येत्यत आरभ्य मार्जनपर्यन्तं कर्म कृत्वा तत एकादशानुयाजान्यजति।

२०.

१. देवं बर्हिः सुदेवं देवैः स्यादित्येवमादिभिरेकादशभिर्यजेत्यन्तैर्मध्ये ऽनवानं[1] प्रेष्यति मैत्रावरुणः परिभाषितत्वात्। वसु वार्याणि यजमानाभ्यां वसु वार्याणि यजमानेभ्यो यथाविकारमूहः।

---

[1] C. °वमादिभिर्यजयजेत्यन्तैर्मध्ये ऽनवानं।

२. प्रथमद्वितीयौ तु चलन्तरेणेत्येवं नवसु यथाक्रमेण प्राप्तेष्वाह[1]।

३. अष्टमनवमौ देवो नराशंसो देवो अग्निरित्येतावन्तरेणागन्तू वक्ष्यमाणौ भवतः। आगन्तुवचनातिरेकादिष्टकापशौ द्वादशानुयाजके अत्रैवागन्तुप्रक्षेपः[2]।

४. देवो वनस्पतिरिति नवमः। देवं बर्हिर्वारितीनामिति दशमः।

५. सूक्ता प्रेष्येति संप्रेषितो ऽग्निमद्येत्यादिकं सूक्तवाकप्रैषमाह। द्वियजमानके। अग्निमद्य होतारमवृणीतामिमौ यजमानौ पचन्तौ पक्तीः पचन्तौ पुरोलाशं बध्नन्तावग्नीषोमाभ्यां छागम्। बहुयजमानके। अग्निमद्य होतारमवृणतेमे यजमानाः पचन्तः पक्तीः पचन्तः पुरोलाशं बध्नन्तो ऽग्नीषोमाभ्यां छागम्। पुरोलाशद्वित्वबहुत्वयोः। पुरोलाशौ पुरोलाशान्। देवतापदमूह्यं यथादेवतम्। छागद्वित्वबहुत्वयोः। छागौ छागान्। स्त्रियां छागां छागे छागाः। सूपस्था अद्य देवो वनस्पतिरभवदग्नीषोमाभ्यां छागेन। देवतापदमूह्यं यथादेवतम्। छागद्वित्वबहुत्वयोः। छागाभ्यां छागैः। स्त्रियां छागया छागाभ्यां छागाभिः। अघत्तां तं मेदस्तः[3]। एकदेवत्ये। अघत्तं मेदस्तः। बहुदेवत्ये। अक्षंस्तं मेदस्तः[4]। पशुद्वित्वबहुत्वयोस्तौ मेदस्तः तान्मेदस्तः[5]। प्रति पचताग्रभीष्टामित्यत्र पचतेत्योकारान्तं[6]

---

[1] C प्रोक्षेष्वाह। [2] B चम्यागन्तुक। [3] B ins. प्रति पचताग्रभीष्टामवीवृधेतां पुरोलाशेन। [4] A ins अघसन्तं मे॰ अघसंस्तं म इति वा। [5] A ins तं मेदस्तः। [6] B ॰त्याका

वाजसनेयिनां। प्रत्यग्रभीष्टां पचतो यजमानस्येत्यर्थः। अपि वा मेदसश्च पशोश्च साम्यं द्विवचनं स्यादिति चोदनासंदेहात्पचतेत्यनूह्यम्। अग्रभीष्टामित्युपरिष्टाद्वक्ष्यति[1]। अवीवृधेतामिति च। पशुपुरोलाशद्वित्वबहुत्वयोः। पुरोलाशाभ्यां पुरोलाशैः। त्वामद्य ऋषे आर्षेय ऋषीणां नपादित्यग्निप्रार्थनत्वादनूह्यानि[2]। अवृणीतायं यजमान इत्यूहेन। प्रदर्शित ऊहः पूर्वत्र। ता या देवा देव दानान्यदुरित्ययथार्थत्वादनूह्यम्। तान्यस्मै। द्वियजमानके तान्याभ्यां। बहुयजमानके तान्येभ्यः।

६. प्रसङ्गेनोक्तं ग्रन्थलाघवाय। अग्निमद्य होतारमवृणीतायं सुन्वन्यजमान इत्येवमादिकं सौमिकाख्यं सवनीयपशौ ब्रूयात्। अत्रापि द्वियजमानके। अग्निमद्य होतारमवृणीतामिमौ सुन्वन्तौ यजमानौ पचन्तौ पक्तीः पचन्तौ पुरोलाशौ बध्नन्तौ। यथादेवतं। छागौ छागान्। इन्द्राय सोमं सुन्वन्तौ भृज्जन्तौ हरिभ्यां धानाः। बहुयजमानके। अग्निमद्य होतारमवृणतेमे सुन्वन्तो यजमानाः पचन्तः पक्तीः पचन्तः पुरोलाशान् बध्नन्तः। यथादेवतं। छागौ छागान्। इन्द्राय सोमं सुन्वन्तो भृज्जन्तो हरिभ्यां धानाः। अवीवृधेतामिति द्विवचनं सवनीयदेवतां पशुपुरोलाशदेवतां चाभिप्रेत्य। कुत एतत्। ऐतरेयश्रुतेः। सवनीयस्य चेत्पशुपुरोलाशं कुर्युरवीवृधेतां पुरोलाशैरित्येवं ब्रूयात्। सवनीयैरेवेन्द्रो वर्धते पशुपुरोलाशेन पशुदेवतेति।

७. होता शंयोर्वाक उक्ते यथाप्रपन्नं येनैव मार्गेण प्रविष्टस्ते-

---

[1] C स्मरेष्टाद् instead of उपरिष्टाद्। [2] C प्रधान instead of प्रार्थन।

नैवोपनिष्क्रम्योत्सृज्यते। व्यवायभ्रमणवाग्यमादिभ्यः। उत्सृज्यते[१] मैत्रावरुणः। नात्र हृदयशूलोपस्थानापेक्षा।

८. शालामिति पत्नीशालोपलक्षणम्। तां होता गत्वा पत्नीसंयाजान्तमग्नीषोमीयमस्तमिते समापयति। शालाग्रहणं सदस्येवावस्थितस्य पत्नीसंयाजा मा भूवन्। होतृग्रहणमुत्सृज्यते मैत्रावरुणः शालां गत्वेति संदेहव्युदासार्थम्।

द्विरभ्यासोऽध्यायपरिसमाप्तौ शिष्टाचारस्तदाचरणं चायुष्यमिति।

इति शाङ्खायनश्रौतसूत्रभाष्ये पञ्चमोऽध्यायः समाप्तः।

---

[१] C उत्सृच्यते।

अथ षष्ठोऽध्यायः।

१.

१. अग्नीषोमीयेणोपवसथे पशुना यजत इत्यत आरभ्य यः पश्वर्थतया कर्मकलाप उक्तः [1]स एवान्येषां पशूनां प्रकृतिर्द्रष्टव्यः। कुतः। प्राथम्यादङ्गसाकल्याच्च। ऊहयोग्यं मन्त्रजातं प्रायेण दर्शपूर्णमासयोरग्नीषोमीये च पशावाम्नातं यतो ऽतो[2] विकृतिषूहचिन्ता प्रस्तूयते।

२. ऋषीणामिदमार्षम्। किं पुनस्तत्। आम्नानमध्ययनं मन्त्राणाम्। [3]अभिधायकमनभिधायकं वा नोहितव्यं प्रकृतौ। कुतः। अपूर्वत्वात्प्रकृतेः। तेन घृतवतीमध्वर्यो स्रुचमित्येकवचनं द्वयोः स्रुचोरादापने ऽनभिधायकमपि[4] सत् यथाम्नातं भवति। आर्षमाम्नानं मन्त्राणां प्रकृताविति यस्मादवैदिक ऊहः। अतो ऽस्य विनाशे सर्वप्रायश्चित्तम्।

३. यथार्थमिति योयो ऽर्थस्तं तमभिधातुम्। उत्तरस्यां तताविवुत्तरस्यामिज्यायां विकृतावित्यर्थः। अर्थस्य विकारो[5] ऽर्थविकारः। स च क्व चिद्द्रव्यान्यत्वेन क्व चिल्लिङ्गान्यत्वेन क्व चित्सङ्ख्यान्यत्वेन क्व चिद्वचनान्यत्वेन क्व चित् प्राकृतद्रव्याभावेन। तस्यार्थविकारस्योत्पत्तिरूपेणानभिधानात्[6]। उत्पत्तिः प्रकृतिः। तद्रूपेण वैकृतस्यार्थ-

---

[1] C पशावन्ये°। [2] B इतो। [3] B C °यिकम्। [4] C om. स। [5] यथार्थमिति यो ऽर्थविकारः स च क्व°। [6] C om. त।

स्यानभिधानात्। शब्दविकारमनार्षं वैकृतार्थाभिधायकं क्रियमाणमूहं ब्रुवते याज्ञिकाः। रूढा हि तस्येयं संज्ञेत्यर्थः। तदस्याख्यानं शास्त्रसंव्यवहारार्थम्। ऊहेद्विदेवतबहुदेवतेषु। यथार्थमूह इत्येवमादिषु द्रष्टव्यम्[1]।

४. अथाधत्तं यजमानाय शंयोरिति द्वियजमानकबहुयजमानकेषु यजमानस्य विकारे प्राप्ते वचनादृच्यनभिधाने[2] ऽपि विकारो न विद्यते। यूयते[3] वा एतदृचो ऽक्षरं यदूहति। तस्मादृचं नोहेदिति श्रुत्यन्तरे प्रतिषेधात्।

५. आवह देवान्यजमानायेति प्रकृतौ। द्वियजमानके विकारे यजमानाभ्याम्। बहुयजमानके यजमानेभ्य इति। ननु यथार्थमुत्तरस्यां तताविति लक्षणारम्भाद्बर्हिरादिभिः प्रतिषेधाच्च विनाप्युदाहरणेन सिद्धमेव। सत्यम्। प्रयोगनियमार्थस्त्वारम्भः। अतः अकर्त्रभिप्राये ऽप्यनुदेशे कृत्वा चिन्तया क्रियायां यजमानशब्द एव प्रयोक्तव्यो न प्रयोगान्तरमिति वक्ष्यमाणस्य शब्दविकारस्य संक्षेपतः प्रयोजनमुच्यते[4]। प्रयोगनियमार्थमाचार्येण सूत्रं कृतम्। अतो ऽयं यथापठितः कर्तव्यो ऽन्यत्र लाक्षणिकः।

६. आशासाना मेधपतिभ्यां मेधमिति प्रकृतावग्नीषोमाभिप्रायं द्विवचनम्। एकदेवत्ये पशौ मेधपतये। बहुदेवत्ये मेधपतिभ्यः। प्रयोगनियमार्थं वचनम्। एतेन स्त्रीपशौ मेधापतिरिति[5] न

---

[1] B adds ऊहे द्रष्टव्यम्। cf. Comm. on I, 15, 5. [2] C ॰नविधाने। [3] A यूयति, B C ह्रयते। [4] A ins. ऋग्यन्तर एवमेव यागम (यायात्?)। [5] C मेधप॰।

भवति। यज्ञाभिधाने तु मेधशब्दे विवक्षिते देवतायाश्च स्त्रीत्वे सति मेधपत्न्या इति प्रयोगसंदेहो मा भूदिति।

७. मेधपतिभ्यां मेधमित्यत्र मेधमित्येतत्पशुपदम्। तत्पशुद्वित्वे मेधौ। बहुत्वे मेधानित्येवं प्रयोक्तव्यम्[१]। अनारम्भाद्यज्ञाभिधानमिति गम्येत प्रकरणात्। ततो ऽनूहः स्यात्तस्मात्सूत्रारम्भः। स्त्रीपशौ मेधाम्। द्वयोर्मेधे। बहुषु मेधाः। केचिन्मेधशब्दं जातिवचनं मन्यन्ते। तेषां स्त्रीपशौ मेधीं मेध्यौ मेधीरिति। एवं छागलेयिनां सूत्र एवोहः[२] ईदृशः पठितः।

८. आत्तामद्येत्यस्य विकारः। एकदेवत्ये आददद्य। बहुदेवत्ये आदन्नद्येति। प्रयोगनियमार्थं सूत्रम्। श्रुत्यन्तरात्। भूते अनद्यतने लङ् स्यात्। ततश्चाघसदघसन्निति प्राप्नुयात्। ननु आत्तामद्येति प्रकृतौ लुङः प्रयोगादाददादन्निति युक्तमेव। उच्यते। छान्दसः प्राकृतः प्रयोगः। ऊहेन तु लाक्षणिकेन भवितव्यम्। स मा भूदिति सूत्रारम्भः[३]।

९. घस्तां नूनमित्यस्य विकारः। एकदेवत्ये घस्तु नूनम्। बहुदेवत्ये घसन्तु नूनमिति। प्रयोगनियमः श्रुत्यन्तरात्। लाक्षणिकं अत्तु नूनमिति। तन्न कर्तव्यम्। छान्दसमपि सूत्रोक्तं कर्तव्यम्। सूत्रारम्भसामर्थ्यात्।

१०. अघत्तां तमित्यस्य विकारः। एकदेवत्ये अघसत्तं मेदस्तः। बहुदेवत्ये अघसंस्तं मेदस्तः। अघसतामिति न्याय्यं द्विवचनम्। अघत्तामिति छान्दसम्। मन्त्रे घसह्वरेति (पा० २.४.८०)

---

[१] C प्रोक्तव्यं। [२] C एव चोहः। [३] Com. स० भः।

च्लेर्लुकं कृत्वा अघस्तामिति तु सकारस्य तकारोत्पत्तिः। अदृष्टो वर्णव्यत्ययस्तस्यालाक्षणिकत्वात्। एकवचनबहुवचनयोः सकारस्य श्रवणं युक्तम्। अघसदघसन्निति।

११. अघत् एकदेवत्ये। अघन् बहुदेवत्ये। रूपद्वयमेतच्छान्दसं अघस्तामिति प्राकृतस्य वर्णव्यत्ययस्य छान्दसत्वसामान्यात्। श्रुत्यन्तराद्वा प्रयोगनियममङ्गीकृत्याचार्येणोपदिष्टम्[1]।

१२. उपाव सृजद्रभीयांसमिति[2] पशुविशेषणम्। तस्य पशुद्वित्वे रभीयांसाविव कृत्वौ। बहुत्वे रभीयस इव कृत्वौ। उपमानस्य संप्रत्यर्थे वोपमार्थे वोभयथा दर्शनात्। यत्र पक्षेणाप्यार्षचोदनानुपचः स्यात्स पक्षो ज्यायानिति ऊह एव न स्यात्। दृश्यते च श्रुत्यन्तरपाठात्। तदर्थः सूत्रारम्भः। स्त्रीपशावपि केचिदिच्छन्ति। रभीयसीमिव रभीयस्याविव रभीयसीरिवेति।

१३. अग्रभीष्टामिति देवतावचनम्। अग्रभीदित्येकदेवत्ये। अग्रभीषुरिति बहुदेवत्ये। इकारप्रतिषेधार्थं सूत्रम्। हृग्रहोर्भश्छन्दसीति प्रकृतौ इकारस्य भत्वं छान्दसं विकृतावपि वचनात्तादृशमेव भवति।

१४. अवीवृधेतामिति देवताभिधायकम्। एकदेवत्ये अवीवृधत। बहुदेवत्येऽवीवृधन्त। हेतुकर्त्रसंभवादणिजन्तादेव सिचः स्थाने चङ् कृतो व्यत्ययेन। लाक्षणिकं तु अवर्धिष्ट अवर्धिषतेति। तन्मा भूदिति सूत्रारम्भः।

१५. तदस्यादिति सूक्तवाके यजमानस्याशीर्वचनम्। तद्बहु-

---

[1] A om. च॰। [2] A ins. कृत्वौति रभीयांसमिव।

यजमानके अश्यासुरिति भवति। प्रदर्शनार्थमेतत्। तेन द्वियजमानके अश्यास्तामिति सिद्धं भवति। आशिषां सूक्तवाके परिगणनादनाशीरर्थमेतत्पदमिति। व्यत्ययेन च श्नुशब्दस्य[1] लोप इति मन्यमानः कश्चिदश्नुयातामश्नुयुरिति द्विवचनबहुवचने कुर्यात्। तन्निवारणार्थं सूत्रम्।

१६. तदृध्यात्सूक्तवाक एव। तस्य पूर्वोक्त एव न्यायः। ऋध्यास्तामिति द्वियजमानके।

१७. यद्यदचीकमतेति यजमानाभिधायि। तस्य द्वियजमानके यद्यदचीकमेताम्। बहुयजमानके[2] यद्यदचीकमन्तेति। अचकमेतां द्विवचनमचकमन्तेति बहुवचनं लाक्षणिकम्। तत्सूत्रारम्भसामर्थ्यात् बाध्यते।

१८. इतीतिप्रकारे[3] अनेन प्रकारेण यजमानाभ्यां यजमानेभ्य इत्यादिकः शब्दविकारः कर्तव्यः। वक्ष्यति। सप्तदशाग्नीषोमीया इति। तत्र होता यक्षदग्नीषोमौ छागस्यछागस्येति वीप्सया चाभिधानं प्राप्नोति। प्रकृतानां सप्तदशानां। बहुवचनेन वा छागानामिति। तत्र बहुवचनेनैवाभिधानं कार्यम्। कुतः। यजमानाभ्यां यजमानेभ्य इति दर्शनात्। एवं च सति प्रातिपदिकोपग्रहौ परस्मैपदमात्मनेपदं च कालपुरुषा उत्पत्तिवद्भवन्ति। न विक्रियन्तेऽर्थभेदात्। तेषु विक्रियमाणेष्वन्य एवार्थः संपद्यते। शब्दविकार इति। यः शब्दो विकर्तुं शक्यते स एव विकर्तव्यो नाव्ययम्।

---

[1] C (orig.) सावृश in marg. यश्नोः°, Á यश्नुश°। [2] C om. बहुयजमानके।
[3] C °ाकरणे।

तद्वीप्सयैवानेकार्थाभिधायकं भवति। ततः पुरापुरा नाभ्याः। अन्तरन्तरेवेत्यादि सिद्धं भवति।

१९. स्तृणीत बर्हिः। सूर्यं चक्षुर्गमयतात्। दिशः श्रोत्रम्। वातं प्राणम्। अन्तरिक्षमसुम्। एकधास्य त्वचं। पुरा नाभ्याः। अन्तरेवोष्माणम्। माता मन्यतामित्येवमादीनि ज्ञातिनामानि। श्येनमस्य वक्षः। शला दोषणी। कश्यपेवांसा। कवषा स्रेकपर्णेति पदद्वयम्। ऊवध्यगोहं पार्थिवम्। अस्ना रक्षः संसृजतादित्येतानि सूत्रपठितानि विकारेऽप्यनूह्यानि। यथासमाम्नातम्। प्रकृतिवद्विकारेषु भवन्ति। नेति वक्तव्ये यथासमाम्नातवचनमधिकारार्थम्।

२०. चोदनाशब्देनात्राभिधेयमुच्यते। न तु क्रियाप्रवर्तकं वचनम्। तत्र प्रकाश्यस्य संदेहे यथाग्ने त्वं सूक्तवागसि तदस्मै देवा रासन्तामित्येवमादौ अग्निपदे आहवनीये होतृगुणविशिष्टे वा[1] विकृतिष्वपि यथासमाम्नातं कर्तव्यम्।

२१. शेषशब्द एकदेशवाची। भूतशब्द उपमायाम्। शेषभूतानि शेषतुल्यानि साकांक्षस्य मन्त्रस्य निराकांक्षीकरणानि। अपूर्वाणि पूर्वमन्त्रमध्ये अपठितानि तानि यथासमाम्नातं भवन्ति। यत्र न समाम्नातानि तत्र न भवन्तीत्यर्थः। तत उपहूतौ वायुरिन्द्रवायू सह प्राणेन सह वर्चसा तयोरहमुपहूतः सह प्राणेन सह वर्चसेत्येवमन्तो मन्त्रो न भक्षयामीत्यध्याहारः।

२२. आय इत उत्तरो वक्ष्यमाणको ग्रन्थः। तत्र निगदा यजुर्विशेषाः। ते च यथासमाम्नातं भवन्ति। चशब्दान्निविदश्च।

---

[1] B om. अग्निपदे° शिष्टे वा।

प्रैषास्तूच्यन्ते प्रतीकग्रहणात्। य एते प्रैषाश्च निगदाश्चेति च व्यपदेशात्। आद्यग्रहणादग्ने महाँ असि ब्राह्मण भारतेत्येवमादीनामूहः।

२३. एकधास्य त्वचमाच्छतादित्यत्रैकधाशब्दस्यानेकपशौ वीप्सा। अव्ययत्वादयत्नसिद्धे सूत्रारम्भः इति समासेन वेत्यस्यापि विकल्पो यथा स्यादिति। तेन द्विधा त्रिधेत्येवमाद्यपि सिद्धं भवति।

२४. षड्विंशतिरस्य वङ्क्रय इत्यत्र षड्विंशतिशब्दस्यानेकपशौ वीप्सा।

२५. अनन्तरसूत्रद्वयोक्तमितिकरणेन परामृश्यते। तद्वा भवति। समासेन वा प्रयोगः सङ्ख्यासंकलनेनेत्यर्थः[1]। तद्यथा। द्विपशौ द्वापञ्चाशदेनयोर्वङ्क्रयः। षलशीतिशते[2] इत्येकादशिन्याम्[3]।

२६. वङ्क्रीसङ्ख्यासंकल्पनस्य प्रयोगः। एष शोभनतरः पक्षो ऽभिप्रेत आचार्यस्य। तदर्थं न्यायवचनम्।

२७. एकदेवतद्विदेवतयोश्चाभिधेययोः शब्दान्तरयोः शब्दान्तरेण परामृश्यमानयोर्बहुवद्वचनं कार्यम्। तद्यथा। निरूढपशुबन्धे य्यूहनमिन्द्राग्नी वनस्पतिस्तमपनुदन्त्विति। नन्वेतदुदाहरणं प्रकृतिवत्सिद्धम्। उच्यते। मन्त्रगते ऽभिधाने क्व चिदन्यथापि दर्शनात् संदेहः स्यादिति। तद्यथा। उपहूतौ वायुरिन्द्रवायू इति प्रक्रम्य तयोरहमुपहूत इति द्विवचनेनैव[4] परामर्शस्तदेवं संदेहो मा भूदिति सूत्रम्।

---

[1] A B संकल्पने°। [2] B °ने शते A °ति न शते। [3] A ins. जैमिनिमतम्।
[4] B om. द्वि।

२८. समानजातीययोः पुंस्त्रियोः सह वक्तव्ययोः[१] पुंवत्प्रयोगः कार्यः । तद्यथा । मेषश्च मेषी च मेषौ ।

२९. अपिशब्दो विकल्पार्थः । तरशब्द ईषदर्थे । अन्यतरस्यां शब्दप्रवृत्तौ मिथुनेषु[२] पुंवद्भावैकशेषौ न भवतः । इन्द्रेन्द्राण्याविति यथा पितरावित्यत्र भिक्षायामपीति[३] समासविकल्पार्थं सूत्रम् ।

३०. करत एवाग्नीषोमावित्यत्रायमेवशब्दो देवतानामधेयेन सहाकारान्तः संधीयमानो दृष्टः । वानस्पत्यमैत्रावरुणादिप्रैषेषु मकारान्तः । तस्य विकृतिषु व्यवस्था क्रियते । देवतानामधेयस्य स्वरादेर्द्विदेवत्यस्य यत्संधानं एवंशब्देन करतशब्दपूर्वेण तदुत्तमकारेण कार्यम् । ततः सामर्थ्यादकारेण सन्धिर्भवति । तद्यथा । करत एवाग्नीषोमौ । करत एवाश्विनौ । करत एवेन्द्राग्नी । करत एवेन्द्रवायू इति । स्वरादेरिति वचनादिह न भवति । करत एवं मित्रावरुणा । द्विदेवत्यस्येति वचनादिह न भवति । करदेवमग्निरिति ।

३१. पशुबहुत्वे ऽपि सति यः सूक्तवाकप्रैषे बभ्रुःशब्दो ऽसौ सकृदेव भवति । न प्रतिपशु आवर्तते ।

३२. सूपस्था अद्य देवो वनस्पतिरभवदित्येतत्पशुभेदे ऽपि सकृद्भवति । व्याख्यातो ऽग्नीषोमीयः प्रकृतिः पशूनामिति सर्वविधानां पशूनां प्रकृतिमभिधाय तत्प्रसङ्गेनोभयविधानाच्च ।

३३. रौद्रादादित्योदगयनस्यादावन्ते च तयोरेवाह्नोरैन्द्राग्नो निरूढपशुबन्धः कार्यः । कुतः । श्रुत्यन्तरात् । निरूढो नित्य इत्यर्थः ।

---

[१] B om सह वक्तव्ययोः । [२] A C (sec. h.) पि instead of षु । [३] A C (sec. b.) भिक्षयोरपीति ।

२४. प्रतिसंवत्सरं प्रावृषि शरदि वसन्ते वेति शाखान्तरोक्ता-नामन्यतमस्मिन् कार्यः।

२५. त्रयस्त्रिंशत्पशुभाजना इति श्रुतौ परिगणनात् शाखान्तरचोदितेषु काम्येष्वनुष्ठानसंदेहो[१] मा भूदिति सूत्रारम्भः। श्रुतौ तु स्वशाखादृष्टानां परिगणनमर्थवादार्थम्।

एकादशिन्यौ पर्जन्यो वायुस्त्वष्टा प्रजापतिः।
सूर्योषमित्रावरुणौ त्रयश्च पितरो ऽदितिः॥१॥
शुनासीरौ त्रयस्त्रिंशदेते वै पशुभाजनाः।
गुणादेषामनन्यत्वमभिन्नौ कप्रजापती॥२॥

२६. सर्वे पशवो ऽग्निप्रणयनादयो हृदयशूलोपस्थानान्ताः [२]सोमार्थमग्नीषोमीयं सावनं च मुक्त्वा। प्रणयनस्य सोमार्थस्य विभवन्यायात्। हृदयशूलोपस्थानमनयोः प्रतिषिध्यते शाखान्तरात्। स वै नाग्नीषोमीयस्य पशोः करोति नाग्नेयस्येति शतपथश्रुतेः।

२७. पश्वधिकारो ऽनुवर्तते। पशुना स्वतन्त्रेण यक्ष्यमाणस्य प्रागग्न्यन्वाधानात्। आग्नावैष्णवी सद्यस्काला इष्टिर्भवति। पशुना यक्ष्यमाण आग्नावैष्णवमेकादशकपालं पुरोलाशं निर्वपेदिति चरकाणाम्। सोमतन्त्रस्थेषु पशुषु नैषा। त एकशतं प्रयाजानुयाजा भवन्तीति श्रुतौ ज्ञापकात्। तथा पशुमत्सु चातुर्मास्येषु पूर्वेद्युः पाशुकं कर्मेति वदन्नेतत् ज्ञापयति। गुणभूतेषु पशुषु नाग्नावैष्णवी भवति। अतो नोत्सर्गपश्विष्टकापश्वैन्द्रापौष्णसौत्रामणीविशाखयूपर्तुपशुषु। चकारादन्वारम्भणीया चेति। चशब्द वाशब्दस्यार्थे के चि-

---

[१] B om. काम्येषु। [२] C om. यम्।

दाहुः। वक्ष्यमाणसंयोगेनाग्नावैष्णवी पठिता। आरम्भसंयोगेनान्वारम्भणीयेति। प्रथमप्रयोगे विकल्पो ऽयम्। सर्वास्वेव विकृतिषु प्रथमप्रयोगेऽन्वारम्भणीयां केचिदाहुः। अपरे याज्ञिका विकृतिष्वन्वारम्भणीयां नेच्छन्ति। अनयोपपत्त्या। इयं ह्यारम्भणीया उपदेशेन दर्शपूर्णमासयोरङ्गमतिदेशेन[1] विकृतीनाम्। बहिश्च प्रयोगात्क्रियते। सा प्रकृतेर्दर्शपूर्णमासयोर्विकृतेश्च सौर्यादीनां तन्त्रेण विज्ञायते। कथम्? उच्यते। यथैव यूपस्याकर्मकत्वादिति। यूपः प्रकृतेरग्नीषोमीयस्य विकृतेश्च सवनीयानूबन्ध्ययोस्तन्त्रेण भवति। एवमियं[2] तन्त्रेण प्रकृतिविकृत्यर्था भविष्यति। ननु च सर्वविकृतीनां प्रक्रान्तत्वात्प्रक्रान्तापरिसमाप्तिदोष एवं प्राप्नोति। नेत्युच्यते। नैष दोषः। सर्वविकृतीनां[3] कर्तुमशक्यत्वात्। एवं चेष्ट्यावृत्तौ सकृदारम्भसंयोगादिति सकृदारम्भणीया लभ्यते। इतरथास्या आवृत्तिः स्यात्। यच्चेदमत्र व्याख्यायते अप्रवृत्तपूर्वस्य कर्तुः प्रवर्तनमारम्भः द्वितीयादिप्रयोगे च नाप्रवृत्तपूर्वः कर्ता अत आरम्भाभावान्न प्रयाजवदारम्भणीया चेति तदयुक्तम्। यस्मात्प्रथमो हि पदार्थः कर्मण आरम्भ उच्यते स पुनःपुनरपि क्रियामारभमाणस्य भवत्येव। प्रतिदिनमपि पाकं कुर्वन् पाकमारभत इत्युच्यते। कूपे च शस्तस्य समाप्ते कूपान्तरं प्रक्रममाणो कूपान्तरं प्रारभत इत्युच्यते। एवं च चातुर्मास्याभ्यावृत्तौ तदारम्भार्थाया वैश्वानरपार्जन्याया आवृत्तिः सिध्यति इतरथा हि द्वितीयादिप्रयोगे आरम्भत्वाभावान्न[4] स्यात्। कृतत्वात्॰।

---

[1] C इति देशेन। [2] C एवम् instead of इयम्। [3] C (orig.) प्रकृतीनां।
[4] C om. त्व।

३८. चोदकप्राप्तमपि[1] सदेतदेव उच्यते। दीक्षणीयाधर्मप्रापणार्थम्। एवमेव शाखान्तरश्रवणात्। ततो ऽपराह्णे पौर्णमासीविकारः पञ्चदशसामिधेनीकोपांशुहविर्विराजौ स्विष्टकृतो नित्ये वेत्येते विधयः सिद्धा भवन्ति। कृत्स्ना चेयमिष्टिश्शब्दात्।

३९. प्रकृतादग्नीषोमीयादन्यस्मिन्पशौ सूक्तवाके नामग्रहणं यजमानस्य कार्यम्। चशब्दान्निर्वचनं चाशिषामिति। प्राकृतीयसवनिक्या इत्येवमाद्युक्ते ऽपि अन्यत्र चाग्नीषोमीयादित्युच्यते। तेन विशेषवचनात्सामान्यस्य बाधो मा भूदिति।

४०. वक्ष्यमाणमनुवचनं प्रातरनुवाकः। तत्प्रभृति यान्यादिप्रदिष्टानि आदिं (ऋचं) गृहीत्वा विनियुक्तानि तानि शस्त्रानुवचनयोः सूक्तानि सकलानि वेदितव्यानि। इह परिभाषा सूक्तवत्त्वप्रदेशप्रसङ्गात्[2]।

४१. शस्त्रानुवचनेभ्यो ऽन्यत्रादिप्रदेशे ऽप्येकां प्रतीयात्।

२.

१. ऊर्ध्वमर्धरात्रान्महारात्रम्। तस्मिन् प्रातरनुवाकार्थं होतामन्त्रितो ऽग्रेणाग्नीध्रीयं धिष्ण्यं तिष्ठन् प्रपदः अग्रपद्भ्यां स्थितः प्राग्दिगुपस्थानादेवमवस्थो जपति।

२. भूः प्रपद्य इत्येवमादिकं पितृभ्यः प्रतिनमस्कारेभ्यो वो ऽपि मम इत्येवमन्तं मन्त्रं प्रपदो जपति। नमः पितृभ्य इति प्राचीनोपवीती।

---

[1] C om. पि। [2] B सप्रसङ्गात्।

२. वक्ष्यमाणैर्मन्त्रैः यथारूपं च मन्त्रलिङ्गेभ्यो देवताः।

३.

१. अस्यां मे प्राच्यां दिशीत्येवमादिना मन्त्रेण प्राचीम्। तदभिमुखो ऽन्यदिक्स्थे ऽपि चन्द्रमस्युपतिष्ठते।

२. अस्यां मे दक्षिणस्यां दिशीत्येवमादिना मन्त्रेण दक्षिणां यथारूपमुपतिष्ठते। दक्षिणामिति नियमार्थम्। नैर्ऋत्यां मृत्युरिति संदेहः स्यात्।

३. अस्यां मे प्रतीच्यां दिशीत्येवमादिना मन्त्रेण प्रतीचीं यथारूपमुपतिष्ठते।

४. उदीच्यनुवादः सव्यावृद्विधानार्थः।

५. उपतिष्ठत इति सर्वत्रानुवर्तते। दिगनुवादः प्राङित्यस्य विधानार्थः।

६. अस्मिन्मे अन्तरिक्ष इत्येवमादिना अन्तरिक्षमुपतिष्ठते। प्राङेवाधिकारात्[1]।

७. उपतिष्ठत इति वाक्यशेषो ऽनुवर्तत एव।

८. बृहद्रथन्तरे म इत्यत आरभ्य सुत्रामाणं पृथिवीं द्यामनेहसमित्येतयर्चा सह जपित्वा। अनन्तरं किं करोति।

९. जपानन्तरं दक्षिणेन बाहुनावृत्याग्नीध्रीये ऽग्नौ भूर्भुवः स्वरित्येवमादिकैर्मन्त्रैः स्वाहाकारान्तैः षडाहुतीः स्रुवेण हुत्वा ततः सव्यावृद्विधानयोः पूर्वस्यां द्वार्युपविशेत्।

---

[1] (' अभिधानात।

१०. देवेभ्यः प्रातर्यावभ्यो ऽनुब्रूहीत्युक्तो हिंकारमपि मध्यमेन स्थानेन कृत्वा प्रातरनुवाकाख्यमनुवचनमाह ।

११. प्रातरनुवाके याः पङ्क्तयस्तासामयं धर्मः। त्रीन्पादान्संधायावस्येत् द्वाभ्यां पादाभ्यां प्रणुयात् ।

१२. अनूच्येत्येतदित ऊर्ध्वमनुवर्तते । यावत्प्रतिप्रियतममिति । आपो रेवतीः क्षयथा हि वस्व इत्येतामापोरेवतीसंज्ञितां[1] त्रिरनूच्य तत आग्नेयं क्रतुमन्वाह। अथोषस्यमिति प्रागत आग्नेयः क्रतुरुच्यते। अथानुष्टुभमिति प्रागतो गायत्रमुच्यते । अनयोः संज्ञाकरणं बाहुल्यार्थं शास्त्रसंव्यवहारार्थं च ।

४.

१. नवर्चं सूक्तम् ।

२. नवर्चं सूक्तम् ।

३. द्वादशर्चं सूक्तम् ।

४. अश्वं न त्वा वारवन्तमित्येता ऋचो दश ।

५. पञ्चकं सूक्तम् ।

६. पञ्चर्चं सूक्तम् ।

७. नवर्चं सूक्तम् ।

८. दूतं वो विश्ववेदसम् । अष्टकं सूक्तम् ।

९. अग्ने मृल महाँ असि । अष्टकं सूक्तम् ।

१०. अर्चन्तस्त्वा हवामहे । षट्कं सूक्तम् ।

---

[1] A °वतीरित्येतत्संज्ञितां, C (in marg.) °वती रित्येताम्।

११. अग्निं स्तोमेन बोधय। षट्कं सूक्तम्।

१२. उपसद्याय मीळ्हुषे। पञ्चदशर्चं सूक्तम्।

१३. इमे विप्रस्य वेधसः। त्रयस्त्रिंशदृचं सूक्तम्।

१४. समिधाग्निं दुवस्यतेति। त्रिंशदृचं सूक्तम्।

१५. अग्निं हिन्वन्तु नो धियः। पञ्चकं सूक्तम्।

१६. प्राग्नये वाचमीरय। पञ्चकं सूक्तम्।

१७. त्वमग्ने यज्ञानामित्यत आरभ्य षड्विंशतिस्तृचः।

१८. अथशब्दः क्रमनियमार्थः। संज्ञाकरणं बाहुल्यार्थम्। संव्यवहारार्थं च।

१९. ते ते अग्ने त्वोताः शाखान्तरे सूक्तादिस्ततः[1] सूक्तप्रतिषेधार्थमेवेत्युक्तम्।

२०. होताजनिष्ट चेतनः। अष्टकं सूक्तम्।

२१. त्वं हि चैतवद्यश इत्येता ऋचो नव।

२२. अग्ने कदा त आनुषगित्येवमाद्याः पञ्च।

२३. क्रमार्थोऽथशब्दः। संव्यवहारार्थं संज्ञा। बाहुल्यार्थं छन्दोवचनम्।

२४. समस्य यद्वियुता सस्मिन्नूधन्नित्येता ऋचः पञ्च।

२५. यो मर्त्येष्वमृत ऋतावा। त्रीण्येतानि सूक्तानि। एकपञ्चाशदृचः।

२६. प्र वो देवं चित्सहसानमग्निमित्यादीनि पञ्च सूक्तानि। त्रिंशदृचः।

---

[1] Com. ˚सूक्तप्रतिषेधार्थम्।

२७. अग्ने बृहन्नुषसामूर्ध्वो अस्थात्। एवमादीनि सप्त सूक्तानि। एकोनपञ्चाशदृचः।

२८. अगन्म महा नमसा यविष्ठं त्रिकं सूक्तम्।

२९. उक्तार्थम्।

३०. एना वो अग्निं नमसा द्वादशर्चं सूक्तम्।

३१. प्र वो यज्ञं पुरूणां विंशत्यृचं सूक्तम्।

३२. अग्ने विवस्वदुषस एता ऋचो द्वादश।

३३. सखायस्त्वा वावृमहे। एता ऋचोऽष्टौ।

३४. अदर्शि गातुवित्तमः। एता ऋचस्तिस्रः।

३५. समिद्धश्चित्समिध्यसे। एतास्तिस्र ऋचः।

३६. अयमग्निः सुवीर्यस्येति षट्कं सूक्तम्।

३७. उक्तोऽर्थः पूर्वत्र।

३८. सूक्तं नवकम्।

३९. ईळिष्वा हि प्रतीव्यं सूक्तं त्रिंशदृचम्।

४०. पुरु त्वा दाश्वान्वोचे। सूक्तं तृचम्।

४१. पूर्ववदुक्तोऽर्थः।

४२. वेदिषदे प्रियधामाय सुद्युते। एताः सप्त ऋचः।

४३. एति प्र होता व्रतमस्य माययेति सूक्तं सप्तर्चम्।

४४. यज्ञेन वर्धत जातवेदसं त्रयोदशर्चं सूक्तम्।

४५. जनस्य गोपा अजनिष्ट जागृविः। षट्कं सूक्तम्।

४६. व्याख्यातमेतत्।

४७. अग्निं तं मन्ये यो वसुः सूक्तं दशकम्।

५.

१. क्रतुं वक्ष्यामीति शेषः। अनुवचनैकदेशस्य वक्ष्यमाणस्य संज्ञा प्रागाश्विनात्।

२. अथशब्दः क्रमार्थो ऽनुवर्तते। गायत्रमिति संज्ञा चान्वर्था।

३. कस्त उषः कधप्रिय इति तिस्र ऋच एताः।

४. प्रति ष्या सूनरी जनी सप्तकं सूक्तम्।

५. क्रमार्थो ऽथशब्दः। संज्ञार्थं चानुष्टुभमिति।

६. उषो भद्रेभिरा गहि सूक्तं चतुष्कम्।

७. उषस्यमिति वर्तते।

४. उपो रुरुचे युवतिर्न योषेत्यादीनि चत्वारि सूक्तानि। ऊनविंशतिरेताः।

९. उक्तार्थः।

१०. प्रत्यु अदर्शीति सूक्तं षट्कम्।

११. सह वामेन न उषः। षोलशर्चं सूक्तम्।

१२. उक्तव्याख्यानम्।

१३. उषस्तच्चित्रमा भरेति तिस्र ऋचः।

१४. उक्तार्थम्।

१५. एता उ त्या उषसः केतुमक्रतेति चतस्र ऋचः।

१६. उक्तव्याख्यानम्।

१७. महे नो अद्य बोधयेति दशर्चं सूक्तम्।

६.

१. क्रतुमन्वाहेति वाक्यशेषः।

२. वक्ष्यमाणम्।

३. अश्विना यज्वरीरिष इत्येवमाद्यास्तिस्र ऋचः।

४. प्रातर्युजा वि बोधयेत्येतास्तिस्र ऋचः।

५. अश्विनावश्वावत्या एतास्तिस्र ऋचः।

६. एषो उषा अपूर्व्या पञ्चदशकं सूक्तम्।

७. गोमदू षु नासत्या एते द्वे ऋचौ।

८. दूरादिहेव यत्सती एता ऋचः षट्त्रिंशत्।

९. उदीराथामृतायते अष्टादशर्चं सूक्तम्।

१०. आ मे हवं नासत्या नवकं सूक्तम्।

११. कृतव्याख्यानम्।

१२. त्रयोविंशत्यृचं सूक्तम्।

१३. यदद्य स्थः परावतीत्येते सूक्ते दशके। अनूच्येत्येतदनुवर्तत एव।

१४. कृतव्याख्यानम्।

१५. आ भात्यग्निरुषसामनीकमिति द्वे सूक्ते पञ्चके।

१६. नासत्याभ्यां बर्हिरिव प्र वृञ्जे एतानि त्रीणि सूक्तानि। एकषष्टिरेताः।

१७. वसू रुद्रा पुरुमन्तू वृधन्ता तिस्र ऋचः।

१८. युवो रजांसि सुयमासो अश्वा इति द्वे सूक्ते। ऊनविंशतिर्ऋचः।

१९. तं युञ्जाथां मनसो यो जवीयानिति द्वे सूक्ते। द्वादश ऋचः[1]।

२०. ग्रावाणेव तदिदर्थं जरेथे अष्टकं सूक्तम्।

२१. धेनुः प्रत्नस्य कामान्दुहाना नवकं सूक्तम्।

२२. क उ श्रवत्कतमो यज्ञियानां द्वे सूक्ते सप्तके।

२३. स्तुषे नरा दिवो अस्य प्रसन्तेति द्वे सूक्ते। अनूच्येति वर्तते। परिहाप्य परित्यज्येत्यर्थः। सं वां शतेत्येतां[2] शक्वरीमुक्त्वा अन्यां विंशतिमाह।

२४. आ वामित्येवमादीनि पञ्च सूक्तान्यनूच्य एकविंशदेता ऋचः।

२५. उक्तार्थमेतत्।

२६. इमा उ वां दिविष्टय इति षट्कं सूक्तम्।

२७. अयं वां मधुमत्तम इत्यस्य सूक्तस्य प्रथमामुक्त्वा। ततस्तृतीया। ततः पञ्चमीत्येवं तिस्रः।

२८. उक्तार्थम्।

२९. युवोरु षू रथं हुवे एताः पञ्च।

३०. व्याख्यातम्।

३१. त्रिश्चिन्नो अद्या भवतं नवेदसा द्वादशर्चं सूक्तम्।

३२. ईळे द्यावापृथिवी पूर्वचित्तये पञ्चविंशकं सूक्तम्।

३३. यो वां परिज्मा सुवृदश्विना रथ इति द्वे सूक्ते चतुर्दशके। घोषा। समानमु त्यत्पुरुहूतमुक्थ्यमिति तृचं[3] तत्तृचः। एवं सपुत्रायां घोषायामेकत्रिंशत्।

---

१ A om. द्वा॰ ऋचः। २ A ins. पञ्चपदां। ३ B तृच सूक्तं C (in marg.) सूक्तं।

३४. उक्तार्थम् ।

३५. प्रति प्रियतमं रथं नवकं सूक्तम् । सह त्रिर्वचनेनैकादश । इति एतदेव प्रातरनुवाकानुवचनम् । आद्यन्तयोस्त्रिर्वचनेन वृद्धिः[1] ।

३६. उत्सृज्य वाचं मध्यमाम् । उत्तमेन स्थानेन[2] प्रति प्रियतममित्यस्योत्तमया परिदध्यात् । अभूदुषा रुशत्पशुरित्याशीर्वत्या परिदधातीति (११. ६) श्रुतेः । तस्यां वाचमुत्सृजतीति च ।

३७. परिधानानन्तरमया वाजं देवहितं सनेमेत्येतां द्विपदां जपति ।

३८. इति प्राग्द्विपदायाः सहस्रपरिमाणः[3] प्रातरनुवाकः । संज्ञाकरणं संव्यवहारार्थम् ।

३९. वाशब्दः पक्षान्तरपरिग्रहार्थः । विनापि कामसंयोगम् । एतस्य साहस्रस्य सूत्रोक्तस्य यानि छन्दांसि तेषामपरित्यागेन प्रतिच्छन्दस्य । प्रतिपत्समारोहणीयानां चाद्यन्तानामित्यर्थः । षष्ट्यधिकानि त्रीणि[4] शतान्यनुब्रूयात् । तानि च वृद्धैः कल्पितान्युच्यन्ते । तत्र के चिद्द्वौ श्लोकौ पठन्ति । ताविमौ ।

आद्यन्तयोः प्रतिच्छन्दः सूक्तमृग्वापि वोभयम् ।
पञ्च सप्तेति[5] यत्तत्स्याद्द्वादशानुष्टुभान्तसु ॥१॥
अग्निमीलेय ईलिष्व नासत्याभ्यां पुरश्च यत् ।
अश्विना द्वादशोषस्य एवं षष्टिशतत्रयम् ॥

---

[1] C om आद्य॰ वृद्धिः । [2] C om स्थानेन । [3] C ॰प्रमाणः । [4] C षष्टिशतानि ।
[5] A सप्त:द्द C सप्ताद्द or सप्ताद्द B सप्ताद्द ।

अन्ये तु दण्डकं पठन्ति। सो ऽप्युच्यते। आपो रेवतीस्त्रिर्वचनमुपप्रयन्तो नवाग्निमीले नव तमु त्वा पाथ्यो वृषेति त्रयोदश होताजनिष्टेत्यष्टौ अग्ने कदा त आनुषगिति दश यो मर्त्येष्विति विंशतिरगन्म महेति तिस्रः एना वो अग्निं द्वादशायमग्निः सुवीर्यस्येति षट् त्वामग्ने मनीषिण इति नवेलिष्वेति त्रिंशत्पुरु त्वेति द्वयं वेदिषद् इति सप्त जनस्य गोपा इति षलग्निं तं मन्य इति दश कस्त उष इति तिस्रः प्रति ष्या सप्तोषो भद्रेभिश्चतुष्कमुपो रुरुच इत्येकोनविंशतिः प्रत्यु अदर्श्यायतीति षट् सह वामेन षोलशोषस्तच्चित्रमिति तिस्रः एता उ त्या इति चतस्रो महे नो अद्येति दशाश्विना यज्वरीरिष इति तिस्रः प्रातर्युजेति चतस्रः आश्विनावश्वावत्येति तिस्रः आ मे हवं नवा नो विश्वाभिरिति त्रयोविंशतिः कुष्ठो देवाविति दश भातीति दश नासत्याभ्यामिति पञ्चविंशतिरतारिष्मेत्येकादश याभिः कण्वमित्येका युवोरु षू रथमिति पञ्च त्रिश्चिन्नो अद्येति द्वादश समानमु त्यं द्वयं प्रति प्रियतममिति नवोत्तमा त्रिरेवं षष्टिश्च त्रीणि च शतानि।

४०. वाशब्दो विकल्पार्थः। ऊर्ध्वं शताच्च शतमेवेत्यभिप्रायः। याथाकामी यजमानः श्रुत्युक्तानां सङ्ख्यानामन्यतमामङ्गीकुर्यात्।

४१. सर्वेषु 'पक्षेषु पाङ्क्तानि सूक्तानि[1] नोद्धरेत्। विंशोत्तरशतः प्रातरनुवाक उच्यते। आपो रेवतीः क्षयथा हि वस्व इति तिस्रः उपप्रयन्तो अध्वरमिति नवाग्निमीले पुरोहितमिति तिस्रः स हि यो मानुषा युगेति चतस्रः तेते अग्ने त्वोता इत्येका

---

[1] C om. सूक्तानि।

ऋतावानं विचेतसमिति चतस्रः ससस्य यद्वियुता सस्मिन्नूधन्नित्येका स मह्ना विश्वा दुरितानि साह्वानिति द्वे एना वो अग्निं नमसेति तिस्रः स त्वं नो रायः शिशीहीति चतस्रस्त्वामग्ने मनीषिण इति तिस्रः स चन्द्रो विप्र मर्त्य इत्येका वेदिषदे प्रियधामाय सुद्युत इति तिस्रस्त्वामग्ने अङ्गिरसो गुहा हितमित्येका अग्निं तं मन्ये यो वसुरिति दश कस्त उप इति द्वे आ द्यां तनोषि रश्मिभिरित्येका उषो भद्रेभिरा गहीत्येका व्युच्छन्ती हि रश्मिभिरित्येका उषो रुरुचे युवतिर्न योषेत्येका अश्वावतीर्गोमतीर्न उषास इत्येका प्रत्यु अदर्श्यायतीत्येका सं नो राया बृहता विश्वपेशसेत्येका उषस्तच्चित्रमा भरेति तिस्रः एता उ त्या उषसः केतुमक्रतेत्येका अधि पेशांसि वपते नृतूरिवेत्येका महे नो अद्य बोधयेति दशाश्विना यज्वरीरिष इत्येका युञ्जाथां रासभं रथ इति तिस्रः आ नो विश्वाभिरूतिभिरित्येका कं याथः कं ह गच्छथ इत्यष्टौ आ भात्यग्निरुषसामनीकमिति नव अहेम यज्ञं पथामुराणा इति तिस्रः इमा उ वां दिविष्टय इति द्वे याभिः कण्वमभिष्टिभिरित्येका युवोरु षू रथं हुव इत्येका जुहुराणा चिदश्विनेत्येका त्रिश्चिन्नो अद्या भवतं नवेदसेति द्वे अध्वर्यु वा मधुपाणिं सुहस्त्यमित्येका प्रति प्रियतमं रथमित्येकादश एतद्विंशतिशतम् ।

त्यजेदनुष्टुभः सप्तशताद्वेविंशकाद्बुधः ।
त्रिष्टुभौ[1] द्वे जगत्येका एवं दशशतं भवेत् ॥

---

[1] बृहत्यौ A C (in marg.)

सप्तविंशतिशतान्यनुब्रूयादित्यत्रापि वृद्धसंप्रदायो लिख्यते । अर्चन्तस्त्वेत्यतः प्रभृति शतमग्ने सहन्नूनपञ्चाशत् प्र वो यज्ञमिति विंशतिरेति प्र होतेति सप्ता नो यातं दिवस्परीति विंशतिर्ग्रावाणेवेत्यूनषष्टिरीळे द्यावापृथिवी पूर्वचित्तय इति पञ्चविंशतिरेतस्मिन् सहस्रादृते सप्तविंशतिशतानि भवन्ति ।

४२. पुरोदयादध्वर्यव उपांशुनाम्नो ग्रहस्य होमकालं संभावयिष्यन्तीति मन्यमानः सङ्ख्यादिनियममुत्सृज्यापि परिदध्यात् ।

४३. उदिते ऽन्तर्यामग्रहहोम आध्वर्यवः । आ तस्य परिसमाप्तेर्वाग्यमनं होतुः ।

७.

१. अप इष्य होतरित्येवमुक्तो ऽध्वर्युणा होता प्र देवत्रेत्येतत्सूक्तं पञ्चदशकं द्वादशीं परिहाप्य वक्ष्यमाणेन क्रमेणानुब्रूयात् ।

२. प्र देवत्रेत्यतस्त्रिर्वचनमगणयित्वा[1] नवानूच्य ततो ऽध्वर्युणा[2] आहुतावप्सु हूयमानायामेकादशीमनुब्रूयात् ।

३. आनीयमानास्वप्सु दशमीमनुब्रूयात् । अप इष्य होतरित्युक्त इति संप्रैषवचनादप्स्विति गम्यते ।

४. प्रति यदापो अदृश्रमायतीरिति दृश्यमानासु अप्सु तदाधारेषु सामर्थ्यात् ।

५. मैत्रावरुणचमसस्य वसतीवरीणां च संपर्के क्रियमाणे समन्या यन्त्युप यन्त्यन्या इत्येतामनुब्रूयात् ।

[1] Com. देवत्रेत्यतस् । [2] Com. ऽध्वर्युणा ।

६. आपो न देवीरुप यन्ति होत्रियमित्येतामनुब्रूयात्। होतृचमसे ऽवनीयमानास्वप्सु।

७. आ धेनवः पयसा तूर्ण्यर्था इत्यनुब्रूयाद्धविर्धानमानीयमानास्वप्सु। आ धेनव इति सूक्तादिप्रदेशात् सूक्तं प्राप्नोति। तन्निवृत्त्यर्थं सर्वामुक्त्वेत्युक्तम्। एकामुक्त्वेत्यर्थः। ऋगन्तेन प्रणवेनावस्येत्।

८. अध्वर्यवेषीरपा ३ इत्यनेन मन्त्रेणाध्वर्युं पृच्छेत्। अभ्यावृत्य तिष्ठन्तमध्वर्युं वचनात्।

९. अध्वर्युः प्रत्याहोतेव नन्नमुरिति।

१०. अध्वर्यवेषीरपा इत्यध्वर्युणा पृष्टेनोतेव नन्नमुरिति प्रत्युक्तास्वध्वर्यवाधावेत्येवमादिकं निगदं[1] प्रतिपद्यते। निगदग्रहणं यस्य पीत्वा मद इत्यस्या अपि निगदप्रतिपत्त्यर्थम्। तेनाविवाक्ये न संपादनम्। निगदत्वात्।

११. उपविशतीति सूत्रच्छेदः। अम्बयो यन्त्यध्वभिरित्येतां अर्धर्चं चोत्तरस्या उक्त्वा ततः।

१२. उपोत्थाय ततस्तस्मिन्नेव प्रदेशे ऽध्वर्युमन्वावृत्य तदभिमुखः स्थित्वोत्तराम्। कस्याः। अम्बय इत्येतस्या अध्यर्धायाः। ततस्ता नो हिन्वन्त्वध्वरमित्यर्धमपो देवीरिति च सकलामेवमध्यर्धामनूच्य।

१३. प्र देवत्रेत्यस्य प्रकृतत्वात् उपोत्तमाम्। तदवस्थ एव चमध्वात्।

१४. यस्योपोत्तमानूक्ता तस्यैवोत्तमया परिधाय परिसमाप्य प्र देवत्रेत्यादिकमनुवचनं ततः।

---

[1] C om. निगद।

१५. पर्यावृत्य प्राङ्मुखः स्थित्वा यत उपोत्थितस्तस्मिन्नेवोपविशत्यन्यस्यानुपदेशात्[1] ।

८.

१. प्राणं म इत्यादिना मन्त्रेणोपांशुसंज्ञकं ग्रहं हूयमानमनुप्राणिति । अनुनिश्वसितीत्यर्थः ।

२. अपानं म इत्यादिना मन्त्रेणान्तर्यामसंज्ञकं ग्रहं हूयमानमन्ववानिति । प्राणमन्तः प्रवेशयतीत्यर्थः ।

३. उत्तरेणाहवनीयमन्तर्वेद्येव बहिष्पवमानाख्येन स्तोत्रेण स्तुवते छन्दोगाः । सूत्रारम्भो ऽस्य प्रदेशस्यास्तवसंज्ञार्थः । स्तोमस्य चास्य बहिष्पवमानसंज्ञार्थः यावच्च स्तुवते तावन्मैत्रावरुण आस्ते । न तूपवेशनप्रसवमात्रम्[2] ।

४. ओं स्तुतेति सूत्रान्तः[3] । स्तुवत्सूद्गातृषु दक्षिणतो ब्रह्मा मैत्रावरुणश्चोपविश्य वक्ष्यमाणेन क्रमेण जपप्रसवौ कुरुतः । प्राङ्मुखो मैत्रावरुण उपविशेत् परिभाषितत्वात् । ब्रह्मणो वचनं यजमाननिवृत्त्यर्थम् । स तूद्गातृसमीपे उपविशेत् । औपगात्रं ह्यस्य भवतीति श्रुतेः ।

५. ब्रह्मन् स्तोष्यामः प्रशास्तरित्युक्तौ एवमुद्गातृभिर्ब्रह्मा मैत्रावरुणश्चोङ्कारावनन्तरं कुरुतः ।

६. आयुष्मत्य इत्यादिकं प्रसवे इत्येवमन्तमेकारान्तं[4] मन्त्रं जपित्वा ततः ।

---

[1] A C (orig.) अन्यस्मादुपवेशनात् । [2] C (in marg., प्रवेश instead of प्रसव । [3] A om. ओं ०सूत्रान्तः । [4] B om. एवमन्तम् C om. मन्त्रं ।

७. ओं स्तुतेति स्तुतादिना सवनधर्मेणैकस्वर्यमाहतुः।

८. यः पूर्वोक्त आयुष्मत्य इत्यादिजपपूर्वः ओं स्तुतेत्येष प्रसवः सर्वेषां स्तोत्राणां पारिभाषिकः। ननु अनुक्त एवायं प्रथमदृष्टत्वादितरेषु बुद्धिमानन्वेष्यति। नेति ब्रूमः। आनुमानिको बुद्ध्यन्वयः पारिभाषिकेण प्रत्यक्षविहितेन [1]बाध्यते। तदर्थं वचनम्।

९. असतो मेत्यादिकं मृत्योर्मामृतं गमयेत्येवमन्तं मन्त्रं यजमानो जपेत्। कस्मिन्नवधौ। पवमानानुपसरिष्यन् पवमानानुपयास्यन्नित्यर्थः[2]।

१०. श्येनो ऽसीत्यादिकं यज्ञस्योदृचमित्यन्तं मन्त्रं यजमानो जपेत्। स्तुते बहिष्पवमाने।

११. सुपर्णो ऽसि पत्वा त्रिष्टुप्छन्दा इत्येवमादिकं मन्त्रं यजमानो जपेत्। स्तुते माध्यन्दिने पवमाने[3]।

१२. सखासि पत्वा जगच्छन्दा इत्येवमादिकं मन्त्रं यजमानो जपेत्। स्तुते आर्भवे पवमाने।

१३. [4]श्येनो ऽसि पत्वा गायत्रच्छन्दा इति निराकाङ्क्षे ऽपि[5] मन्त्रे यो ऽयमनु त्वा रभ इत्यादिक उदर्को ऽभ्यधिक इव मन्त्रः समान इतरयोरपि मन्त्रयोः। व्यून्हच्छन्दस्यपि दशरात्र एतेषामनूहः। सर्वस्वारादिषु चाविकारः। कुतः। उत्तरयोः पवमानयोश्छन्दोबहुत्वे ऽपि सति सर्वेषामनुपलक्षणात्[6]।

---

[1] A बाध्येत। [2] C उपगास्यन् पवमानानित्यर्थः। [3] C om. स्तुते माध्यन्दिने। [4] C ins. समान उदर्कः। [5] A निराकाङ्क्षे ऽरपि मन्त्रे योर्थो ऽयम् C •काङ्क्ष ऽपि मन्त्रशेर्थो ऽयम्। [6] A C (sec. h.) om. सम्।

१४. उपहूता देवा इत्यादिकं मन्त्रं श्रोत्रेण त्वा भक्षयामीत्येवमन्तं स्तुते बहिष्पवमाने होता जपेत्। होतृवचनं यजमानाधिकारनिवृत्त्यर्थम्।

९.

१. सवनेषु भवः सवनीयः। वपया प्रातःसवने चरन्ति पुरोडाशेन माध्यन्दिने अङ्गैस्तृतीयसवन इति य उक्तः स आग्नेयः कर्तव्यः। एवमेव श्रुतत्वात्।

२. ऐन्द्राग्नो वा सवनीयः पशुः कार्यः। य एष आलभ्यते तमेतमैन्द्राग्नः स्यादिति हैक आहुरिति श्रुतेः।

३. ऐकादशिना वा आग्नेयसारस्वतसौम्यपौष्णबार्हस्पत्यवैश्वदेवैन्द्रमारुतैन्द्राग्नसावित्रवारुणाः। एते वा [1]सवनीया भवन्ति। प्रजापतिः प्रजाः सृष्ट्वा रिरिचान (१२. ८) इवामन्यतेत्युपक्रम्य सवनीयप्रकरण एवैकादशिनीपाठात्[2]। वाशब्दातिरेकात् स्तोमायनं वा श्रुत्यन्तराच्च।

४. एको यूप एषां त इमे एकयूपाः पशवः ऐकादशिना अन्ये वा। तत्रैकयूपेष्वैकादशिनेषु क्रियमाणेषु प्रतिपशु परिव्ययणीया त्रिस्त्रिरावर्तते। प्रतित्रिकं चावसानं भवति। रशनापृथक्त्वात् रशनासंप्रैषपृथक्त्वादित्यर्थः। अथ यद्येकयूप एकादशिनीमालभेरन्न्यग्नौपशावेवाध्वर्युः संप्रेष्यति पशौपशावेव युवा सुवासाः परिवीत आगादिति सैव[3] परिधानीया सा परिवीयमाणायेति (१०.२) श्रुतेः।

---

[1] C om. °स. । [2] B °शिनां पाठात्। [3] B C सैषैव।

५. वक्ष्यमाणो विधिः । ननु एकयूपेष्वैकादशिनेषूक्तसमर्थान्नानायूपेषु भविष्यति । सत्यम् । नैकादशिनेष्वेव । अप्यश्वमेधपुरुषमेधादिषु यथा स्यादेवमर्थं वचनम् ।

६. आहवनीयसंनिधिस्थे[1] परिव्ययणीयामुक्त्वा नवसु यूपेष्वञ्जन्ति त्वेत्येका । उच्छ्रयणीयाः पञ्च । परिव्ययणीया चेत्येताः सप्त । प्रतियूपं नवस्वाह । ननु सप्तैवैताः । अतः सप्तग्रहणं नियमार्थम् । तेन दशमे ऽहन्युच्छ्रयस्वेत्यनुष्टुबपि नोद्धर्तव्या ।

७. एकादशे यूपे ऽयं विशेषः । प्राकृते ऽनुवचने यो ऽयमूर्ध्व ऊ षु ण इति बार्हतः प्रगाथस्तमुक्त्वा प्राक् परिधानीयाया यान्वो नरो देवयन्तो निमिम्युरिति सूक्तशेषमुत्तमावर्जमन्वाह ।

८. द्वादश उपशयो भवति[2] । वितष्ठ इति निर्ज्ञात[3] आध्वर्यवे । तं परिसमाप्ते एकादशस्यानुवचने उत्तमयानुमन्त्रयते । वनस्पते शतवल्श इत्येतया ।

९. पूर्वेद्युरप्युच्छ्रयणमध्वर्युवशाद्भवति । तत्र मध्यमस्य परिव्ययणान्तं[4] नित्यमेव । दक्षिणोत्तराणां यूपानां परिव्ययणवर्जं कर्म । तादृशे ऽध्वर्युभिः क्रियमाणे पूर्वया परिदध्यात् ऊर्ध्वो न इत्येतया ।

१०. संतानो ऽनुवचनाविच्छेदः । स यस्याभिप्रेतः स संतानार्थी होता । सो ऽर्धर्चेनैव काङ्क्षेत् । वाशब्द उत्तरसूत्रप्रयोजनः । एवकारकरणमिष्टतरो ऽयं पक्ष इति ज्ञापनार्थम् ।

---

[1] A B C सवनीये । [2] A ins. उप एकादश यूपानां समीपे शेते प्रथमधर्मेण निखनीत्युपशयः । स्तुत्यूपः तत्र चात्वाले पशुरित्यनुमन्त्रयते । [3] C विसिष्ट A संज्ञात । [4] B ०यमाणान्तं A ०यणान्तं ।

११. वाशब्दो विकल्पार्थो ऽनुवर्तते। समानजातीयानुसमयः कर्तव्यः। कथम्। सर्वेषामञ्जनीयाः सर्वेषामुच्छ्रयणीयाः सर्वेषां परिव्ययणीया इति।

१२. केषां चिदध्वर्यूणां यूपेभ्यो ऽज्यमानेभ्यो ऽनुब्रूहीत्यूहेन संप्रैषः। तत्रानुवचनमेकादशे ऽन्तरेण परिव्ययणीयां प्रगाथं च यान्वो नर इति च सूक्तशेषमन्वाहेति। यथैकादशे तथोत्तमेनेति वक्ष्ये तुल्यार्थतामेकादशग्रहणस्योत्तमग्रहणस्य च दर्शयति। तेन यदेकादश उक्तं तदुत्तमे यूपे ऽश्वमेधपुरुषमेधयोरपि सिद्धं भवति।

१३. सवनपशुदेवतामावाह्य वनस्पतिं च। विदेशस्थयागेष्वपि प्राजापत्यादिष्वयमेवावाहनक्रमो[1] वचनात्।

१४. इन्द्रं वसुमन्तमित्याद्याः सवनदेवताः। तथा चैव श्रुतत्वात्। अतो यत्राप्यन्यदेवत्यानि सवनानि तत्राप्यूहः सिद्धो भवति। [2]अनिरुक्तसवनचोदनायामावाहने ऽप्यनिरुक्तता।

१५. कात्यायने व्यूहदर्शनात्। पशुदेवताप्रयुक्तं सवनदेवतानामपि भवतीति। तदाशङ्कानिवृत्त्यर्थं। स्विष्टकृत्सूक्तवाकप्रैषेषु[3] प्रतिषेधः।

१६. सूक्तवाके विकल्पः। यादृशं प्रकृतौ निगमनं हविरजुषतहविरजुषतेति तादृशं सवनदेवता लभन्ते। निगच्छन्तीति वचनात्। इन्द्रो वसुमान्सवनमजुषतेति हि स्यात् सवनभाक्त्वात्।

---

[1] C वचम् instead of वच। A अनिरुक्तसव° B °क्तसवन°। [3] A B सूक्तवाकप्रैषवनस्पतिप्रैषेषु (B °वाके)।

१७. अध्वर्यू संमृश्य षण्मोर्वीरिति जपित्वा प्रचारानुपूर्व्येण[1] वक्ष्यमाणके प्रवृताहुत्याख्ये आहुती जुहोति[2]।

१८. जुष्टो वाच इत्यादिना सरस्वत्या इत्येवमन्तेन मन्त्रेण पूर्वाहुतिं जुहोति। यदा मुख्यः कुर्यात्परार्थानीति मुख्यो द्वियजमानके जुहोति। बहुयजमानके वा। तदा यथार्थमूहः। स उच्यते। जुष्टौ वाचो भूयास्व जुष्टौ वाचस्पतेरिति द्वियजमानके। जुष्टा वाचो भूयास्म जुष्टा वाचस्पतेरिति बहुयजमानके। नान्ते स्वाहाकारः कृतत्वात् पुरस्तात्स्वाहाकारेणेति च श्रुतौ मन्त्रविशेषणात्।

१९. उत्तरामाहुतिममन्त्रिकां जुहुयात्।

१०.

१. अग्ने नय सुपथा राये अस्मानित्याग्नेयस्य पशोर्वपायाः पुरोनुवाक्या। अग्ने त्वं पारया नव्यो अस्मानिति पशुपुरोळाशस्य पुरोनुवाक्या। अग्ने त्वमस्मद्युयोध्यमीवा इति पशोः पुरोनुवाक्या। एवमेतास्तिस्रः। वक्ष्यति। तिस्रस्तिस्रः पूर्वा पुरोनुवाक्या वपायाः पुरोळाशस्य पशोरिति। तत्र तावत्पुरोनुवाक्या उक्ताः। भुवो यज्ञस्य रजसश्च नेतेति वपाया याज्या। प्र वः शुक्राय भानवे भरध्वमिति पशुपुरोळाशस्य याज्या। प्र कारवो मनना वच्यमाना इति पशोर्याज्या। वक्ष्यति। तिस्रस्तिस्र उत्तरा याज्या इति। एवं सर्वेषु षट्केषु योज्यम्।

---

[1] C om. अध्वर्यू॰ पूर्व्येण। [2] A C (sec. m., and also in the text of the Sûtra जुह्वति।

२. आ नो दिवो बृहतः पर्वतादा। सरस्वतीं देवयन्तो हवन्ते। सरस्वत्यभि नो नेषि वस्यः। पावीरवी कन्या चित्रायुः। प्र क्षोदसा धायसा सस्र एषा। इमा जुह्वाना युष्मदा नमोभिः। इत्ययं षट्कः सारस्वतस्य।

३. त्वं सोम प्र चिकितो मनीषा। त्वमिमा ओषधीः सोम विश्वाः। सोमो धेनुं सोमो अर्वन्तमाशुम्। या ते धामानि दिवि या पृथिव्याम्। अषाळ्हं युत्सु पृतनासु पप्रिम्। या ते धामानि हविषा यजन्ति। एता षट् सौम्यस्य।

४. पूषेमा आशा अनु वेद सर्वाः। प्रपथे पथामजनिष्ट पूषा। पथस्पथः परिपतिं वचस्या। शुक्रं ते अन्यद्यजतं ते अन्यत्। यास्ते पूषन्नावो अन्तः समुद्रे। पूषा सुबन्धुर्दिव आ पृथिव्याः। इति षट्कं पौष्णस्य।

५. आ दैव्या वृणीमहे ऽवांसि। आ वेधसं नीलपृष्ठं बृहन्तम्। बृहस्पतिः समजयद्वसूनि। स हि शुचिः शतपत्रः स शुन्ध्युः। स सुष्टुभा स ऋक्वता गणेन। स आ नो योनिं सदतु प्रेष्ठः। इत्येताः षड् बार्हस्पत्यस्य।

६. विश्वे अद्य मरुतो विश्व ऊती। यं देवासो ऽवथ वाजसातौ यं त्रायध्वे यं पिपृथात्यंहः विश्वे देवाः शृणुतेमं हवं मे। ये के च ज्मा महिनो अहिमायाः। ते हि यज्ञेषु यज्ञियास ऊमाः सधस्थं विश्वे। स्तीर्णे बर्हिषि समिधाने अग्नौ सूक्तेन महा। एताः षड् वैश्वदेवस्य।

७. इन्द्रं नरो नेमधिता हवन्ते। इन्द्रो राजा जगतश्चर्षणीनाम्।

इन्द्र क्षत्रमभि वाममोजः। उरुं नो लोकमनु नेषि विद्वान्। आ नो विश्वाभिरूतिभिः सजोषाः। आ ते शुष्मो वृषभ एतु पश्चादिति षडैन्द्रस्य।

८. गोमदश्वावद्रथवत्सुवीरम्। हये नरो मरुतो मृळता नः। शुची वो हव्या मरुतः शुचीनाम्। अरा इवेदचरमा अहेव। या वः शर्म शशमानाय सन्ति। यूयमस्मान्नयत वस्यो अच्छ। एता षण्मारुतस्य।

९. उभा वामिन्द्राग्नी आहुवध्यै। आ वृत्रहणा वृत्रहभिः शुष्मैः। ता योधिष्टमभि गा इन्द्र नूनम्। शुचिं नु स्तोमं नवजातमद्य। गीर्भिर्विप्रः प्रमतिमिच्छमानः। प्र चर्षणिभ्यः पृतनाहवेषु। एता षडैन्द्राग्नस्य।

१०. आ नो देवः सविता त्रायमाणः। आ देवो यातु सविता सुरत्नः। सविता यन्त्रैः पृथिवीमरम्णात्। वाममद्य सवितर्वाममु श्वः। ये ते पन्थाः सवितः पूर्व्यासः। अस्मभ्यं तद्दिवो अद्भ्यः पृथिव्याः। एता षट् सावित्रस्य।

११. अस्तभ्नाद् द्यामसुरो दिश्ववेदाः। तत्त्वा यामि ब्रह्मणा वन्दमानः। अव ते हेळो वरुण नमोभिः। एवा वन्दस्व वरुणं बृहन्तम्। इमां धियं शिक्षमाणस्य देव। उदुत्तमं वरुण पाशमस्मत्। एताः षड्वारुणस्य।

१२. एता ऋचो याज्यानुवाक्या ऐकादशिनानां भवन्ति।

१३. न केवलमैकादशिनानामेवैते षट्काः किं तर्हि अन्येषामप्येवंदेवतानां पशूनाम्। नेष्टिष्वेवंदेवतास्वपि। पशव इति वचनात्।

११.

१. इन्द्रा नु पूषणा वयमित्याद्या ऐन्द्रापौष्णस्य पशोः षड् भवन्ति।

२. सोमा पूषणा जनना रयीणामित्येताः षट् सोमापौष्णस्य पशोः।

३. सं वां कर्मणा समिषा हिनोमीत्येताः षळैन्द्रावैष्णवस्य पशोः।

४. नासत्याभ्यां बर्हिरिव प्र वृञ्जे। षळेता आश्विनस्य पशोर्भवन्ति।

५. विष्णोर्नु कं वीर्याणि प्र वोचम्। एताः षड्वैष्णवस्य पशोः।

६. रात्री व्यख्यदायती। एताः षड्रात्र्या भवन्ति। रात्रिदेवत्यस्य पशोः।

७. भूरिं द्वे अचरन्ती चरन्तम्। एताः षड् द्यावापृथिवीयस्य पशोः।

८. जनीयन्तो न्वग्रव इत्येतास्तिस्रः। स वावृधे नर्यो योषणासु। दिव्यं सुपर्णं वायसं बृहन्तं। यस्य व्रतमिति च षष्ठी खैलिका। एताः षट् सरस्वतः। सरस्वान्नाम देवताविशेषस्तस्य।

९. य इमा विश्वा भुवनानि जुह्वदित्येताः षट् चतुर्थीं परिहाप्य वैश्वकर्मणस्य पशोर्भवन्ति।

१०. आ ते पितर्मरुतां सुम्नमेतु। एताः षड् रौद्रस्य पशोः।

११. अहं रुद्रेभिर्वसुभिश्चरामीति वाग्देवत्यस्य पशोरेताः षड् भवन्ति।

१२. एतासां षण्णामयं विनियोगः। सूत्रोक्तेन क्रमेण प्रति-

षट्कं तिस्रस्तिस्रः पूर्वाः पुरोनुवाक्याः कर्तव्याः। एका वपायाः। एका पशुपुरोळाशस्य। एका पशोः। एवमेव तिस्रस्तिस्र उत्तरा याज्याः।

१३. सवनीयस्य पशोः केचित्पशुपुरोळाशं न कुर्वन्ति तुल्यत्वादुपालम्भस्यापि।

१४. करणं पशुपुरोळाशस्येत्येष एव न्यायः। कुतः। सोमार्थैः सवनीयहविर्भिः पश्वर्थस्य निवृत्तिरन्याय्येति।

१५. सावित्रस्य वाग्देवत्यस्योपांशु भवतः। न केवलं प्रदेशान्तरोक्तौ सौर्यप्राजापत्यौ।

१६. पशुगणे प्रतिपशु मनोतासूक्तमावर्तते कालभेदात्।

१७. प्रातरनुवाकादि प्रातःसवनम्। तस्मिन्प्रातःसवने परिव्ययणीयादि वपान्तं पाशुकं कर्म कृत्वा[1] यथाप्रपन्नमुपनिष्क्रम्याग्नीषोमीयवदुपस्पृश्य चात्वाले[2]। प्राप्तस्यानुवादः क्रमार्थः।

१२.

१. वक्ष्यमाणेन विधिना धिष्ण्यान्वक्ष्यमाणानुपस्थाय सदः प्रविशन्ति। होता मैत्रावरुणोऽच्छावाको ग्रावस्तुत् ब्रह्मा ब्राह्मणाच्छंसी पोताग्नीध्रः सदस्यो यजमानश्च। युगपच्छाखान्तराद्बहुवचनाच्च। स्वशाखायां तु ते नमसिता होतारमतिसृजन्त इति होतैवोपस्थाता।

२. अग्रेण हविर्धाने तिष्ठन्तो सोपस्थेयसमीपं गत्वा तंतमीक्षमाणा अन्यदिङ्मुखा अपि। न केवलं प्राङ्मुखा उदङ्मुखा वा।

---

[1] C om. कृत्वा। [2] C ins. मार्जनम्।

३. सम्राळसीत्येवमादिना मन्त्रेणाहवनीयमुपतिष्ठन्ते।

४. उदर्को ऽनुषङ्ग इत्येको ऽर्थः। रौद्रादिर्मन्त्रशेष उत्तरेष्वप्यनुषक्तव्यः। तस्मात्सदः प्रसर्पन्नमस्यति नमो नम इति (१३.१) श्रुतेः।

५. अननुषङ्गो वा शाखान्तरात्।

६. अपिजो ऽसि दुवस्वानित्यनेन मन्त्रेणोपतिष्ठन्ते। यो[1] ऽग्निराहवनीये मथित्वानुप्रहृतः।

७. परिषद्यो ऽसि पवमान इत्यनेन मन्त्रेणास्तावमुपतिष्ठन्ते। आस्ताव उच्यते यत्र बहिष्पवमानेन छन्दोगाः स्तुवते।

८. प्रतक्वासि नभस्वानित्यनेन मन्त्रेण चात्वालमुपतिष्ठन्ते।

९. कव्यो ऽसि हव्यसूदन इत्यनेन मन्त्रेण पशुश्रपणमुपतिष्ठन्ते।

१०. समुद्रो ऽसि विश्वभरा इत्यनेन मन्त्रेण उत्करमुपतिष्ठन्ते।

११. दक्षिणावृतो भूत्वा विभूरसि प्रवाहण इत्यनेन मन्त्रेणाग्नीध्रमुपतिष्ठन्ते।

१२. सदश्चाग्नीध्रं च प्रविशन्तो यथाकालं तयोरेवोपरि द्वारस्थूणाविशाखस्थं वलीकाद्यभिमृशन्ति दिवस्पृष्ठमसीत्येवमादिना मन्त्रेण।

१३. ऋतस्य द्वारावित्येवमादिना मन्त्रेणोभाभ्यां हस्ताभ्यां द्वार्यौ संमृश्य प्रविशेयुः।

१४. आग्नीध्रीयं प्रविश्योत्तरेणाग्निं गच्छन्ति। ये सदः[2] प्रविष्टाः सन्तः प्रत्यञ्चो धिष्ण्यानतिक्रामन्ति। के पुनस्ते। यजमानग्रावस्तुत्सदस्यवर्जिताः। येषां संचरं वक्ष्यति अपेणोत्तरेण सर्वान् धिष्ण्यान्गच्छन्तीत्येवमादिना ग्रन्थेन।

---

१ B °तिष्ठन्तो ऽग्निरा°। २ B सच।

१५. मलिम्लुचो ऽसीत्येवमादिना मन्त्रेणासादमच्छावाकस्योपतिष्ठन्ते। तं च वक्ष्यति। अच्छावाकः सीदेत्युक्तो ऽग्रेण सद उत्तरेण स्रुतिमुपविश्येति।

१६. वह्निरसीत्यादिना मन्त्रेण होतृधिष्ण्यमुपतिष्ठन्ते। धिष्ण्यग्रहणं सदोऽधिकारनिवृत्त्यर्थम्[1]।

१७. धिष्ण्याधिकारो ऽनुवर्तते। श्वात्रो ऽसि इत्यादिना मन्त्रेण मैत्रावरुणधिष्ण्यमुपतिष्ठन्ते।

१८. तुथो ऽसीत्यादिना मन्त्रेण ब्राह्मणाच्छंसिनो धिष्ण्यमुपतिष्ठन्ते।

१९. उशिगसीत्यादिना मन्त्रेण पोतृधिष्ण्यमुपतिष्ठन्ते।

२०. अवस्युरसीत्यादिना मन्त्रेण नेष्टृधिष्ण्यमुपतिष्ठन्ते।

२१. अंहारिरसि बम्भारिरित्येवमादिना मन्त्रेणाच्छावाकधिष्ण्यमुपतिष्ठन्ते।

२२. शुन्ध्युरसि मार्जालीय इत्यनेन मन्त्रेण मार्जालीयमुपतिष्ठन्ते। तत्रैव स्थिता अवेक्ष्येत्यारम्भात्।

२३. शुन्ध्युरस्युपसद्य इत्यनेन मन्त्रेण ब्रह्मसदनमुपतिष्ठन्ते। अवेक्ष्यैव। तत्रैव स्थिताः।

२४. ऋतधामासि स्वर्ज्योतिरित्यनेन मन्त्रेणौदुम्बरीम्। अवेक्ष्योपतिष्ठन्ते। तत्रैव स्थिताः।

२५. समुद्रो ऽसि विश्वव्यचा इत्यनेन मन्त्रेण सद उपतिष्ठन्ते। तथैव स्थिताः। अन्तर्बहिश्चानुवीक्ष्य।

---

[1] C -ग्रहणंमासादोधिकार°। alt to °ग्रहणं सदो A °मागधिकार°।

२६. अजो ऽस्येकपादित्यनेन मन्त्रेण[1] शालामुखीयमुपतिष्ठन्ते। पत्नीशालासंनिधिस्थाः ।

२७. अहिरसि बुध्न्य इत्यनेन मन्त्रेण प्राजहितमुपतिष्ठन्ते । प्राजहितश्चिरंतनो गार्हपत्यः ।

२८. अन्नदास्थान्नपतिरित्यनेन मन्त्रेण व्रतश्रपणमुपतिष्ठन्ते । व्रतश्रपणो दक्षिणाग्निः। मन्त्रेषु केषां चिच्छालागार्हपत्यव्रतश्रपणाः। तेषां यथास्वमुपस्थानमूह्यो वा। अहयः स्थ बुध्न्याः। अन्नदाः स्थान्नपतय इति ।

१३.

१. अग्नयः सगरा इत्येवमादिना मन्त्रेण सर्वान् धिष्ण्यानुपतिष्ठन्ते । सदसः पुरस्तात्तिष्ठन्तः । तत्र हि बहवो दृश्यन्ते । भूयसां साधर्म्यात् ।

२. अध्वन इत्यादिना पथि स्थादित्येवमन्तेन मन्त्रेणादित्यमुपस्थायानन्तरम् ।

३. मैत्रावरुणपूर्वा उदञ्च इति येषामग्रेणोत्तरेण सर्वान्धिष्ण्यान्गच्छन्तीति संचर उक्तास्ते निर्दिश्यन्ते । अतश्च मैत्रावरुणप्रभृतयो धिष्ण्यवन्त इत्युक्तं भवति । अच्छावाकं परिहाप्येति वदता[2] ग्रावस्तुतः प्रवेशः साधितो भवति । पूर्वया द्वारा सद इति वचनादाग्नीध्रः स्वमागारं दक्षिणया द्वारा संसृज्य पूर्ववत्सदः प्रविशत्[3] ।

---

[1] B मन्त्रेण शाला सन्निधिस्थाः । [2] B पूर्वयाविशदता C (in marg.) वचनात्।
[3] B om. सदः।

४. सदः प्रसर्पन्तीति वर्तते। विश्वे देवा अनु मा प्रसर्पत इति मन्त्रः। प्रतीकगृहीतास्तिस्र ऋचो जपन्तः सदः प्रसर्पन्ति।

५. अच्छावाकधिष्ण्यं यावदग्रेण ततस्तान्सर्वानुत्तरेण। एवं गच्छतां दक्षिणधिष्ण्योदक्षिणधिष्ण्यः पूर्वो गच्छेत्।

६. गत्वा स्वधिष्ण्यप्रदेशं दक्षिणधिष्ण्योदक्षिणधिष्ण्यः स्वस्यस्वस्य धिष्ण्यस्य पश्चादुपविशेत्।

७. द्वितीयं सदोग्रहणं सदःप्रवेशधर्मप्रापणार्थम्। शिष्टं निगदव्याख्यातम्।

८. एते ये प्रविष्टास्ते नासमाप्ते सवने पश्चिमेन द्वारेण निःसरन्ति[1] श्रुत्यन्तरवचनात्।

९. अविद्यमानधिष्ण्यानामन्तरेण होतृधिष्ण्यं मैत्रावरुणधिष्ण्यं चासमाप्ते सवने संचरो भवति। प्राग्गतिषु ब्रह्मणोऽपरया द्वारा प्रविष्टत्वात्। प्रत्यग्गतिष्वितरेषां पूर्वया द्वारा प्रविष्टत्वात्।

१०. सदस्यन्यत्र वा ये धिष्ण्यवन्तस्तेषां स्वंस्वं धिष्ण्यमुत्तरेणाग्नीध्रस्य प्राग्गतिषूत्तरेण स्वं धिष्ण्यं प्रत्यग्गतिष्वपरेण।

११. यद्यधिकृताः स्वकार्येणोदञ्चो गच्छेयुः पश्चार्धेनाग्नीध्रीयस्य गच्छेयुः। स्वरुच्योदग्गच्छतामेष विसंस्थितसंचरः।

१२. [2]दक्षिणा चेद् व्रजेयुर्मार्जालीयस्य पश्चार्धेन वा व्रजेयुः।

१३. येनैव मार्गेण गतास्तेनैवाव्यावर्तमानाः प्रत्यायन्ति। चशब्दादविलम्बितम्।

---

[1] A C (orig.) निःसंचरन्ति। [2] B om. दक्षिणा C (sec. h.) del. चे।

१४. ऊर्ध्वं प्रातःसवनाद्यत्प्रसर्पणमुच्यते तत्र समस्तोपस्थानप्रभृतिनाग्नयः सगरा इत्यादिना यथोक्तेन मन्त्रकर्मकलापेन[1] प्रसर्पन्ति।

१५. यदाध्वर्युराह प्रशास्तः प्रसुहीत्यों सर्पतेति प्रशास्ता आहेति संप्रैषवशात्संसर्पत्सु च्छन्दो (०) गेषु हुत्वा चोलग्निमनुपयन्तीति च श्रुतिदर्शनात् प्राप्तस्य समस्तोपस्थानप्रभृतेरादित्योपस्थानं रात्रिपर्यायाभिनयोः प्रतिषिध्यते। अन्यत्र दैवान्मानुषाद्वा प्रतिबन्धात्। कालोत्कर्षे त्वस्तमिते ऽप्यादित्योपस्थानं प्राप्त्यर्थम्। तत्र हि प्राण उपस्थेयो यदयं[2] प्राणो ऽध्यात्ममित्यर्थवादात्।

द्विरभ्यासो ऽध्यायपरिसमाप्तौ शिष्टाचारस्तदाचरणं चायुष्यमिति।

इति शाङ्खायनश्रौतसूत्रभाष्ये षष्ठो ऽध्यायः समाप्तः।

शाङ्खायनकसूत्रस्य समं शिष्यहितेच्छया।
वरदत्तसुतो भाष्यमानर्तीयो ऽकरोन्नवम्[3]॥

---

[1] A om. कर्म°। [2] B प्राणाप्या° A स्वाप्यय°। [3] Om. in A C.

अथ सप्तमो ऽध्यायः।

१.

१. श्रुतिक्रमेण सदःप्रसर्पणादनन्तरं सवनीयपुरोलाशप्रचारमाह। प्रसृप्येति प्रसर्पणानुवादः परिभाषासूत्रैर्व्यवहितत्वात्। प्रातःसवनसवनीयाङ्गार्थः प्रसर्पणस्यानुवाद इति वृद्धसंप्रदायः। अथ हविष्पङ्क्त्या चरन्ति पशवो वै हविष्पङ्क्तिः पशूनामेवाप्त्यै तानि वै पञ्च हवींषि भवन्ति दधि धानाः सक्तवः पुरोलाशः पयस्येति (१३.१) श्रुतेः। एवंरूपेष्वपि हविःषु पुरोलाशैरित्युक्तं पौर्णमासीविकारार्थम्। सवनीयसंज्ञाकरणं शास्त्रसंव्यवहारार्थम्।

२. धानावन्तं करम्भिणमिति पुरोनुवाक्या भवति। वैश्वामित्रीरनुसवनमित्यादिश्रुतेः (२८. २)।

३. होता यक्षदिन्द्रं हरिवाँ इत्यादिको ऽनुसवनं सवनीयपुरोलाशानां प्रैषः। अनुसवनमिति प्रसङ्गमुपजीवता लाघवार्थमिहैवोक्तं। तैत्तिरीयाणामितरयोरपि सवनयोः पयस्यास्ति। तदुपलक्षणप्रतिषेधार्थं यथासमाम्नातवचनम्।

४. सवनीयहविःप्रैषस्य यथासवनमभिदधत्प्रयोगं करोति। वक्ष्यत्युत्सर्गिणामयने (१३.२०) यद्देवतो वा सवनीयः स्यात् तत्र पशुतन्त्रे हवींष्यन्वायातयन्तीति। तत्र सवनपदानां सविशेषणानामुत्सर्गः कथं नाम स्यात्। सवनाभावादित्येवमर्थं सूत्रम्।

५. तादृशेनैवानुसवनं यथासवनाभिधायिना प्रैषेण यजति । किमविशेषेण । नेत्युच्यते । उद्धृत्य होतायक्षमित्येवंशब्दमुद्धृत्य होतर्यजशब्दं च । इन्द्रमित्यस्य देवतादेशनस्योद्धारः । सप्रैषे तु न विद्यत इति परिभाषितत्वात् (१. २. २०)। उद्धृत्यादेशपदमिति (५. ४. ४) चाश्वलायनस्यासंदिग्धमादेशपदमेतत् ।

६. सवनीयस्य हविःस्विष्टकृतो वैश्वामित्रीरनुसवनमित्याद्यविशेषश्रुतेः ।

७. होता यक्षदग्निं पुरोलाशानामित्येवमादिकः सर्वेषु सवनेषु हविष्पङ्क्त्यां स्विष्टकृत्प्रैषो भवति ।

८. अनुसवनमेव चशब्दात् । समानमन्यत्प्रातःसवनेनेति सिद्धे ऽनुसवनवचनं[1] नियमार्थम् । ततो यत्रापि पशुपुरोलाशस्य सवनीयानां च समानः स्विष्टकृत्तत्राप्येष एव प्रैषो याज्या च[2] । अवचने तु न स्यात् । पुरोलाशस्विष्टकृत्समवाये ऽपि इति (५. १९. ३) वचनात् ।

२.

१. ऐन्द्रवायवस्य मैत्रावरुणस्य द्वौ ग्रहयागौ[3] आश्विनस्य तृतीय इत्येते द्विदेवत्यसंज्ञा अनेनैव क्रमेण सवनीयपुरोलाशानन्तरं भवन्ति ।

२. माधुच्छन्दसावभिरूपे द्विदेवत्यानां प्रथमस्य पुरोनुवाक्ये अश्वाहेति (२८. २) श्रुतेः ।

३. होता यक्षद्वायुमग्रेगाः । होता यक्षदिन्द्रवायू अर्हन्तेत्येवमादिकौ प्रैषौ ।

---

[1] C om सवन । [2] C च । प्रैषो याज्यावचनं चि स्यात् । पुरोला० । [3] C द्वौ ग्रहौ यागावाश्वि० ।

४. अयं पिबा मधूनाम्। शतेना नो अभिष्टिभिः। एते याज्ये भवतः। श्रुत्यन्तरात्।

५. गार्त्समदीं च मैधातिथीं चोत्तरयोरभिरूपे अन्वाहेति श्रुतेः (२८. २)।

६. होता यक्षन्मित्रावरुणेत्येवमादिकः प्रैषो (०) भवति।

७. श्रुत्यन्तरात्।

८. प्रातर्युजा वि बोधयेत्याश्विनस्य पुरोनुवाक्या। मैधातिथीं चेति श्रुतेः।

९. होता यक्षदश्विना नासत्येत्येवमादिकः प्रैषो भवति।

१०. वावृधाना शुभस्पती इति याज्या। श्रुत्यन्तरात्।

११. द्विदेवत्यानामयं वैशेषिको धर्मः।

१२. तस्मादनवानं यजतीति (१३. ५) श्रुतेः।

१३. इतरयोरसंभवात् ऐन्द्रवायवग्रहणं नियमार्थम्। तेनोत्तरयोः षष्ठे ऽप्यहनि न द्वौद्वौ प्रणवौ। ऐन्द्रवायवस्य च द्वावेव न चत्वारः।

१४. ऐन्द्रवायवस्यैव नानावषट्कारे एव। अतश्च षष्ठे ऽहन्यप्यैन्द्रवायवस्य द्वौ वषट्कारौ पारुच्छेप्योस्तयदाभिस्तदहर्न वषट्कुर्वन्तीति श्रुतिज्ञापकम्। इतरयोरप्येकैको वषट्कारः। एतदेव ज्ञापकम्।

१५. वषट्कारद्वित्वे ऽपि सति पुरस्तात्प्रणवो येयजामहोजःसहः सकृदेव।

६.

१. ऐतु वसुः पुरूवसुरित्यनेन मन्त्रेण ऐन्द्रवायवमध्वर्युहस्ताद्गृहीत्वापोर्णुत्य[1] दक्षिणमूरुं तस्मिन्निदध्यात्। निहितानां चाच्छादनमवेक्षणं च न कुर्यादा प्रतिभक्षितस्य शेषस्य निनयनात्[2]।

२. ऐतु वसुर्विदद्वसुरित्यनेन मन्त्रेण मैत्रावरुणं प्रतिगृह्य तं दक्षिणेनैन्द्रवायवं नीत्वा तस्य दक्षिणतःपश्चान्निदधाति[3]।

३. ऐतु वसुः संयद्वसुरित्यनेन मन्त्रेणाश्विनं प्रतिगृह्य तं दक्षिणेन पूर्वावैन्द्रवायवमैत्रावरुणौ नीत्वा तयोरेवोत्तरतःपश्चान्निदधाति। संलग्नान्निदध्यात्। अभिधानत[4] इवाभित इति (१ ३.५) श्रुतेः। तानवगृह्यास्ते नेत्प्रवर्तन्ता इति श्रुतेः। स्वयं धारयेत्। अप्रवर्तनपरत्वादन्यो ऽपि वा धारयेत्।

४. याः सोमद्रव्यसंबन्धेन याज्या विधीयन्ते तासु सर्वासु सोमस्याग्ने वीहीत्यनुवषट्कारसंज्ञको मन्त्रो याज्यात्वेन भवति। अन्वर्थसंज्ञा चेयं वषट्कारमनुभवतीति। न संप्रैषमपेक्षत इत्यर्थः। यत्राप्युक्थ्यशा यज सोमानामिति संप्रैषस्तत्रापि सोमस्याग्ने वीहीत्येकवचनमेव। सर्वग्रहणात्। द्विदेवत्यादीन्परिहाप्य। नानुवषट्करोतीति श्रुतेः[5]।

५. अग्नीत्पात्नीवतस्योपांशु यज। माचा[6] तू याचीरिति तैत्तिरीयाणां संप्रैषः। तत्र प्रतिषेधो ऽन्यत्र विकल्पः।

---

[1] A C °पोर्णुत्य। [2] B प्रतिभक्षितस्यावनयनात्। [3] B has [illegible] दक्षिणापरे प्रदेशे ऊरावयं निदधाति instead. C has चेत्तु °दधाति in marg. in the text: स्पष्टमेतत्। [4] B C अभिधानतस्। [5] A C [illegible] श्रुतेः। [6] B C माचा तू A °चाच तु॰

४.

१. उन्नीयमानेभ्यश्चमसेभ्य इत्युक्त उन्नीयमानसूक्तमा त्वा वहन्तु हरय इत्येतत्। ता वै नवान्वाह नव ह्या अत्र चमसानुन्नयन्तीति (२८. २) श्रुतेः। खलु ह्येके प्रातःसवन उन्नीयमानेभ्योऽन्वाहुरित्ययं पक्षो नेष्टः सूक्तवचनात्। संप्रैषपाठः क्रमार्थः।

२. होता यक्षदिन्द्रं प्रातः प्रातःसावस्येत्येवमादिकं प्रैषं मैत्रावरुणोऽन्वाह। पूर्वं चानुवचनम्[1]। परिभाषितत्वात्।

३. इदं ते सोम्यं मध्विति प्रस्थितानां याज्येति (१३. ६) श्रुतेः।

४. नृचक्षसमित्येवमादिना मन्त्रेण होतृचमससंज्ञकं चमसं होता प्रतीक्षते।

५. वयोधसमित्येवमादिना मन्त्रेण प्रकृतं होतृचमसं प्रतिगृह्णीयात्।

६. प्रकृतं होतृचममसुरः संस्पर्शयेद्द्विदेवत्यांश्चोरस्थान्।

७. पूर्वमुन्नीयमानसूक्तेनानूच्यमानेन ये चमसा उन्नीतास्ते सर्व एव वषट्कारेण हुताः। ततश्चत्वारः सदः प्रवेशिताः। होतृब्रह्मोद्गातृयजमानचमसाः। शिष्टानां पुनरुन्नीतानां वक्ष्यमाणा होत्रकसंज्ञका यजन्ति।

८. मित्रं वयं हवामह इत्येतया मैत्रावरुणो यजति।

९. इन्द्र त्वा वृषभमित्येतया ब्रह्मपुरुषो ब्राह्मणाच्छंसी होत्रको यजति।

---

[1] B °वचनम्।

१०. ब्रह्मपुरुष एव होत्रकः पोता मरुतो यस्य हि क्षय इत्येतया यजति ।

११. नेष्टाध्वर्युपुरुषो होत्रकः। सो ऽग्ने पत्नीरित्येतया यजति।

१२. उक्षान्नाय वशान्नायेत्येतयाग्नीध्रो ब्रह्मपुरुषो होत्रको यजति ।

१३. अयाळग्नीदित्येतस्मिन्नध्वर्युणोक्ते ऽयाळित्याग्नीध्रो ब्रूयात्। ननु कथमेतज् ज्ञायते ऽध्वर्युणोक्त इति। उच्यते। उत्तरसूत्रे होतृवचनात् ।

१४. स भद्रमित्यादिकं सवनधर्मेणाह होता ।

१५. सोमभक्षपरिभाषेयम्। अनारभ्य किंचिदुच्यते। उत्क्षिप्य सोमपात्रं प्राग्भक्षणात्। भक्षयिष्यन्त इति भविष्यत्प्रयोगात्। याज्ञिकैर्नामधेयैर्न लौकिकैः। असावित्यामन्त्रितकर्तृनामधेयप्रयोगेणोपह्वयस्वेत्यनेन सह सामर्थ्यात्। कर्तार ऋत्विजो यजमानश्चान्योऽन्यस्मिन् कर्मव्यतिहारेणोपहवमनुज्ञामिच्छन्ते। प्रार्थयन्त इत्यर्थः। साधारणेषु सोमेष्वयं न्यायो युज्यते। कदा चिद्बहुतरं पास्यामीति। असाधारणेषु च। नानुपहूतेन सोमः पातव्य इति श्रुतेः ।

१६. होमाभिषवकारिणः पूर्वो वषट्कर्ता भक्षयेद्वचनात्। तस्मिंश्च सति तद्विपरीतस्य न्यायस्यानवतारात् ।

१७. द्विदेवत्या ऐन्द्रवायवमैत्रावरुणाश्विनाः नाराशंसवन्तश्च ग्रहाः। आज्यप्रउगमरुत्वतीयनिष्केवल्यवैश्वदेवेषु। एतेषां प्रतिभक्षितमध्वर्युणैकदेशशेषं होतृचमसे ऽवनयेत्। हुते त्वा भक्षितमित्येवमादिना मन्त्रेण।

१८. अत्र श्रुत्यन्तरोक्तं द्विरैन्द्रवायवशेषस्यावनयनम्। मन्त्रश्च द्विरुच्यते।

१९. अवसर्जनं विमोकः। स न कर्तव्यो द्विदेवत्यानाम्। यावत्तस्यतस्य शेषस्यावनयनं न कृतमिति। उक्ता सोमभक्षपरिभाषा। इदानीमवसरप्राप्तो द्विदेवत्यभक्ष उच्यते।

५.

१. इह वसुरित्यादिना मन्त्रेणैन्द्रवायवग्रहमध्वर्यवे दत्त्वानन्तरमुपहूतौ वायुरित्यादिना भक्षयित्वा तमेवैन्द्रवायवं प्रग्रहणमन्त्रेण पुनः प्रगृह्य भक्षमन्त्रेण पुनर्भक्षयति। ऊरौ न निदधाति। नाध्वर्युर्मुञ्चति[1] न[2] होता परिसङ्ख्यानात्।

२. अध्वर्यव इति वर्तते। इह वसुरित्यादिना मन्त्रेण। मैत्रावरुणं ग्रहमध्वर्यवे प्रगृह्यानन्तरम्।

३. उपहूतौ मित्रावरुणावित्यनेन मन्त्रेण मैत्रावरुणं ग्रहं भक्षयति।

४. आश्विनं ग्रहं तमूरोरादाय शिरः प्रदक्षिणं पर्याणीय अवेक्ष्य तेनैव मार्गेण प्रत्यानीयावेक्षते। सर्वतः परिहारमाश्विनस्य भक्षयतीति (१२. ६) श्रुतेः। अवेक्षणं तु शाखान्तरात्।

५. इहाध्वर्यवे प्रयच्छति। न पूर्वम्। आश्विनवचनात्।

६. उपहूतौ देवावित्येवमादिना मन्त्रेणाश्विनं भक्षयित्वानन्तर-

---

[1] C. ॰ध्वर्युं मु॰। [2] A B C म; C (sec.h.) del.

मुपस्पृश्य[1]। द्विदेवत्यभक्षपद्धतिरत्रोच्यते। अध्वर्य उपह्वयस्वेत्युपहवमिष्ट्वा तेनोपहूत उपहूतो वायुरित्यादिना भक्षयेत्। तत्र चरोऽभिमर्शनमपामुपस्पर्शनं च[2]। एवं यथोक्तमैन्द्रवायवं मैत्रावरुणमाश्विनं च। अध्वर्य उपहवस्तस्य होमाभिषवकारित्वात्[3]। वषट्कारनिमित्तो हि भक्षो द्विर्हि तस्य वषट्करोतीत्यैन्द्रवायवे हेत्वारम्भात्[4]।

७. उपस्पृश्योष्ठनिलिम्पनादिना इळामुपह्वयते। इळाङ्गमुपस्पर्शनम्। तेनेतरयोरपि सवनयोर्भवति। द्विदेवत्यानां प्रथमो भक्षोऽथेळाय होतृचमस इति (१२.६) श्रुतेः। [5]उपस्पर्शनं शाखान्तरात्।

८. चमसाध्वर्यवश्चमसानिळासमीपमुत्क्षिपन्ति।

९. होता सव्येन होतृचमसं पात्रीं च संयच्छतीति (७) श्रुतेः।

१०. सर्वत्राज्यलेपेन सोमसंस्पर्शो वर्जनीयो न केवलमत्र।

११. इळामुपह्वयत इति प्रकृतम्। तामुपहूय अभक्षयित्वेत्यर्थः। इळायास्त्वयं नियमः। तत्र उत्तरेळां प्राश्नात्येव प्रकृतिवत्। उपह्वयेळामवघ्रायावद्यति प्राश्नात्युत्तरेळामथाप आचम्य होतृचमसं भक्षयतीति श्रुतेः। एवमुत्तरेळाभक्षाचमनानन्तरं प्रस्थितसंज्ञकान्सवनमुखीयान्होत्रादिभिर्वषट्कृतान्भक्षयन्ति[6] होत्रादयः। प्रातःसवने प्रस्थितभक्षे वृद्धसंप्रदाय उच्यते। होता[7] तावदध्वर्य उपह्वयस्व प्रतिप्रस्थातरुपह्वयस्वेत्युपहवमिष्ट्वा ताभ्यामुपहूतस्तेजसे त्वा ब्रह्मवर्चसाय भक्षयामीति भक्षयत्ययं शुक्रनिमित्तो भक्षः। भक्षयित्वा यं नो भवे-

---

[1] A. ins. अथ A B om. अत्रोच्यते B om. भक्ष। [2] A ins. सर्वत्र। [3] C °कारितत्वात्। [4] A ऐन्द्रवायवे हेत्वारम्भात् B °वायववयोव हे°। [5] C अनुप° alt. to अमप°। [6] A C (orig.) °सवनीयान्होत्रा°। [7] C होता वचनाद् अध्वर्यं।

त्यनयोरो ऽभिमृश्य तत उपस्पृशेत्। ततो ऽध्वर्युणा भक्षिते होता प्रतिप्रस्थातरुपह्वयस्वेत्युपहवमिष्ट्वा तेनोपहूतः पूर्ववद्भक्षोरोऽभिमर्शनोपस्पर्शनानि कुर्यात्। अयं मन्थिनिमित्तो भक्षः। ततः प्रतिप्रस्थात्रा भक्षिते होता पुनरध्वर्यू पृष्ट्वा ताभ्यामुपहूत उन्नीयमानवषट्कारनिमित्तं भक्षयत्युरोऽभिमर्शनादि च करोति। ततः[1] पुनर्होतृचमसे समाख्यानिमित्तभक्षार्थमध्वर्य उपह्वयस्व प्रतिप्रस्थातरुपह्वयस्वेत्युपहवमिष्ट्वा ताभ्यामुपहूतो भक्षादि पूर्ववत् कुर्यात्। तत आप्यायनं यथोक्तम्। अथ ब्रह्मचमसम्। ब्रह्मन्नुपह्वयस्वेति तेनोपहूतः पूर्ववद्भक्षणादि सर्वं कुर्यादाप्यायनवर्जम्। तत उद्गातृचमसम्। उद्गातार उपह्वयध्वमिति उपहवमिष्ट्वा तैरुपहूतः पूर्ववद्भक्षणादि कुर्यात्। सर्वमाप्यायनवर्जम्[2]। न त्वस्योद्गातृवर्जं भक्षणप्रसिद्धेः। अथ यजमानचमसम्। यजमानोपह्वयस्व सुन्वन्नुपह्वयस्वेति वोपहवमिष्ट्वा तेनोपहूतः पूर्ववद्भक्षणादि कुर्यात्। अथ मैत्रावरुणचमसम्। प्रशास्तरुपह्वयस्व अध्वर्य उपह्वयस्वेत्युपहवमिष्ट्वा ताभ्यामुपहूतः पूर्ववद्भक्षणादि कुर्यात्। ततो ब्राह्मणाच्छंसिनश्चमसम्। ब्रह्मन्नुपह्वयस्वाध्वर्य उपह्वयस्वेत्युपहवमिष्ट्वा ताभ्यामुपहूतः पूर्ववद्भक्षणादि कुर्यात्। ततः पोतृचमसम्। पोतरुपह्वयस्वाध्वर्य उपह्वयस्वेत्युपहवमिष्ट्वा ताभ्यामुपहूतः पूर्ववद्भक्षणादि कुर्यात्। ततो नेष्टृचमसम्। नेष्टरुपह्वयस्वाध्वर्य उपह्वयस्वेत्युपहवमिष्ट्वा ताभ्यामुपहूतः पूर्ववद्भक्षणादि कुर्यात्। तत आग्नीध्रचमसम्। अग्नी-

---

[1] A होतृचमसे. B C om. the passage beginning with होता पुनरध्वर्यू ending with ततः पुनः C होतृचमसे वषट्कारसमाख्या° (वषट्कार in marg.)।

[2] C in marg. यथोक्तम्।

दुपह्वयस्वाध्वर्य उपह्वयस्वेत्युपहवमिष्ट्वा ताभ्यामुपहूतः पूर्ववद्भक्षणादि कुर्यात्। एवं होतुर्भक्षः। अथ ब्रह्मोद्गाता यजमानश्च होतरुपह्वयस्वेत्युपहवमिष्ट्वा.तेनोपहूता यथाचमसं होतृवद्भक्षणादि कुर्युराप्याययेयुश्च। अथ मैत्रावरुणो ब्राह्मणाच्छंसी पोता नेष्टाग्नीध्रश्च होतरुपह्वयस्वाध्वर्य [1]उपह्वयस्वेत्युपहवमिष्ट्वा ताभ्यामुपहूताः[2] स्वंस्वं चमसं होतृवद्भक्षयेयुः। पुनश्च समाख्यानिमित्तं[3] होतरुपह्वयस्वाध्वर्य उपह्वयस्वेत्युपहवमिष्ट्वा ताभ्यामुपहूताः स्वंस्वं चमसं होतृवत्[4] भक्षितं भक्षयेयुराप्याययेयुश्च। इति प्रस्थितभक्ष उक्तः। अथ प्रकृतमुच्यते।

१२. तेजसे त्वेत्यादिभक्षमन्त्रः प्रातःसवने[5] औत्सर्गिकः।

१३. ओजसे त्वेत्यादिमन्त्रो माध्यन्दिने सवने[6] औत्सर्गिक एव।

१४. व्यवस्थितः प्रतिसवनमुत्सर्गः। वचनात्प्रकरणं भित्त्वा।

१५. शं नो भव हृद आ पीत इन्दो इत्यनयोरोऽभिमृशेत् सोमं भक्षयित्वा। भक्षयित्वेत्यतिरेकात्सर्वत्र द्विदेवत्यादिष्वपि।

१६. एतावदाप्यायनं न सोमासेक इति ज्ञापनार्थं [7]यथाप्राप्तस्योपदेशसूत्रम्।

१७. आ प्यायस्वेत्यादिका ऋगाप्यायनी। ततो न द्रव्यान्तरम्। अनया सव्यहस्तस्थितस्य चमसस्य दक्षिणेन स्पर्शनम्। प्रातःसवनवचनात्प्रातःसवन एवानया। नोत्तरयोः सवनयोः। अन्यथा विकल्पसमुच्चयौ[8] स्याताम्।

---

[1] होतरुपह्वयस्व C in marg। [2] B तेन। [3] B C (orig.) om. होतरुपह्वयस्व। [4] According to C (marg.); A has इत्यु तेनाध्वर्युणा भ०। [5] C om. तेजसे० वने। [6] C om. ओजसे० वने। [7] C in marg. आप्या instead of यथा। [8] C (sec. h.) ins. वा।

१८. सं ते पयांसि समु यन्तु वाजा इतीयमाप्यायनी उत्तरयोः सवनयोः ।

१९. होतृब्रह्मोद्गातृयजमानमैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकाग्नीध्रचमसाः सवनमुखीयाः प्रस्थिताः । तान्भक्षितप्रतिभक्षितान्नाराशंसार्थमाप्याययन्ति[1] ।

२०. आप्यायनप्रसङ्गमुपजीवन्नन्यत्राप्याह । आज्यशस्त्रे ग्रहभक्षानन्तरं ये चमसास्ते नाराशंसाख्या वक्ष्यन्ते । तान्भक्षितप्रतिभक्षितानाप्याययन्ति मरुत्वतीये च[2] ।

२१. आज्यादिषु यथोद्दिष्टेषु ये वषट्कारेण चमसा हविर्धानस्था एव कम्प्यन्ते यदुक्तं कात्यायनेन नाराशंसानां च कम्पनमिति ते नाराशंससंज्ञाः । संव्यवहारार्थं[3] संज्ञाकरणं । नाराशंसानां मन्त्राणामुपवाते नाराशंस इति च ।

२२. देवो ऽसीत्येवमादिना नाराशंसानां प्रातःसवने भक्षमन्त्रः । प्रातःसवनवचनमुत्तरयोरविकल्पार्थम् । नाराशंसवचनं सहापि ग्रहशेषेणायमेव नाराशंसानां भक्षमन्त्र इति नियमार्थम् ।

२३. तस्य त ऊर्वैः पितृभिरित्यर्थसंबन्धादेव प्राप्नोति । विकारवचनमग्निष्टुति विकारान्तरप्रतिषेधार्थम् ।

२४. तस्य ते काव्यैः पितृभिरिति तृतीयसवने प्रयोगः ।

---

[1] A C नाराशंसासादनार्थं । [2] A om. the Comm. on this Sūtra.
[3] C ते नाराशंसाः । संज्ञाकरणं नाराशंसानां ।

६.

१. अकारान्तस्याप्यच्छावाकशब्दस्य सौदेतिशब्देन सह संबन्धे सकारस्य द्वित्वं छान्दसम्। शाखान्तर एवमेव प्रैषपाठात्। अथ वा। अच्छावाकः एतावत्सूत्रमधिकारार्थम्। अनन्तरं कर्म कुर्वन्नप्रसूतो ऽप्यच्छावाक[1] उच्यते यदि सौदेत्यविशेषेण शाखान्तरे प्रैषः। वाजसनेयिनां प्रैषो नास्ति। तच्चाप्यामनमासीनन्यायं वाक्यमिति परिभाषितत्वात्।

२. अग्रेण सदसो बहिः उत्तरेण[2] अदूरेण स्रुतिं शालामुखीयादारभ्य उत्तरवेदेर्द्वारपरंपरया यो मार्गः स्रुतिशब्देन स उच्यते तमुत्तरेणोपविश्य। किमनन्तरमित्यत आह।

३. पुरोलाशखण्डमध्वर्युणा दत्तं गृहीत्वा ततः।

४. क्रमार्थं संप्रैषवचनम्। केषां चिदभ्यधिको ऽपि संप्रैषः।

५. अच्छा वो अग्निमवस इत्येवमाद्या ऋचो ऽच्छावाकस्तिस्रो ऽन्वाह।

६. तिसृणां यो ऽन्त्यो प्रणवस्तृतीये वचने तेन संततं वक्ष्यमाणं निगदमाह।

७. अयं निगदः। एतस्मिन्नच्छावाकेनोक्ते।

८. सर्वार्थो ऽयं[3] मध्ये ऽध्वर्युवचनात् द्वितीय उपहवमयमित्यादिस्तं होतरुपह्वयस्वेति होत्रर्थः।

---

[1] A C (sec b.) कुर्वन्नप्र॰ B C (orig.) कुर्वन् प्र॰। [2] A उत्तरेण स्रुतरे अदूरेण B उत्तरेण स्रुतिं C उत्तरेण। उत्तरे अदू॰ (orig. अधरेण)। [3] A यजमानेत्यादि मध्ये ऽध्व॰।

९. अयं तावत्प्रथमः कल्पः । यदा होता नोपह्वयते तदेतर उपह्वयेरन्नुत्तरस्याम्नानात् ।

१०. नायं निगदः । पूर्वस्य निगदवचनात् । ततो नैकस्वर्यं नोच्चैस्त्वं । अयं सुन्वन्यजमानो अग्रभीदित्यस्य विकारेषूहः । य उपह्वास्यमानो भवति स प्रत्येतेत्येवमादिकं मन्त्रं गाव उपहूता इत्येवमन्तं जपित्वा तत उतोपहूत इत्यैकस्वर्येण ब्रूयात् ।

११. यः पुनरनुपह्वास्यमानो भवति स उत नो गाव उपहूता इत्यातो जपेत् । अभिविधौ चायमाङ् द्रष्टव्यः । उतोपहूत इति न[1] ब्रूयादित्यर्थः । उपह्वास्यमान उच्यते । उपहवं दातुमिच्छन् । तद्विपरीतो ऽनुपह्वास्यमानः । न चायमुपहवः प्रायश्चित्तार्थो यथा कात्यायनेनोक्तः । शालासनास्वप्नौ सन्धिवेलयोर्वेद्यां सुत्यासु प्रायश्चित्तमपराध इतरेतरस्मिंश्चोपहवमिच्छेरन्नन्त्यामेकदीक्षीति (७. ५. १२)। न च क्रियाविशेषणार्थो यथा नानुपहूतेन सोमः पातव्यः । तत्त्वोपहूतः । इत्युपहवश्छन्दोगानां । अतो ऽयं यथोक्तमेवं क्रियमाणमभ्युदयकारि भवतीति कृत्वा कर्तव्यः ।

१२. उतोपहूत इति नोक्तो ऽच्छावाको यजमानत्वेनापि सत्त्रेषु स्थितो ऽच्छावाकवचनात्[2] । निवर्तध्वं मानु गातेत्येतस्य सूक्तस्य । सूक्तवचनात्तत आरभ्य वेदशेषस्य यावच्छक्नुयात् प्राक् संप्रैषात्तावदनुद्रवेत् । यावतीरिति (१३. ८) श्रुतेः । प्रक्रान्ताया ऋचः समापनम् । अनुद्रवेदिति वचनाच्च गणधर्मो नैकस्वर्यम् ।

---

[1] C (ori

[2] B अच्छावाक इति।

१३. होता वान्यतमो वा यजमानादीनां अरोचमानमच्छावाकं प्रत्युपहूय निवर्तध्वमिति यथोक्तं कुर्यात् ।

७.

१. उन्नीयमानायानुब्रूहीत्येवमध्वर्युणा संप्रेषितः प्रत्यस्मै पिपीषत इत्येतत्सूक्तमन्वाह चतुर्ऋचम् । स्वयमच्छावाकः सप्तमीमिति पक्षान्तरश्रुतेः । सूक्तवचनं स्वाभिप्रेतसिद्ध्यर्थम् । अच्छावाकवचनं मैत्रावरुणनिवृत्त्यर्थम् ।

२. प्रातर्यावभिरा गतमित्यैन्द्राग्न्या यजतीति (२८.७) श्रुतेः ।

३. पूर्वप्रसृप्तस्याच्छावाकीयां कुर्वतः समाख्याभक्षो न प्राप्नोति । तदर्थं भक्षितवचनम् । अप्रस्थितत्वादाप्यायनं न प्राप्नोति । तदर्थमाप्यायितवचनम् । अध्वर्यवे प्रदायेति नाराशंससादनार्थम् । तथा च कात्यायनः । होतृचमसवत्सर्वमित्याह । दक्षिणावृदित्यादि नियमार्थम् । सदोवचनं दिवस्पृष्ठमित्यादिक्रियार्थम् । स्वस्य धिष्ण्यस्य पश्चादुपविश्य निर्गत्य पुरोलाशं प्राप्नोति । उच्छिष्टदोषपरिहारार्थं निर्गमनम् ।

४. पूर्वप्रसृप्ता मैत्रावरुणादयः । तेषामन्यतमो यदि अत्यन्तरीयाद्धोत्रासमांसवचनादच्छावाकीयां कुर्यात् ततः स्वेन विसंस्थितसंचरेण सदसो निष्क्रम्याच्छावाकस्य बहिष्क्रमाच्छावाकस्योदेत्युक्तो ऽग्रेण सद इत्यादिकं कृत्वा स्वकर्म कुरुते । पुरोलाशप्राशनं कुरुत इत्ययं क्रमः । केचित्पूर्वग्रहणाद्यो ऽच्छावाकात्पूर्वः [1]प्रसृप्तः करोति ।

---

[1] B स प्रसृ॰ ।

इतरस्तु ग्रावस्तुदप्रसृप्तः। अपूर्वत्वात्। सो ऽच्छावाकसंचरेणैव प्रतिपद्यते। अच्छावाकीयावचनात्मकत्वाम्। न बहिष्कर्ममाचम्। पूर्वप्रसृप्तो ऽपि न यजमानो न सदस्यो विसंस्थितसंचरेणेत्यारम्भात्। प्रत्यग्गमने हि स[1] विसंस्थितसंचरो न तु प्राग्गमने। सकृद्धिष्ण्योपस्थानम्। अच्छावाकस्य बहिःकर्मेति नियमात्। प्रसङ्गेनान्यत्रापि होत्रासमासे ये विशेषास्त उच्यन्ते। होत्रासमासशब्दस्य तन्त्रान्तरे प्रसिद्धः। एकस्य कर्तुरनेकार्त्विज्यक्रियायोगे। तत्र संचराणां सकृत्क्रिया। गन्तव्यस्य प्रधानत्वात्। इलाभक्षणमाग्नीध्रे। दधिभक्षणं दशरात्रे। शाखान्तरोक्तं मध्वशनं घृतस्य वा। तथा ऋत्विग्भ्यस्तं कारयेदिति पशुभक्षणम्। सहर्त्विग्भ्यो निर्वपतीत्योदनभक्षणम्। एतानि भक्षणानि सकृत्तन्त्रलक्षणात्। [2]सकृन्मधुपर्को गुणभूतत्वात्। सकृद्ध्रियमाणप्रश्नः। तथा तानूनप्त्रम्। सकृदुपस्पर्शनानि। सकृत्संशप्यमानपश्वीक्षणप्रायश्चित्तम्। सकृद्धिष्ण्योपस्थानाद्युपवेशनान्तं। भेदेनान्यान्युपस्थानानि। अया विष्ठेति च गच्छन् जपो भेदेन। स्वाश्रयत्वात्। धिष्ण्योपस्थानादि तु पराश्रयं सर्पणगुणभूतत्वात्। तान्सदः प्रसर्प्यन्नमस्यतीति श्रुतेः। सर्पणं सकृत्प्रवेशगुणभूतत्वात्[3]। प्रत्युपहवनस्याभेदस्तथा[4] श्रुतेः। धानाव्यादानं भेदेन। धिष्ण्येक्षणं सकृन्निःसर्पणाङ्गत्वात्। निधनोपायः सकृत्कालासंभवात्। सकृदप्सु पादावधानम्। पृच्छामि त्वेत्यादिको ऽश्वमेधे यजमानप्रश्नो भेदेनापूर्वार्थत्वात्। सर्वौषधहोमे होत्रासमास एव नास्ति। परिकर्म्या-

---

१ A B [illegible]॰। २ C (in marg.) तु सस॰। ३ A C भावात् instead ..त्। ४ B भेदः।

रोहणन्यायात्[1]। प्रायश्च एतदेव न्यायप्रदर्शनार्थो वा प्रपञ्चः। प्रकृतमिदानीमुच्यते। स्वकर्म कुरुते इति वचनं नापरया द्वारा प्रविश्य स्वस्य[2] धिष्ण्यस्य पश्चादास्त इत्यर्थः। ततश्चमसमध्वर्यवे प्रदाय पुरोलाशं प्राश्य पूर्वया द्वारा प्रविश्य स्वकर्म कुर्यात्।

५. होता स्व एव धिष्ण्ये स्थितो ऽच्छावाकीयां करोति। नाच्छावाकीये। तुशब्देनान्यस्यापि होत्रकस्य होतृधिष्ण्य एव प्राप्तिर्दृढीकृता।

६. होतृविकाराणां च मैत्रावरुणप्रभृतीनां। होत्रकाणां या याज्यास्ताः स्वधिष्ण्य एव स्थितो होता कुर्यात्। गत्वा वा तदीयं धिष्ण्यम्। व्यग्रेषु वा होत्रकेषु प्राप्तिः शाखान्तरीयाद्वचनात्। प्रैषानुवचनशस्त्रादीनि स्वधिष्ण्य एव। याज्यावचनात्।

७. अधिकारो ऽयम्।

८. अत्र प्रातःसवने प्रस्थितयागे होत्रका होता चानवानन्तो अनुच्छ्वसन्तो ऽर्धर्चेषु यजन्ति। तथा च श्रुतेः। क्षिप्रं देवेभ्यो हविः प्रदास्याम इति चेत्यर्थवादात्[3]। अर्धर्चशो वेत्यर्धर्चशः प्राप्तौ। न तु षष्ठे ऽहनि विकल्पो ऽनवानवचनाच्च।

९. कर्तार इत्यनुवर्तते। अत्रेति च। यज्ञकर्तारो ऽत्र व्रतयन्ति। व्रतं कुर्वन्ति भुञ्जन्त इत्यर्थः। व्रतयन्तीति क्रियाभिधानात्सार्वकामिकमिति गम्यते।

---

[1] B परिक्रमा C (in marg.) प्र instead of परि। [2] C om स्वस्य।
[3] A C (in marg.) ins अर्धर्चशो वा। एतद्वै छन्दसां पर्व यदर्धर्चश इति चेत्यर्थवादात्।

१०. तृतीयसवने नाराशंससंनिधौ य उपास्यन्ते पिण्डास्त औपासना इति वक्ष्यन्ते। तेभ्यश्चोर्ध्वमृत्विजो व्रतयन्ति।

८.

१. नियमार्थो ऽथशब्दः पूर्वस्याशनस्यानियमं दर्शयितुम्। ऋतुयाजैरिति संज्ञाकरणं संव्यवहारार्थम्। चरन्ति प्रचरन्ति तान्कुर्वन्तीत्यर्थः।

२. होता यक्षदिन्द्रं होत्रादित्येवमादिभिर्ऋतुप्रैषसंज्ञकैरनवानं प्राणसंततेनेत्यर्थः। प्रेष्यति मैत्रावरुणः ऋतुप्रैषेणापि। ननु प्रैषप्रैषार्थयोरेकस्मिन्कर्तरि न्यायविरोधः। उच्यते। स्यादेतद्यदि प्रैषस्यापूर्वार्थभावना[1] स्यात्। अत्र गृहपतिप्रैषे विकारेषूहः। स उच्यते। द्वियजमानके सुगृहपती। बहुयजमानके सुगृहपतयः। द्वियजमानके इमौ सुन्वन्तौ यजमानौ। बहुयजमानके इमे सुन्वन्तो यजमानाः। सुगृहपतिस्त्वमित्यनूह्यमन्यभिधानत्वात्। अनेन सुन्वता यजमानेनास्य द्वित्वबहुत्वयोरूहः। आभ्यां सुन्वद्भ्यां यजमानाभ्यां। एभिः सुन्वद्भिर्यजमानैः। गृहपती यजतं एवं द्वियजमानके। गृहपतयो यजध्वमिति बहुयजमानके। स्यादित्येतस्य स्थाने द्वित्वबहुत्वयोर्भूयास्तां भूयासुरिति। गृहपते यजेत्यस्य स्थाने गृहपती यजतमित्येवमूहो राश्निमरायादिषु। गृहपतयो यजध्वमिति शसस्ती-

---

[1] B भाव A ०भावो न C (orig.) ०पूर्वोप्यभावो न in marg. यभावना।

पिशंङ्गे। सत्रेष्वेकस्यैव गृहपतिव्यपदेशाद्यजमानबहुत्वे ऽपि गृहपतिशब्दो यजमानपदमपि सत्र विक्रियते।

३. अनवानमिति क्रियाविशेषणं पूर्ववत्।

४. येनयेन प्रेष्यति मैत्रावरुणः सासा याज्या। तस्यतस्य प्रैषान्तोक्तस्य इयांस्तु विशेषः। उद्धृत्य होतायक्षच्छब्दं प्रतिप्रैषं यामुक यजामुक यजेति।

५. इन्द्र सोमं पिब ऋतुनेत्येता वा होत्रादिभिर्याज्याः कर्तव्याः। मैधातिथ्यो वेत्यार्षवचनान्नियमतः। त्रयोदशस्याप्यृतुग्रहस्याध्वर्युवशात्प्रयोगे सति मैधातिथ्येव कार्या अविनियुक्ता विनियुक्तानां[1] यातयामत्वदोषात्। प्रैषस्य त्वेकस्य यद्यपि यथादैवतमध्वर्युवशाद्याज्याभ्यासो ऽसंभवादन्यस्य[2]। तदनुसारेण प्रैषान्तश्रुतस्य ऋतुदेवतातुल्यदेवता वृद्धैः कल्पिता एवं लिख्यन्ते। आ त्वा वहन्तु हरय इत्यैन्द्री। इस्कराद्विद्युतस्परीति मारुती। इह त्वष्टारमग्रियमिति त्वाष्ट्री। अग्निं दूतं वृणीमहे इत्याग्नेयी। ऋतेन यावृतावृधाविति मैत्रावरुणी। प्रातर्युजा वि बोधयेत्याश्विनी। द्राविणोदसं प्रैषं नाभ्यस्येत् ऋग्याज्याकल्पस्येदृशीकृतः। कुतः। तल्लिङ्गाया ऋचो ऽसंभवात्। स य इच्छेन्मृत्युं पाप्मानमपहन्यामित्येताभिर्यजेदित्यर्थवादात्। येन प्रेष्यति सा याज्येत्ययमेव पक्षः सर्वस्वारपराकयोः। अग्निष्टुति च प्रैषयाज्याकल्पो ऽनूह्यत्वादृचः।

६. योयो होत्रादिः प्रैषान्ते श्रूयते होतर्यज पोतर्यजेत्येवं सम

---

[1] B क॰र्या अस्या। उक्तानां। [2] C यागाभ्यासो A प्रैषस्य त्वेकस्य यद्यप्यभ्यासः चेत् यथादैवतमध्वर्युवशाद्याज्याभ्यासो ऽसंभवादन्यस्य।

यजतीन्द्र सोममित्याम्नायक्रमेण। प्रशास्तर्यजेति मैत्रावरुणो ब्रह्मन् यजेति ब्राह्मणाच्छंसी।

७. अध्वर्यू यजतमिति प्रैषान्ते होतरेतद्यजेत्यध्वर्युराह। एवमुक्तो होता क्रमप्राप्तां तदीयां याज्यामाह।

८. गृहपते यजेत्येतत्प्रैषान्ते यजमान आह होतरेतद्यजेति। ततो होता यजति।

९. तयोः संबन्धिन्यौ क्रमप्राप्तावित्यर्थः।

१०. येषामध्वर्यूणामसर्वहुतास्तैः सह क्रियायामेवं भवति। तत्र यो यस्य होमकारी स तस्मिन्नुपहवमिष्ट्वा सावनेन भक्षमन्त्रेणावजिघ्रत्योष्ठौ वा निलिम्पति।

११. अन्ते[1] ऽध्वर्यौ प्रतिप्रस्थातरि वोपहवमिष्ट्वा सावनेन मन्त्रेण यथोक्तं भक्षणम्। पुनः[2] प्रतिप्रस्थातर्येवोपहवमिष्ट्वा। एवं द्विरन्ततो होता। अध्वर्युगृहपत्योर्भक्षो मा भूदिति सूत्रारम्भः। वाजिभिः सह क्रियायां पूर्वेषां द्रशानामभक्षणमेव। सर्वहुतत्वात्।

१२. एवो नियोगे[3]। इवशब्दः संप्रत्यर्थे ऽनर्थः। अत्र ऋतुयाजेषु भक्षयितृभिरोष्ठलेपनं[4] वा कर्तव्यमवघ्राणं वा। न पातव्यः सोमः। द्विदेवत्येष्वप्येवमेव। तत्रोक्ते होतुरेव केवलस्य स्यात्। अथर्तुयाजैश्चरन्तीत्यथशब्दस्यास्य चेतिकरणस्यैतत्प्रयोजनम्। कथं नामेतरयोः सवनयोः सर्वमेतत्प्रतिषिध्यते होतृसंबन्धस्य केवलस्य प्रतिषेधो मा भूदिति।

---

[1] C om. [2] A ins. अध्वर्युं प्रष्टुः। [3] A C एषामि॰ B इवो।

[4] B लिम्पनं

६.

१. आज्यमिति वक्ष्यमाणस्य शस्त्रस्य नामधेयम्। तच्छंसिष्यन्पिता मातरिश्वेत्येवमादिकं मन्त्रं जपित्वा ततः शोंसावो३ इत्याहावसंज्ञकः प्लुतान्तः। आयनिगदश्चायं प्रतिसवनं यथा पठितस्तेन प्रतिप्रस्थाचादिष्वपि प्रतिगृणत्सु न विक्रियते। शस्त्रादाविति वचनात्सर्वत्र शस्त्रादावयमौत्सर्गिकः। प्रातःसवनवचनं प्रातःसवनिको ऽयमित्यस्य प्रतिपादनार्थम्। तेनाहूय तेनतेन यो यथाहावाख्यस्तेनतेन प्रतिगरितारमाहूय तत उपांशु तूष्णीं शंसाख्यमग्निर्ज्योतिरित्यादिकं शंसेत्।

२. नियमतो ऽवसानार्थमिह सर्वत्रावसानवचनं। नायमायनिगदः[1]। प्रउगे पुरोरुचाम्नवचनात्। ततश्च विकृतिषु यथार्थमूहः। एवमेतं तूष्णींशंसं शस्त्वा ततः पुरोरुचमनन्तरां पच्छो ऽवस्यन् शंसेत्।

३. अग्निर्देवेद्ध इत्यादिकां पुरोरुचं प्रणवान्तां[2] यथापठितां शंसेत्। विकारेष्वनायनिगदत्वादियमूहितव्या।

४. प्रणवेन प्र वो देवायेत्याज्यसूक्तं संदध्यात्। सूक्तविवृद्धावपि प्रथमस्य सूक्तस्यायं धर्मस्तस्येत्यतिरेकात्।

५. मरुत्वतीयं नाम माध्यन्दिने सवने प्रथमं शस्त्रम्। तथा वैश्वदेवं तृतीयसवने। तयोश्च शस्त्रयोः। न केवलमाज्यस्य प्रथमस्य सूक्तस्य प्रथममर्धर्चं पच्छो ऽनवानं शंसेत्।

६. ऋतावा यस्य रोदसीत्येवमादिकमुत्तमावर्जं सूक्तशेषं शस्त्वा तत आहूय आहावमुक्त्वेत्यर्थः। उत्तमया परिधाय शस्त्रं परिसमा-

---

[1] C नियमाय नि°। [2] C om. प्रणवान्तां and has एतां instead।

प्येत्यर्थः। उक्थवीर्यसंज्ञकं तदङ्गं मन्त्रं[१] जपति भा विभा इत्येवमादिकम्। ननु सूक्तशेषं शस्त्वेत्यतिरिच्यते। सत्यम्। आवापेषु सति सम्भवे सकलसूक्तस्य प्रक्षेप इत्येतत् ज्ञापयितुं सूक्तशेषं शस्त्वेति वचनम्। तथा च श्रुतिहेत्वर्थवादः क्वचित्। तदु ह स्माह कौषीतकिः शंसेदेव सूक्तस्याव्यवच्छेदायेति।

७. शस्त्रयाज्यासम्प्रैषनिमित्तमुक्थशा इत्यध्वर्युराह सर्वासु शस्त्रयाज्यासु। न केवलमत्रैव।

८. अग्न इन्द्रश्च दाशुषो दुरोण इति यजति। तथा श्रवणात्।

१०.

१. यदाज्ये शस्त्रे समाप्ते स्तुवते छन्दोगास्तस्यैवानुशंसनमेतदित्येतदर्थः सूत्रारम्भः। ननु सर्वत्र वाचनिकमाज्यम्। को ऽस्य विषयः। उच्यते। वाचःस्तोमे क्वचित्काल्पनिकेषु शस्त्रेषु[२]। अन्येषां शस्त्राणां पूर्वं स्तोत्रमनन्तरं[३] शस्त्रमस्य तूत्तरं स्तोत्रम्[४]। पवमानस्तोत्राणि[५] प्रउगमरुत्वतीयवैश्वदेवानामेव[६] श्रुतत्वात्।

२. परिभाषासूत्रमेतदिह क्रियते। प्रउगस्य व्यवहितस्तोत्रस्याप्याज्यस्तोत्रेण सामसन्ततिर्यथा[७] स्यात्। स्तोत्रवतां शस्त्राणाम्। न तु सौत्रामणीशस्त्रप्रभृतीनां शाखान्तरदृष्टानां अस्तोत्रवतामयं धर्मः। एषेति प्राह स्तोत्रकारी। तस्यायमर्थः। एषोत्तमा ऋक् शंसतु

---

[१] C (in marg.) निगदं instead of तदङ्गं। [२] C om. शस्त्रेषु। [३] C (orig.) पूर्वमनन्तरं स्तोत्र marg. स्तोत्र and शस्त्र। [४] C om. स्तोत्रम्। [५] B ins. तु। [६] B . [७] C om. साम।

भवानिति। उत्तमात्प्रतीहारादूर्ध्वमिति। प्रतीहारः सामभक्तिविशेषः। स उत्तमत्वेन विशेष्यते। तस्मादूर्ध्वमाहूय प्रतिगरितारं ततः शंसन्ति। आहूयेति वचनादाहावो न शस्त्रम्। तेन तन्मोहे न प्रायश्चित्तम्।

३. प्रउगे वक्ष्यमाणे या अन्तरेण माधुच्छन्दसांस्तृचान्वायवा याहि दर्शतेति वक्ष्यमाणकानृचो व्यवयन्ति व्यवदधतीत्यर्थः। ताः पुरोरुच इत्याचक्षते। प्रसिद्धा हि तासामियं संज्ञेत्यर्थः। प्रउगग्रहणं संज्ञार्थम्। ततश्च शास्त्रे संव्यवहारसिद्धिस्तासाञ्च धर्मः। माधुच्छन्दसानिति प्रउगस्य संज्ञार्थं पूर्ववत्प्रयोजनम्। ऋचो व्यवयन्तीति पुरोरुचामृक्त्ववचनं विकारेष्वनूहार्थम्। पुरोरुक्त्ववचनमृक्च्छायां सामग्रहणार्थं[1] न केवलं संज्ञार्थमेव। श्रुतिप्रसिद्धत्वात्तस्याः।

४. तासां पुरोरुचां पुरस्तात्प्रत्येकमाहावः। संशस्य पुरोरुचा सूक्तं पुरोरुचे पुरोरुच एवाह्वयत इति (१४. ४) श्रुतेः।

५. परिधानीयायाश्च पुरस्तादाहावः कार्यः।

६. विश्वान्देवान्हवामह इत्येषा वैश्वदेवी पुरोरुक्। षट्पदा एव जागते सर्वत्रेऽपि। सा षट्पदा भवतीति नियमश्रुतेः।

७. तस्यां षट्पदायां द्वाभ्यां पादाभ्यामवसाय ततोऽनन्तराभ्यां पुनरवसाय पुनश्च द्वाभ्यां प्रणौति। नात्र गायत्रीशंसनमवसानोपदेशात्। विनांशे चावसानादावृत्तिः। तस्यै द्वेद्वे पदे अवग्राहं शंसतीति (५) श्रुतेः।

८. सारस्वत्यां पुरोरुचि वाचःस्तोमेऽपि विकल्पः। शंसेन्न वा शंसेत्। अशंसनमेवाभीष्टं तेन गुरुसूत्रं कृतम्। तथा च श्रुतिः।

---

[1] A प्रग्रह instead of सामग्र

अथ हैके सारस्वतीं पुरोरुचं शंसति न तथा कुर्यात्। आहावस्तु नित्यः। तदङ्गत्वाद्विकल्पे प्राप्ते वचनम्। एवं च सति नितरां परिधानीयां शंसेदिति (७. २०. १०) निष्केवल्ये। तत्राहावस्यापि तादङ्ग्यात्तद्धर्मता। अङ्गप्रधानयोः संस्कारन्यायता युक्ता। ननु प्रतिवचनमाहावः प्राप्नोति। नेत्युच्यते। तन्त्रं भवत्यभिन्नकालत्वात्। एवं च सङ्ख्योपपत्तिः। षोलशाहावं वैश्वदेवं शंसत्येकविंशत्याहावमाग्निमारुतं शंसतीति।

९. आहूय वायुरग्रेगा इत्यादिकां वायव्यां पुरोरुचं सकृच्छस्त्वा ततो वायवा याहि दर्शतेत्येतासां तिसृणां त्रिः प्रथमां शंसेत्। वायवा याहि दर्शतेत्येतास्तिस्रः शंसेत्तासां च प्रथमां त्रिरिति वाक्यभेदेऽपि सूत्रेषु न दोषः।

१०. आहूय हिरण्यवर्तनी इत्येवमादिकामैन्द्रवायवीं पुरोरुचं शस्त्वा तत इन्द्रवायू इमे सुता इत्येतास्तिस्रः शंसेत्।

११. आहूय काव्ययो राजानेत्येवमादिकां पुरोरुचं शस्त्वा ततो मित्रं हुवे पूतदक्षमित्येतास्तिस्रः शंसेत्।

१२. आहूय दैव्यावध्वर्यू इत्येवमादिकां पुरोरुचं शस्त्वा ततोऽश्विना यज्वरीरिष इत्येतास्तिस्रः शंसेत्।

१३. आहूयेन्द्र उक्थेभिरित्यादिकां पुरोरुचं शस्त्वा तत इन्द्रा याहि चित्रभानो इति तिस्रः शंसेत्।

१४. आहूय विश्वान्देवानित्येवमादिकां पुरोरुचं षट्पदां शस्त्वा तत ओमासश्चर्षणीधृत इत्येतास्तिस्रः शंसेत्[1]।

---

[1] B adds शाखान्तरात्।

१५. आहूय वाचामहमित्येवमादिकां पुरोरुचं पच्छे शस्त्वा ततः पावका नः सरस्वतीति तिसृणामुत्तमया परिधायानन्तरमुक्थवीर्यं वाचं मे जिन्वेत्येवमादिकं जपति। वाचं मे जिन्वेत्येतैः सप्तभिर्वाक्यैः सप्तैव वायव्यादितृचदेवता आशिषः प्रार्थ्यन्ते। तत्र सारस्वततृचाभावेऽपि दशममहादौ[1] सप्तैवाशीर्वाक्यानि कथं नाम स्युरित्येवमर्थमुक्थवीर्यग्रहणम्। अन्वर्थसंज्ञाविज्ञानात्समुदायाङ्गमित्यर्थः।

१६. विश्वेभिः सोम्यं मध्वित्युक्थ्यं शस्त्वा यजतीति (५) श्रुतेः।

११.

१. परिभाषेयम्। स्तोत्रियानुरूपा उच्यमानास्तृचाः प्रत्येतव्याः। किमविशेषेण। नेत्याह। प्रगाथान्परिहाप्य प्रगाथान्वर्जयित्वेत्यर्थः।

२. आ नो मित्रावरुणेति स्तोत्रियः। आ नो गन्तं रिशादसेत्यनुरूपः। वैश्वामित्रौ मैत्रावरुणस्य चाच्छावाकस्य च स्तोत्रियौ भवत इति श्रुतेः।

३. प्र वो मित्राय गायतेति पञ्चर्चमुक्थमुखम्। उक्थमुखवचनादाद्यःस्तोमे ऽस्योर्ध्वमावापः। अहर्गणे तु नैवम्। होत्रकाणां प्रातःसवने कर्मेति कर्मवचनातिरेकात्[2] श्रुतेश्च।

४. प्र मित्रयोर्वरुणयोरित्येतासां नवानामनुवादेन विधिः। उत्तमया परिधाय समाप्य शस्त्रम् उप नः सुतमा गतमिति एतया यजति।

---

[1] all MSS. दशममहादौ। [2] Com. कर्म।

१२.

१. आ याहि सुषुमा हि त इति स्तोत्रियः। आ नो याहि परावत इत्यनुरूपः। ब्राह्मणाच्छंसिन ऋत्विग्विशेषस्य।

२. वास्तोष्पते ध्रुवेत्येव प्रगाथो बार्हतो तृच इति तं परिहाप्य शेषः सूक्तस्य अयमु त्वा विचर्षण इत्यादिकं सप्तकमुक्थमुखं भवति।

३. इन्द्र त्वा वृषभं वयमिति नवर्चमेतत्सूक्तं शंसेत्।

४. उद्घेदभि श्रुतामघमिति तिसृणामनुवादस्वरूपो विधिः। तासामुत्तमया परिधाय समाप्य शस्त्रम्। तत उक्थशा यज सोमानामिति संप्रेषित इन्द्र क्रतुविदं सुतमिति यजति।

१३.

१. क्रमेण पूर्वः स्तोत्रिय उत्तरोऽनुरूपः। आवन्तः स्तोत्रियानुरूपास्त्रयाणामपि होत्रकाणाम्। तथैव श्रुतत्वात्। वैश्वामित्रौ मैत्रावरुणाच्छावाकयोः। एवमेव श्रुतत्वात्।

२. तृच एवोक्थमुखं नवर्चत्वात् सूक्तस्य।

३. अनन्तरमेताः शस्तव्याः।

४. वासिष्ठौ नवर्चौ पर्यासाविति श्रुतेः। इयं वामस्य मन्मन इत्येतासां नवानामुत्तमया परिधायेन्द्राग्नी आ गतं सुतमिति यजति। पूर्ववदुक्थशा यज सोमानामिति संप्रेषितः।

१४.

१. वक्ष्यति। रथन्तरं पृष्ठं निष्केवल्यस्य बृहद्वेति। तत्र रथन्तरे क्रियमाणे रथन्तरपृष्ठो यज्ञः। बृहति क्रियमाणे बृहत्पृष्ठता स्यात्। अतस्तु रथन्तरपृष्ठपक्षे पूर्वोक्त एव शस्त्रन्यासः[1]। बृहत्पृष्ठपक्षे त्वयमुच्यते। मैत्रावरुणादीनां त्रयाणां प्रकृतत्वाद्यथासङ्ख्येन सम्बन्धः। मित्रं वयं हवामह इति मैत्रावरुणस्य स्तोत्रियः। इन्द्रमिद्गाथिनो बृहदिति ब्राह्मणाच्छंसिनः। इन्द्रे अग्ना नमो बृहदित्यच्छावाकस्य। बृहत्पृष्ठस्येति यज्ञविशेषणम्। अर्थः प्रकृतिं निवर्तयतीति पूर्वेषां निवृत्तिः।

२. राथन्तरमिति तद्धितसंबन्धात् पूर्वा रथन्तरपृष्ठपक्षे शस्त्ररचनेति सिद्धम्।

३. अनुरूपं राथन्तरमच्छावाक उक्थमुखं कुरुते। राथन्तरमुत्सृजेत्[2]। स वा एषोऽग्निष्टोम आज्यप्रभृत्याग्निमारुतान्तो यच्छस्त्रं त्रीणि षष्ठिशतान्यृचां सम्पद्यन्त इति (१६.८) श्रुतेः। इन्द्रे अग्नेति च पर्यासमध्ये पुनःशंसनं विनियुक्तस्यापि स्तोत्रियत्वे। वासिष्ठौ नवर्चौ पर्यासाविति श्रुतेः।

४. होत्रका मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकाः स्वशस्त्रेषु सर्वत्र चतुराहावा भवन्तीत्ययमुत्सर्गः।

५. वक्ष्यति। आश्विनादूर्ध्वमतिरिक्तोक्थानि। ऊर्ध्वं षोडशिनोऽतिरिक्तोक्थमित्यादौ। तेष्वतिरिक्तोक्थेषु होता चतुराहावो भवति। चतुराहावशब्दश्चकारेणानुकृष्यते।

---

[1] A न्यायमस्त्रस्य C न्यासः शस्त्रस्य। [2] A ins. उक्थमुखम्।

६. अन्यपदार्थगतो ऽप्याहावशब्दो ऽधिक्रियते दृष्टतो ऽधिकारप्रवृत्तेः[१]। स्तोत्रियानुरूपाभ्यां प्रत्येकमाहावः। चतुराहावा होत्रका इति वचनात्। आहावस्थाननियमार्थं सूत्रम्।

७. अनुरूपादनन्तरो यः प्रगाथः प्रकृतो तस्मादूर्ध्वं पञ्चममाहावस्थानं[२] होत्रकाणां माध्यन्दिने सवने भवति।

८. उक्थमुखादूर्ध्वं पञ्चममाहावस्थानं सर्वेषां होतुश्च होत्रकाणां च रात्रौ। रात्रिपर्यायेष्वित्यर्थः।

९. अन्यत्रापि[३] सवनान्ते ऽन्यत्र वा यदाध्वर्युरेवमाह प्रशास्तः प्रसुहीति तदा मैत्रावरुण ओं सर्पतेति ब्रूयात्।

१०. प्रसूताः सन्तो दक्षिणावृतो दक्षिणेन शरीरभागेन परिवृता इत्यर्थः। अपरया सदोद्वारा निःसर्पन्ति। नानियमेन। कथं तर्हि। उत्तरेणौदुम्बरीसंज्ञां स्थूणाम्। तामेव दक्षिणेन ब्रह्मा निःसर्पेत्। ननु स्वंस्वं धिष्ण्यमुत्तरेण संचरतामुत्तरेणौदुम्बरीं सर्पणं कृतं भवति। किं वचनेन। उच्यते। यजमानसदस्यमैत्रावरुणयावस्तुदर्थम्। यथा न शून्यं सदो भवति तथा सदस्यः प्रसर्पेत्। सर्पत्सु न शून्यं सदः कुर्यादिति तस्य छान्दोग्ये वचनात्। आग्नीध्रस्तु[४] स्वस्मादगाराद्दक्षिणया द्वारा। तथा संभवात्।

११. यथार्थमृत्विजो मूत्रपुरीषादिकरणाय सर्पन्ति।

१२. माध्यन्दिनाय सवनायेति तादर्थ्ये चतुर्थी। ततश्च समस्तोपस्थानप्रभृतिना प्रसर्पणमूर्ध्वं प्रातःसवनादित्येतत्सिद्धं भवति।

---

[१] B [illegible] ।र० ०क्रियत इति C प्रवृत्तेः A ०प्रवृत्तेः। [२] A. ins. सर्वेषाम्। [३] C (by alt.) अत्रापि। [४] B C तस्मा०।

अपरयैव द्वारा प्रसर्पेयुः। यथानिःसृप्तमिति वचनात्। यथासनमुपविशन्तीत्ययमनुवादो दक्षिणधिष्ण्यो इत्यस्य निषेधार्थः।

१५.

१. आदौ माध्यन्दिनस्य सवनस्य राजानमभिषुण्वन्त्यध्वर्यवः। ग्रावस्तुत्कर्मविध्यर्थमेतत्सूत्रम्। ननु राजानमभिषुण्वन्तीत्येतावद्वाच्यम् अन्यत्क्रमप्रकरणाभ्यां सिद्धम्। उच्यते। माध्यन्दिनस्य सवनस्यायमादिरित्येतदपि[1] प्रतिपादयितव्यमेव। कथं नाम। यानि माध्यन्दिनादावुपदिश्यन्ते प्रेङ्खावटखननादीनि तानि प्रागभिषवात्क्रियेरन्निति[2]।

२. ग्रावस्तुदृत्विग्विशेषः। स पूर्वया द्वारा हविर्धानशरणं प्रविश्योत्तरस्य हविर्धानशकटस्य दक्षिणं पादमग्रेण दक्षिणाभिमुखस्तिष्ठन्सोमोपनहनेन वाससा मुखमुत्तमाङ्गं परिवेष्ट्य ग्राव्णां सोममभिषुण्वतां शब्दं श्रुत्वा संप्रैषनिरपेक्षः प्रणवेनासंदधत्[3] प्रत्यर्धर्चमुच्छ्वसन्ननवानं[4] वा वक्ष्यमाणमनुवचनं पठति।

३. प्रतीकोक्ताः पञ्चैता ऋचो ऽभिष्टौति। शाखान्तरश्रुतेः।

४. आ प्यायस्व समेतु ते। आ प्यायस्व मदिन्तम। सं ते पयांसि समु यन्तु वाजा इत्याप्यायितवत्यः। एतासां तिसृणां प्रथमामभिष्टुत्य ततः प्रैते वदन्तु प्र वयं वदामेत्यर्बुदार्पस्य सूक्तस्य द्वे अभिष्टौति। देवा वा अर्बुदेन च पावमानीभिश्च ग्राव्णो ऽभिष्टुत्याप्नुवन्नमृतत्वमिति श्रुतेः[5]। अर्बुदग्रहणं व्यवहारार्थम्।

---

[1] C (cf. n. 2) स्थ (instead of स्या) in सवनस्याय°। [2] C न क्रियेरन्।
[3] C प्रणवेन सासंदधतत (see h.) त्। [4] C om प्रति। [5] C ऽभिष्टुत्येति श्रुतेः।

५. द्वितीयामाप्यायितवतीनामा प्यायस्व मदिन्तमेत्येतामाप्यायितवतीमभिष्टुत्यार्बुदस्य द्वे। एते वदन्त्यविदन्नना मध्वित्येतामभिष्टुत्य ततः सुपर्णा वाचमक्रतोप द्यवीत्येतामभिष्टुयात्।

६. तृतीयामाप्यायितवतीनां सं ते पयांसीत्येतामभिष्टुत्य ततो ऽर्बुदस्यैकां उग्रा इव प्रवहन्तः समायमुरित्येतामभिष्टुयात्।

७. तुल्यप्रतीकत्वे प्राथम्येन व्यवस्था। सृष्टवतीरिति संज्ञा। कथं नामाधवनक्रियाकाले स्युः।

८. अत्रापि पूर्ववत्संज्ञाकरणप्रयोजनम्।

९. आ प्यायस्व समेतु त इत्येतत्प्रभृति कलशवत्यन्त एवं विहृतः पूर्ववदाप्यायितवत्यर्बुदव्यस्तो द्वितीयो ऽपि सवः। अपिशब्दात् प्रथमो ऽपि कलशवत्यन्तः सवसंज्ञ एव। इयांस्तु विशेषः। षष्ठीप्रभृतयः पञ्चार्बुदस्य पूर्ववद्विहर्तव्याः।

१०. [1]आप्यायितवतीप्रभृत्येकादशीप्रभृतयस्तिस्रो ऽर्बुदस्य विहर्तव्याः। तत्र यथासंभवमेकैकां विहरेदयमपि तृतीयः सवः। संज्ञाकरणं शास्त्रसंव्यवहारार्थम्।

११. यस्मिन्सवे ऽभिषोतारो दृहच्छब्दं कुर्युर्दृहद्वदन्ति मदिरेण मन्दिनेति तत्रोत्कर्षेत्। अथ यत्र दृहद्दृहदिति दृहद्वदन्ति मदिरेण मन्दिनेति तत्रेति (२९. १) श्रुतेः।

१२. प्रथमे सवे षष्ठीमपकर्षेत्।

१३. पवित्रमूर्णामयं सोमगलनार्थमुद्गातारो वितन्वन्ति। तस्मिन्वितते स॰ पवित्रं ते विततं ब्रह्मणस्पत इति द्वे अभिष्टुयात्।

---

[1] C in marg. त्रिशो।

१४. वितत एव पवित्रे वि यत्पवित्रं धिषणा अतन्वतेत्येका पठितव्या ।

१५. मास्य धारा अक्षरन्प्र धारा अस्य शुष्मिणः । प्र ते धारा असृग्रत इति प्राथम्यात् । एतास्तिस्रः प्र क्षरन्तीषु धारासु पठेत् । धारास्विति बहुवचनमविवक्षितम् । कालोपलक्षणत्वात् ।

१६. पावमानीनां मध्ये याः कामयेत ता अभिष्टुयात् । धाराग्रहेषु गृह्यमाणेष्वध्वर्युभिः । अवचने प्रथमा एव स्युः । प्रथमं वा नियम्येति न्यायदर्शनात् । तुल्ये ऽपि पावमानीत्वे सौम्य एव स्युः प्रकरणात् । न तु मृष्टवत्याद्याः । विनियुक्तत्वात् । सूत्रकारानुप्रस्थानादनुष्टुभो[1] युक्ताः । तथा हि दशमे ऽहनि मृजानो वारे पवमानो अव्यय इति ग्रावस्तुतो याथाकाम्यमित्येतदुपपन्नं भवति । तथा च तत्त्वाभि नो वाजसातममित्येता अनुष्टुभः प्राथम्यात्प्रकृतौ प्रसिद्धाः ।

१७. याथाकाम्यनिवृत्त्यर्थं यमेर्बन्धनार्थस्य प्रयोगः ।

१८. उत्तमे ग्रहे गृहीत इति कालविधिः । अर्बुदस्योत्तमया परिधायेति नियमः । आदायोष्णीषमुत्सृज्य इत्युष्णीषादानविधिः । वाग्यमादिनियमकर्मणश्चोत्सर्गः[2] ।

१९. प्रत्यंहमुष्णीषादानापवादः । अन्य एवाहन्युष्णीषमादद्यात्तुशब्दात्[3] ।

---

[1] C (in marg.) सूत्रकारात्प्रथमाद् । [2] A ॰नियमात् । [3] I beg to state that the words from मध्ये॰ to ऽहनि constitute one Sutra and the words from अर्बुद another. I have in the edition of the text erroneously taken them together.

२०. प्रैते वदन्तु प्र वयं वदामेत्यर्बुदः। तथैवार्षानुक्रमणीदर्शनात्काद्रवेयो ऽर्बुदः प्रैत इति। तमर्बुदं शुद्धमविहृतं वाभिष्टुयात्। पूर्वोक्तेन विहारेण सह विकल्पः। स च यदाध्वर्यवो निग्राभ्यासेचनं पूर्वं कुर्वन्ति त्रिष्वपि सवनेषु तदाप्यायितवत्यः पूर्वं ततो ऽर्बुदः सकलस्ततो सृष्टवत्यः कलशवत्य इति। देवा वा अर्बुदेन च पावमानीभिश्चेत्यविशेषश्रवणात्।

१६.

१. माध्यन्दिनः पवमानः छन्दोगानां प्रसिद्धः। तेन स्तवने कृते दधिघर्माख्येन हविषा चरन्ति अध्वर्यवः यदि प्रवर्ग्यवान्यज्ञः।

२. होतर्वदस्व यत्ते वाद्यमित्यध्वर्युणा संप्रेषित उत्तिष्ठतावपश्यतेत्येतामभिष्टौति।

३. श्रातं हविरित्येवमध्वर्युणोक्ते द्वितीयां सूक्तस्य श्रातं हविरो ष्विन्द्र पाहीत्येताम्। अभिष्टौतीत्यनुषज्यते। प्रथमामभिष्टौति द्वितीयां सूक्तस्येति सूक्तग्रहणातिरेकात्प्रथमाग्रहणातिरेकाच्च सर्वस्वारादिष्वप्येता एव नियमतो भवन्ति।

४. दधिघर्मस्य यजेत्येवमध्वर्युणोक्तस्तृतीयया श्रातं मन्य ऊधनीत्येतया यजति।

५. अनवानमर्धर्चान्ते ऽनुच्छ्वसन्नेकैकां सप्रणवामिति प्रत्यृचं प्रणवेनावस्यन्नभिष्टौति।

६. ध्ये ऽनवस्यन्नेव[1]।

---

[1] n marg.) सानन्नेव instead of ॰वस्यन्नेव।

७. तथा यजतीत्यस्यानन्तरमनुवषट्कारस्य वचनमायनिगदप्रतिषेधार्थम् ।

८. वषट्कारानुवषट्काराभ्यां हुतस्य दधिघर्मद्रव्यशेषस्य मयि त्यदिन्द्रियं बृहदित्यादिको भक्षमन्त्रः ।

९. सवनीयपशोर्वपान्तं प्रातःसवने हुतम् । अथेदानीं पशुपुरोळाशेन स्विष्टकृदिळेन[1] चरित्वा अनन्तरं पुरोळाशैः सवनीयैर्दधिधानादिभिश्चरन्ति ।

१७.

१. माध्यन्दिनस्य सवनस्य धाना इति सवनीयपुरोळाशानां पुरोनुवाक्या । प्रैष उक्तो याज्या च[2] ।

२. माध्यन्दिने सवने जातवेद इत्येषा सवनीयहविःस्विष्टकृतः पुरोनुवाक्या भवति । उक्ता याज्या प्रातःसवने प्रैषश्च ।

३. असावि देवं गोऋजीकमन्ध इत्येवमादिकमुन्नीयमानसूक्तं भवति । नामधेयं प्राकृतनिवृत्त्यर्थम् । वासिष्ठीर्मध्यन्दिन उन्नीयमानेभ्योऽन्वाह ता वै दशान्वाहेति (२९.२) श्रुतेः ।

४. होता॰ यक्षदिन्द्रं माध्यन्दिनस्य सवनस्येत्येवमादिकः प्रैषो भवति । सुन्वतो यजमानस्येत्यनयोः पदयोर्विकृतौ यथार्थमूहः । द्वियजमानके सुन्वतोर्यजमानयोः । बहुयजमानके सुन्वतां यजमानानामिति ।

---

[1] A C (orig) सस्विष्ट॰ । [2] C (in marg) प्रातःसवने ।

५. पिबा सोममभि यमुग्र तर्द इति होता यजति ।

६. पिबा सोममित्यस्यैव सूक्तस्य द्वितीया मैत्रावरुणस्य याज्या भवति ।

७. अस्यैव सूक्तस्य ।

८. अर्वाङेहि सोमकामं त्वाहुरिति पोता यजति ।

९. तवायं सोमस्त्वमेह्यर्वाङिति नेष्टुः प्रस्थितयाज्या भवति ।

१०. इन्द्राय सोमा इत्येवमादिकाच्छावाकस्य प्रस्थितयाज्या ।

११. आपूर्णो अस्य कलशः स्वाहेत्याग्नीध्रस्य प्रस्थितयाज्या ।

१२. प्रातःसवनापेक्षमुत्तरत्वम् ।

१३. उत्तरयोः सवनयोरित्येतत्प्रकृतमेव ।

१४. होतृचमसप्रतीक्षणं स भद्रमकर्यो नः सोमं पाययिष्यतीत्येवमादिकं यदिह नोक्तं तत्समानं तुल्यं प्रातःसवनेन द्रष्टव्यम् ।

१५. क्रमार्थो ऽनुवादः ।

१६. अस्मिन्काले प्रस्थितभक्षानन्तरं दक्षिणा दातव्या । सूत्रारम्भप्रयोजनं बृहस्पतिसवे त्रिष्वपि सवनेष्वेव दक्षिणाकालः ।

१७. द्वादश अधिका यस्मिञ्छते तत् द्वादशं शतम् । गवामिति न्यायप्राप्तस्य सङ्ख्येयस्य सूत्रणं सुखप्रतिपत्त्यर्थम् ।

१८. वसन्तेवसन्ते ज्योतिषा यजेतेति नित्यत्वात् आवश्यकर्तव्यतायामसम्भवे च द्वादशशतस्य यथोपपादं यथासम्भवमेकविंशतिप्रभृति वेति विकल्पः ।

१८.

१. अग्नये त्वेत्येवमादिना मन्त्रेण हिरण्यं प्रतिगृह्णाति। ननु गोदानाधिकारे हिरण्यं प्रतिगृह्णातीति किमर्थमुच्यते। असंयुज्य विधीयमानं साधारणमिति कथं नाम स्यात्। इहैव मा भूदिति ननु दातात्र नोपात्तो[1] नापि प्रतिग्रहीतारः। आह। न्यायादन्यापरेभ्यश्च वचनेभ्य एव सिद्धम्। यजमानो दाता प्रतिग्रहीतारश्चर्त्विज इति। प्रतिविभज्य दानम्। पत्नी च ददाति विशिष्टेन क्रमेणेत्येतच्छाखान्तरात्।

२. रुद्राय त्वेत्येवमादिना मन्त्रेण गाः प्रतिगृह्णाति। होता च कुर्यादनादिष्टमित्येतदत्र नाश्रीयते। गवाधिकारे हिरण्यप्रतिग्रहमन्त्रपाठात्।

३. बृहस्पतय इत्येवमादिना मन्त्रेण वासः प्रतिगृह्णाति।

४. यमाय त्वेत्येवमादिना मन्त्रेणैकशफं प्रतिगृह्णाति। एकशफमित्यश्वो ऽश्वतरो गर्दभ इति प्रसिद्धः।

५. अन्यन्मन्थौदनतिलमाषादिकं प्रजापतय इत्येवमादिना मन्त्रेण प्रतिगृह्णाति।

६. ओमित्यनेन वा मन्त्रेण सर्वं प्रतिगृह्णाति। वा पूर्वैरग्नये त्वेत्येवमादिकैर्मन्त्रैः[2]।

७. को ऽदादित्येवमादिकेन मन्त्रेणानुमन्त्रयते यत्प्राणि[3]।

८. को ऽदादित्येवमादिना मन्त्रेणोपस्पृशेदितरदप्राणि।

---

[1] C (in marg) प्राप्तो। [2] C in marg विकल्पार्थम्। [3] C (in marg) द्रव्यम्।

९. अस्मद्राता इत्येवमादिकं मन्त्रं यजमानो जपति। पत्नी चाविशेषाद्दक्षिणां दत्त्वा। दातारमित्यस्य विकारे ऽप्यनूहः स्वात्मनिर्देशात्।

१९.

१. इन्द्राय मरुत्वते ऽनुब्रूहीत्यध्वर्युणा संप्रेषितो मरुत्वतीयग्रहयागार्थम्[1]। तस्य कथं प्रदानं भवतीत्यत आह।

२. इन्द्र मरुत्व इह पाहि सोममिति पुरोनुवाक्या भवति।

३. होता यक्षदिन्द्रं मरुत्वन्तमित्यादिकः प्रैषो भवति।

४. सजोषा इन्द्र सगणो मरुद्भिरित्यनया यजति। एवमयं सप्रैषप्रदानः।

५. केषांचिदध्वर्यूणामत्र ग्रहान्तरस्यानुहोमो ऽस्ति। तच्छेषभक्षनिवृत्त्यर्थं तमिति निर्देशः। भक्षयित्वेति क्त्वाप्रत्ययः क्रमार्थः। मरुत्वतीयमिति संज्ञानिर्देशः[2] शास्त्रसंव्यवहारार्थः।

६. अध्वर्यो शोंसावो३ इत्येवमाहावः शस्त्रप्रारम्भे सर्वत्र [3]प्रायश्चित्तार्थेष्वपि शस्त्रेषु माध्यन्दिने सवने।

७. प्रातःसवने भवः प्रातःसवनिकः[4]शोंसावो३ इति य उक्तः स माध्यन्दिने सवने शस्त्रमध्ये भवति।

८. आ त्वा रथं यथोतय इत्येवमादिकं तृचं शस्त्वाहूय। प्रातिपदमिति शस्त्रप्रारम्भणमित्यर्थः। संज्ञाकरणं शास्त्रसंव्यवहारार्थम्।

---

[1] [illegible]। [2] C ०तीयमिति संज्ञार्थं निर्द०। [3] B सर्वप्रा०। [4] C om. प्रातःसवनीकः।

९. अनुचरमिति संज्ञाकरणं शास्त्रसंव्यवहारार्थम्।

१०. इन्द्रमिद्धवं प्रगाथमिति संज्ञानिर्देशः स्वशास्त्रोपयोगी।

११. ब्राह्मणस्पत्यमिति संज्ञाकरणमुक्तार्थम्।

१२. अग्निर्नेता भग इव क्षितीनामित्येकां शस्त्वाहूय। एकावचनं तृचनिवृत्त्यर्थं एकपातिनीसंज्ञार्थं चोत्तरयोरपि।

१३. त्वं सोम क्रतुभिः सुक्रतुर्भूरित्येताम्।

१४. पिन्वन्त्यपो मरुतः सुदानव इति।

१५. जनिष्ठा उग्रः सहसे तुरायेत्यस्य सूक्तस्य षळृचं शस्त्वाहूय निविदं शंसेत्। षट् शस्त्वेत्यनुवाद आहावविधानार्थः। निविदं वक्ष्यति। प्रथमा निविन्मरुत्वतीयस्येति।

१६. अस्मिन्सूक्ते मदामदा मोदैवेति प्रथमः प्रतिगरो भवति। तस्य प्रथमायामध्वर्युः सकृन्मदन्त्यागृणातीति (१६. २) श्रुतेः। होतृप्रत्ययः प्रतिगर इति कथितः।

१७. विषमर्चानां सूक्तानामेकयाभ्यधिका[1] अर्धाः शस्त्वा निविदं दध्यात्।

१८. समसङ्ख्याका ऋचो येषां सूक्तानां तानि समर्चानि। तेषां मध्ये निविदं दध्यात्।

१९. तृचानां निविद्धानानामेकां शस्त्वा निविदं दध्यात्।

२०. यदा सूक्तविवृद्धिः पञ्च सूक्तानि मरुत्वतीये शस्यन्त इत्येवमादिका भवति तदान्त्ये सूक्ते निविदं दध्यात् यथोक्तेन प्रकारेण।

२१. तुशब्दः सूक्तविवृद्धावित्यस्यानुकर्षणार्थः।

---

[1] C °भ्यधिकानां; in marg. विषमसंख्याका ऋचो येषां तेषां।

२२. तृतीयसवने यानि सूक्तानि निविद्धानानि तेषामुत्तमाः परिशिष्य निविदो दध्यात्। एकैकां[1] सूक्तस्यसूक्तस्योत्तमामित्यर्थः।

२३. वियतं विलम्बितं पच्छः पदंपदमवखण्डानेन[2] धर्मेण निविदः शंसति।

२४. उत्तमे निवित्पदे प्रणवः कार्यः।

२५. अष्टौ सूत्राणि परिभाषारूपाण्युक्तानि। अथेदानीं क्रमप्राप्तमुच्यते। जनिष्ठाउग्रीयस्य षष्ठीं यः शेषस्तमुत्तमावर्जं शस्त्वा तत आहूयोत्तमया परिधाय परिसमाप्य शस्त्रम्।

२६. उक्थवीर्यं रूपमनुरूपमित्येवमादिकं जपित्वा ये त्वाहिहत्ये मघवन्नवर्धन्निति जपति।

२०.

१. रथन्तरमिति साम्नो नामधेयम्। तन्निष्केवल्यस्य शस्त्रस्य स्तोत्रं भवति। आरम्भप्रयोजनं योन्यनुशंसनम्।

२. बृहद्वा पृष्ठं निष्केवल्यस्य स्तोत्रं भवति।

३. अभि त्वा शूर नोनुमः। अभि त्वा पूर्वपीतय इति स्तोत्रियानुरूपौ यथासङ्ख्येन। प्रथमः स्तोत्रियो द्वितीयोऽनुरूप इति। रथन्तरस्येत्यनुशंसनसंबन्धेन षष्ठी।

४. स्तोत्रियानुरूपौ प्रगाथाविति वर्तते। प्रगाथग्रहणं सर्वत्र धर्मविशेषप्रतिपादनार्थम्।

---

[1] [illegible]। [2] C (in marg.) पद पाठेन instead of [illegible]।

५. यद्वावान पुरुतमं पुराषाळिति धाय्या। असंयोगविहितत्वादुभयत्र। धाय्येति संज्ञा शास्त्रसंव्यवहारार्था।

६. इह प्रगाथग्रहणं दृढार्थम्।

७. उभयं शृणवच्च न इति बृहत्पक्षे बृहत्साम्नः प्रगाथो भवति।

८. इन्द्रस्य नु वीर्याणि प्र वोचमित्येतत्सूक्तं रथन्तरपृष्ठे सति भवति।

९. तमु ष्टुहि यो अभिभूत्योजा इति बृहत्पृष्ठे सति सूक्तं भवति।

१०. नीचैस्तरामित्यर्थः।

११. सूक्तस्याष्टादृचः अस्त्विन्द्रो देवः सोमं पिबत्वित्यादिका निविद्भवति। द्वितीया निष्केवल्यस्येति वचनात्। तस्याश्च निविदो ऽनन्तरमाम्नायपाठे सजाग्मीत्येवमादिकं तदिह जपत्वेन चोदितम्[1]।

१२. पिबा सोममिन्द्र मन्दतु त्वेत्यादिकया विराजा यजति।

२१.

१. उभे बृहद्रथन्तरे सामनी यस्य स उभयसामा सोमः। स एव केनचित्प्रत्यक्षादिना विशेषेण रथन्तरपृष्ठो बृहत्पृष्ठो वाभिधीयते। तत्र तावद्रथन्तरपृष्ठे यो विशेषः स उच्यते।

२. यः सूक्तात्पूर्वः प्रगाथ उक्तः पिबा सुतस्य रसिन इत्येवमादिस्तमपनीय तस्मिन्नेव स्थाने बृहतो योनिं शंसति। त्वामिद्धि हवामह इति यदध्यूढं साम गीयते[2] सा तस्य साम्नो योनिरित्युच्यते।

---

[1] B C जपितेन चोदि॰ C (in marg.) जपित्वानुचो॰। [2] C (in marg.) यदिदं instead of यदध्यूढं and गीतं यथा instead of गीयते।

३. क्वचित्प्रदेशविशेषे बृहति गीयमाने बृहत्पृष्ठः सोम इत्युच्यते। तत्र बृहत्पृष्ठे यः सूक्तात्पूर्वः प्रगाथ उभयं शृणवच्च न इत्येवमादिकस्तमुद्धृत्याभि त्वा शूर नोनुम इत्येवमादिकां रथन्तरस्य योनिं शंसति।

४. यदेतद्योन्यनुशंसनमुक्तमेतदुत्तरासु संस्थासु। प्राकृतामग्निष्टोमसंस्थां मुक्त्वा। अन्यासु सामप्रगाथादूर्ध्वं भवति। सामप्रगाथो नोत्सृज्यत इत्यर्थः।

५. यदेतदुक्तं सामप्रगाथमुद्धृत्यानुद्धृत्य वा रथन्तरादेः शंसनमेतद्योन्यनुशंसनमित्याचक्षते याज्ञिकाः।

६. बृहद्रथन्तरयोरेव योनिमनुशंसेन्नान्यत्रेत्येवमाह कौषीतकिः। कौषीतकिग्रहणं विकल्पार्थम्। इति ह स्माहेत्यतिरिक्तवचनादयमेवाभीष्टः पक्षः सूत्रकारस्य इति ज्ञायते। तथा च श्रुतिः यत्र तु क्व चैते सामनी इत्यारभ्याम्नातैव।

७. परिमितं शस्यमस्मिन्प्राकृते ऽग्निष्टोमे। सो ऽयमेवंरूपः। प्रगाथे शस्यमाने योन्यां चातिरिच्यते। तस्मात्प्रगाथमुद्धरति। परिमितशस्यता श्रौता। स वा एषो ऽग्निष्टोम आज्यप्रभृत्याग्निमारुतान्तो यच्छस्यं त्रीणि षष्टिशतान्यृचां संपद्यत इति (कौ० ब्र० १६. ९)। सा न शक्यते बाधितुम्। तस्मात्प्रगाथमुद्धरति।

८. तादर्थ्याय चतुर्थ्या निर्देशादाहावेन सहावृत्तिर्नाशे सिद्धा भवति।

९. प्रकरणान्निष्केवल्यनिविदि शस्तायां होत्रे वरो देयः। स चाश्वः श्रेष्ठः। वरो वा। गौरित्यर्थः।

२२.

१. वामदेव्याख्यं साम मैत्रावरुणशस्त्रस्य स्तोत्रं भवति।

२. कया नश्चित्र आ भुवदिति स्तोत्रियः। कया त्वं न ऊत्येत्यनुरूपः।

३. कस्तमिन्द्र त्वावसुमिति साम्नः प्रगाथो भवति।

४. सद्यो ह जातो वृषभः कनीन इत्येतत्सूक्तं सामप्रगाथादनन्तरमाहूय शंसेत्।

५. द्वितीयमेतत्सूक्तं मैत्रावरुणस्य।

६. उग्रन्नु षु णः सुमना उपाके याज्यामेतां करोति।

२३.

१. नौधसमिति साम। तद्ब्राह्मणाच्छंसिनः शस्त्रस्य रथन्तरपृष्ठे सोमे सति स्तोत्रं भवति।

२. बृहत्पृष्ठे सोमे श्यैतं साम ब्राह्मणाच्छंसिनः स्तोत्रं भवति। तत्संबन्धेन शस्त्रव्यवहारार्थं छान्दोग्यमप्युक्तम्।

३. तं वो दस्ममृतीषहम्। तत्त्वा यामि सुवीर्यमित्येतौ प्रगाथौ स्तोत्रियानुरूपौ प्रथमधर्मविशिष्टौ नौधसस्य साम्नो भवतः।

४. अभि प्र वः सुराधसम् : प्र सु श्रुतं सुराधसमित्येतौ स्तोत्रियानुरूपौ प्रथमधर्मविशिष्टौ श्यैतस्य साम्नो भवतः।

५. उभयोः श्यैतनौधसयोरसंयोगविधानात्।

६. इन्द्रः पूर्भिदातिरद्दासमर्कैरित्येतत्सूक्तं नौधसे साम्नि सति भवति।

७. असावि सोमः पुरुहूत तुभ्यमित्येतत्सूक्तं श्येते साम्नि सति भवति।

८. उदु ब्रह्माण्यैरत श्रवस्येत्येतत्सूक्तं समानम्। सामान्तरेष्वपि वचनादृते नोद्धर्तव्यमित्यभिप्रायः[1]।

९. सजोषी वज्री वृषभस्तुराषाळित्येतया यजति।

२४.

१. कालेयाख्यं सामाच्छावाकशस्त्रस्य स्तोत्रं भवति। तस्मिन्सति शस्त्रमुच्यते।

२. तरोभिर्वो विदद्वसुम्। तरणिरित्सिषासतीति स्तोत्रियानुरूपौ प्रग्रथनधर्मविशिष्टौ।

३. उदिन्वस्येत्येवमादिको तृचः सामप्रगाथः कार्यः।

४. भूय इद्वावृधे वीर्यायेत्येतत्सूक्तं शंसेत्।

५. इमामू षु प्रभृतिं सातये धा इत्येतत् द्वितीयं सूक्तं शंसेत्।

६. पिबा वर्धस्व तव घा सुतास इत्येतया यजति।

२५.

१. इत उत्तरं यदच्छावाकशस्त्रेषु भवतीति वेदितव्यम्।

२. प्रायेण बाहुल्येन अयथासमाम्नातं यदृग्जातं भवति तदुच्यते।

---

[1] B नोद्धर्तव्य०।

३. बृहती षट्त्रिंशदक्षरा सा पूर्वाम्नायक्रमेण। ककुब्वाम्नायक्रमेण पूर्वस्या मध्यमेन द्वादशाक्षरेणाष्टाविंशत्यक्षरा। सतोबृहत्युत्तरा। सतोबृहती चत्वारिंशदक्षरा। यस्याः प्रथमतृतीयौ द्वादशाक्षरौ द्वितीयचतुर्थावष्टाक्षरौ सा चेद्बृहत्याः ककुभो वाम्नायक्रमेणोत्तरा तमेवंरूपं द्वृचं प्रगाथ इत्याचक्षते याज्ञिका नान्यम्।

४. बार्हतः प्रगाथ इत्युच्यते। बृहत्यां पूर्वस्यां सत्याम्। पुरस्ताद्बृहत्यादिविकाररूपायामपि सतोबृहत्यामुत्तरस्यामिति स्थितम्।

५. काकुभः प्रगाथो भवति ककुभि पूर्वस्यां सतोबृहत्यां तूत्तरस्यां विपरीतादिविकृतायामपि।

६. बृहतीं सकलां शस्त्वा तस्या एवोत्तमं पादं प्रत्यादाय पुनः शस्त्वेत्यर्थः।

७. उत्तरस्या ऋचः प्रथमेन पादेन सह संधानं कृत्वावसाय।

८. उत्तरस्या इति वर्तते। उत्तरस्या द्वितीयेन पादेन प्रणवं कृत्वा।

९. तं द्वितीयं पादं प्रत्यादाय तृतीयेनावसाय।

१०. द्वितीयस्या उत्तमेन प्रणौति।

११. द्वे तिस्रः करोतीति[1] यास्तिस्र उक्तास्ता एवं भवन्ति। बृहती पूर्वा भवति। सोपपदा निरुपपदा वा[2]। उत्तरे ककुभौ भवतः। एवं तिस्रो भवन्ति।

१२. उक्तः प्रग्रथनधर्मः। एष बृहद्रथन्तरयोः प्रगाथस्तयोरनुशंसने भवति।

---

[1] I abc II cde III efg. [2] C च instead of वा।

१३. होत्रकाणामप्येष एव स्तोत्रियानुरूपयोः प्रग्रथनधर्मो भवति यत्रैते बृहद्रथन्तरे पृष्ठे प्रगाथस्थे प्रगाथारूढे भवतः। यत्र पुनरप्रगाथारूढे बृहद्रथन्तरे तत्र नायं होतुर्धर्मो न होत्रकाणाम्। ननु मैत्रावरुणस्य गायत्रौ स्तोत्रियानुरूपौ तत्र प्रगाथाभावाद्धोत्रकाणामिति बहुवचनं न युज्यते। उच्यते। पूर्वकारिवशात्क्वचित्प्रग्रथनक्रियात्रापि भवत्येव। तदर्थं बहुवचनं होत्रकाणामिति। होतुर्बृहद्रथन्तरे पृष्ठे प्रगाथस्थे होत्रकाणामपि प्रग्रथनकारणे भवतो वचनात्।

१४. सर्वत्र पृष्ठनिरपेक्षो यज्ञायज्ञीयस्यायं ककुप्कारधर्मः।

१५. इन्द्रनिहवसंज्ञकस्य ब्राह्मणस्पत्यसंज्ञकानां च सर्वत्रायं ककुप्कारधर्मः।

१६. अत उक्तेभ्यो ऽन्यत्र बार्हतानां प्रगाथानां धर्म उच्यते।

१७. बृहतीं सकृच्छस्त्वा[1] उत्तमं पादं द्विः प्रत्यादायान्ते ऽवसाय।

१८. उत्तरस्या ऋचो ऽर्धर्चान्ते प्रणवं कृत्वा।

१९. यस्मिन्प्रणवः कृतस्तमेव द्वितीयं पादं द्विः प्रत्यादाय तदन्ते ऽवसायोत्तमेन प्रगाथस्यार्धर्चेन प्रणौति।

२०. एवं क्रियमाणा भवन्तीत्यर्थः।

२१. काकुभे प्रगाथे धर्मविशेष उच्यते। ककुभं शस्त्वा तस्या एवोत्तमं पादं प्रत्यादत्ते। तमादाय सतोबृहत्याः प्रथमेन पादेनावसाय द्वितीयेन प्रणौति।

---

[1] C (in marg.) तस्या एव।

२२. प्रत्यादत्त इति वर्तते। सतोबृहत्या द्वितीयं प्रत्यादत्ते। तं प्रत्यादाय तृतीयेनावसायोत्तमेन प्रणौति।

२३. एवं क्रियमाणाः काकुभाः प्रगाथास्तिस्रः ककुभो भवन्ति।

२४. स्तोत्रियत्वात्कारणादनुरूपत्वाद्वा एतमुक्तं प्रग्रथनधर्मं प्रगाथा लभन्ते। न तु पुनः प्रगाथत्वेनैव कारणेन। ततः सामान्तरुक्थ्ये योन्यनुशंसनादौ च न प्रग्रथनम्।

२६.

१. इन्द्र नेदीय एदिहीत्ययमिन्द्रनिहवः प्रगाथः। स्तोत्रियत्वं विनापि प्रग्रथनधर्मं लभते।

२. स्तोत्रियानुरूपत्वरहिता अपि प्र नूनं ब्रह्मणस्पतिरुत्तिष्ठ ब्रह्मणस्पते प्रैतु ब्रह्मणस्पतिरित्येते ब्राह्मणस्पत्याः ककुप्कारधर्माः।

३. द्वाभ्यांद्वाभ्यां पादाभ्यामवसायावसाय पञ्चमेन प्रणवः। इति पङ्क्तीनां शस्यधर्मः।

४. एतासां यथोपदिष्टानां पच्छःशंसनं शस्यधर्मः। अक्षरपङ्क्त्योः[१] निर्ज्ञातस्वरूपा द्विपदाश्च। ततस्तयोरसमासनिर्देशः। त्रिष्टुब्जगत्योस्तु छन्दोविचित्यामनेकविकारक्रियाविशिष्टयोर्लक्षणपाठात् तदीयविकारोपसंग्रहार्थः समासनिर्देशः। न तु षट्पदानां यज्ञान्तरात्। अतिजगत्योऽपि जगत्य एव। प्रकृतत्वे शस्त्रस्य तुल्यन्यायत्वात्।

---

[१] C (in marg.) विज्ञा।

५. पूर्वसूत्रोक्तानां द्वितीयपादश्चतुर्थपादश्च सप्रणवो भवति। चतुर्थवचनं पञ्चपदानां त्रिष्टुब्जगतीनां द्वितीयचतुर्थान्तेषु प्रणवक्रियार्थम्। यस्तु पञ्चपदानां शस्यविधिर्वक्ष्यते स त्रैष्टुभे प्राये जागते वेति[1]। विशिष्टत्रैष्टुभजागतप्रायादन्यत्र यास्ता उच्यन्ते। स भ्रातरं वरुणमग्न आ ववृत्स्व। एवेन्द्राग्निभ्यामहावि हव्यम्। आ यः पप्रौ भानुना रोदसी उभे। विश्वासां गृहपतिर्विशामसि। त्वेषं[2] शर्धो न मारुतं तुविष्वणिः। समिन्द्रेरय गामनड्वाहम्। युवं ह्यसराजावसीदतमिति। अथ पङ्क्तयः। बृहद्भिरग्ने अर्चिभिः। सद्यश्चिद्यस्य चर्कृतिः। नमोवाके प्रस्थिते अध्वरे नरा। षष्टिं सहस्राश्वस्यायुतासनमिति। ननु त्रिष्टुभ एता न पङ्क्तयः। कुतः। चत्वारोऽष्टाक्षराः पादा एकश्च द्वादशाक्षर इति त्रिष्टुबधिकारे विधानात्। उच्यते। सत्यम्। किं तु छन्दोऽनुक्रमण्यां षष्टिं सहस्राश्वस्यायुतासनमित्येतस्याः पङ्क्तिवचनात्। अथैकविंशी द्वाविंशी चतुर्विंशी च पङ्क्तय इति। तस्मात्पङ्क्तिशंसनमेतासां [3]शस्यम्। तव त्यं नर्यं नृतोप इन्द्रेत्यतिच्छन्दाः। अग्ने तमद्येत्येताश्चतस्रः पदपङ्क्तयः। षष्ठी चाक्षरपङ्क्तिः। अच्छा नो मित्रमह इति शक्वरी। ता मे अश्विनेति बृहती। एता अर्धर्चशः पञ्चपदाः।

६. पञ्चस्त्रिष्टुब्जगतीनामिति वर्तते। सप्रणवो द्वितीयश्च चतुर्थश्चेति च। विशेषस्तूच्यते। यास्तु पञ्चपदास्त्रैष्टुभे प्राये जागते वा। त्रैष्टुभेषु जागतेषु वा सूक्तेष्वित्यर्थः। तासामपुनःपदानां पञ्चपदाना-

---

[1] C भवति instead of वेति। [2] C स चि शर्धो। [3] B पङ्क्तिशंसम् C (sec. b.) एतासां शस्यम् A B C (orig.) शस्यम्।

मुत्तमोपोत्तमौ[1] समस्य प्रणुयात्। पुनःपदानां तु यत्र पुनःपदमभ्यासरूपं परुच्छेपस्य शीलं स्यान्मध्ये ऽन्ते वा तौ पादौ तत्र सदृशेन समस्येदेकतां नयेत्। यतो न पदेन पुनःपदस्य विप्रयोगो ऽस्ति। लोके ऽप्यहो दर्शनीयाहो दर्शनीयेत्यभ्यासस्य विप्रयोगादर्शनात्। त्रैष्टुभजागतप्राये गताः पञ्चपदा उच्यन्ते। उद्गातेव शकुने साम गायसि। अयं चक्रमिषणत्सूर्यस्य। अध श्वेतं कलशं गोभिरक्तमापिप्यानम्। कथा दाशेम नमसा सुदानून्। इति चिन्नु प्रजायै पशुमत्यै। अभि न इळा यूथस्य माता। प्रैष स्तोमः पृथिवीमन्तरिक्षम्। बृहद्वयो बृहते तुभ्यमग्ने। स त्वं दक्षस्यावृको वृधो भूः। अग्निमग्निं वः समिधा दुवस्यते। अभि प्रयांसि सुधितानि हि ख्यः। त्वं शतान्यव शम्बरस्य। नू नो रयिं रथ्यं चर्षणिप्राम्। सं वां शता नासत्या सहस्रा। याः प्रवतो निवत उद्वतः। इति त्वाग्ने वृष्टिहव्यस्य पुत्राः। इत्यासां शस्यम्॥ उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससो३ वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा वद विश्वतो नः शकुने पुण्यमावदो३ एवमाद्युदाहरणम्॥ कथा दाशेम नमसा सुदानून्। इति चिन्नु प्रजायै पशुमत्यै। सं वां शता नासत्या सहस्रा। एतासां द्वितीयतृतीयौ पादौ समस्य प्रणुयात्। तत्र पुनःपदत्वात्। यासां तु न पुनःपदं तत्रोत्तमावपुनःपद इत्यनेन तुल्यं शस्यम्।

७. अपुनःपदे सति पञ्चपदाशस्ये उत्तमोपोत्तमौ समस्येत्।

८. याः षट्पदाः पुनःपदास्तासामयं शस्यधर्मः। सर्वप्रकाराणां

---

[1] C only उत्तमौ।

षट्पदानां पादद्वयेनावसानं कृत्वा पुनस्तथैव ततो द्वाभ्यां प्रणौति उभे यदिन्द्र रोदसी इत्यादि[1]।

९. अपुनःपदानां षट्पदानामयं शस्यधर्मः। द्वाभ्यामवसानमेकेन प्रणवः। पुनरप्येवमेव। अत्रोदाहरणम्। अवितासि सुन्वतो वृक्तबर्हिष इति।

१०. यासु षट्पदास्वष्टाक्षरौ तृतीयषष्ठौ भवतस्तत्रायं शस्यधर्मः। ततस्त्व स्वादिष्ठा तच्छम्योरा वृणीमह इत्यर्धर्चशः।

११. सप्तपदानामयं शस्यधर्मः। एकेनावसानं ततो द्वाभ्यां प्रणवः पुनर्द्वाभ्यामवसानं ततो द्वाभ्यां प्रणवः। अष्टपदानामर्धर्चशः शस्यम्। विशेषानुपदेशात्।

१२. रात्रिपर्यायान्वक्ष्यति। प्रथममध्यमोत्तमभेदेन। तत्र गायत्राणां स्तोत्रियानुरूपाणां शंसितारः प्रथमान्पादानभ्यस्यन्ति।

१३. मध्यमेषु रात्रिपर्यायेषु गायत्राणां स्तोत्रियानुरूपाणां मध्यमान्पादानभ्यस्येयुः।

१४. गायत्राणां स्तोत्रियानुरूपाणामुत्तमान्पादानभ्यस्येयुः। अथ यत्प्रथमेषु पर्यायेष्वित्येवमुपक्रम्य श्रुतौ (१७. ८) सर्वमभिहितम्।

१५. वाशब्द उक्तेन सह विकल्पार्थः। अर्धर्चशो वा प्रातःसवनं शंसेत्। विकृतच्छन्दस्कमपि।

१६. इतरयोरपि सवनयोः प्रगाथवर्जितान्स्तोत्रियानुरूपान्वार्धर्चशः शंसेत्।

---

[1] C om. उभे ॰त्यादि।

२७.

१. शस्त्रेष्वित्यधिकारो ऽनुवर्तते। शस्त्रेषु त्रिपदैव गायत्री द्रष्टव्या। न छन्दोविचित्युक्ता विशेषा ग्राह्याः।

२. ३.[1] उष्णिगपि त्रिपदा शस्त्रेषु। पुरउष्णिगपि।

४. प्रकारत्रयस्यापि तुल्यताप्रतिपादनार्थमुक्तम्। परस्परमेतासामभेद इति।

५. त्रिपदैव। एकादशाक्षरैः पादैरिह लक्षणोपदेशात्। ततो यद्यपि दशाक्षरास्त्रयः पादा इति छन्दोविचित्यां श्रुधी हवं विपिपानस्याद्रेरित्युपदेशे पच्छः शस्यम्। अक्षरपङ्क्त्युपदेशे पच्छः शस्यम्। अक्षरवैराजोपदेशे ऽर्धर्चशः। अन्यत्र विकल्पः[2]।

६. उत्तरा या विराट् सा चतुष्पदा भवति।

७. चतुष्पदेति वर्तते।

८. चतुष्पदैव।

९. चतुष्पदैव।

१०. चतुष्पदैव। तेन दशमे ऽह्नि तव स्वादिष्ठेति शस्यते। चतुष्पदैवानुष्टुप्। न षट्पदेति कृत्वा। सत्यपि छन्दोविचित्यामुदाहरणोपदेशे।

११. चतुष्पदैव।

१२. पङ्क्तेः पञ्च पादा भवन्ति।

१३. षड्वा सप्त वातिच्छन्दसां पादा भवन्ति। एवंरूपाणा-

---

[1] One Sūtra only in the commentary. [2] C ins. तथापि विकल्पः।

मेव षष्ठे ऽहनि याज्याप्रतिषेधो लक्षणविधानात्। प्रायिकं च लक्षणमन्यत्र श्रुतिवचनात्।

१४. आम्नायसिद्धत्वादस्या अष्टपदावचनमन्यासामष्टपदानां संभवे सति सप्तपदावच्छस्यम्। अन्त्यैस्त्रिभिः प्रणवः।

१५. स्तोत्रियानुरूपत्वे ऽपि पच्छःशस्यार्थं वचनम्। द्विर्द्विपदा ऋचः समामनन्तीति ऋग्धर्मे ऽपि स्तोत्रियानुरूपयोर्ऋचः पादद्वयरूपमनुशंसनमन्यत्रापि[1]।

१६. त्रिपदा गायत्रीत्येवमादिषु द्वौ द्विपदाया इत्येवमन्तेषु छन्दःसु ये पादास्ते ऽष्टाक्षराः प्रायेण भवन्तीत्ययमुत्सर्गः। प्रायेणेतिवचनाद्यच्छन्दस्काः पादा बहवो भवन्ति तदीयमेव शस्यं व्यवतिष्ठत इति।

१७. जगत्याः प्रायेण द्वादशाक्षराः पादा भवन्ति। द्वादशाक्षरबाहुल्ये[2] जगतीवत्पच्छःशस्यं यथा स्यादिति सूत्रारम्भः।

१८. उष्णिग्बृहत्योस्तृतीयौ द्वौ पादौ द्वादशाक्षरौ भवतः। शेषा अष्टाक्षरा उत्सर्गात्।

१९. द्वादशाक्षराधिकारो ऽनुवर्तते। चतुष्पदा सतोबृहतीत्युक्तम्। तस्याः प्रथमतृतीयौ द्वादशाक्षरौ भवतः। शेषावष्टाक्षरावुत्सर्गात्।

२०. ककुप्त्रिपदोक्ता। तस्या मध्यमः पादो द्वादशाक्षरः। इतरावष्टाक्षरावुत्सर्गात्।

२१. पुरउष्णिगपि त्रिपदोक्ता। तस्याः प्रथमः पादो द्वादशाक्षरः।

२२. त्रिष्टुब्विराजोरेकादशाक्षराः प्रायेण पादा भवन्ति। पूर्वा विरालेवोपादीयते[3]।

---

[1] C ऋत्रापि। [2] A °पादबाहुल्ये। [3] C om. पूर्वा °दीयते।

२३. चतुष्पदोत्तरा विरालित्युक्तम्। तस्या[१] उत्तरस्या विराजो दशाक्षराः पादा भवन्ति।

२४. तामुत्तरां विराजं याज्ञिका अक्षरपङ्क्तिरित्यप्याचक्षते। अप्यक्षरविराजम्।

२५. पदपङ्क्तिर्नाम गायत्रीविकारः। सा पञ्चभिः पादैः पञ्चाक्षरैर्भवति[२]। इन्द्र जुषस्व प्र वहेत्यस्य स्तोत्रियस्य प्रत्यृचं नवनवाक्षराणि वाचःस्तोमे ऽपि परिहार्याणीत्येवमर्थः किल सूत्रारम्भः। त्रिष्टुब्विराजोरिष्टं तौ[३] ताः पञ्चविंशत्यक्षरा इति।

२६. न केवलं द्वादशाक्षरा जगत्याः पादाश्चत्वारः[४]। कश्चित् षळप्यष्टाक्षरा भवन्ति। सर्वस्यास्य च्छन्दोविचित्यामुपदिष्टस्योपदेशः शंसितुरसंमोहार्थः संक्षेपेणोपदिष्टः।

२७. गायत्र्यादौ छन्दस्येकेन द्वाभ्यां वोनके तच्छन्दस्कैव निचृदाख्या ऋग्भवति।

२८. एकेन द्वाभ्यां वाक्षराभ्यामतिरिक्ते तच्छन्दस्कैव भुरिक्संज्ञा भवति। शस्याविकारार्थं[५] वचनम्।

२९. संपाद्यं यच्छन्दः श्रुतिवचनात्। यथा। तस्मानाछन्दस्यानां सहस्रंसहस्रं बृहत्यः संपद्यन्त इति। यथा सहस्रं च पञ्चदश चानुष्टुभः स्युस्तथैतदृचः संपादयेदित्येवमादि। संपाद्यस्य च्छन्दसश्चतुर्थभागेनाहार्यस्य संपाद्यादितरस्य ऋचः संमिताः समानसंख्यया मिताः। तस्याहार्यस्य चतुर्थभागेन संपन्ना भवन्ति। तद्यथा।

---

[१] C om. चतुष्प ॰तस्या। [२] A ins. before इन्द्र पङ्क्ति॰चनात्। [३] This passage seems doubtful. C reads ॰विराजोरिष्टं। [४] B om. चत्वारः। [५] B ॰विकार॰।

बृहत्यां संपादयितव्यायां नवभिर्गायत्रीभिः षड्बृहत्यो भवन्ति । तथा नवभिरुष्णिग्भिः सप्त बृहत्य इत्येवमादि योज्यम्[1] ।

३०. गायत्र्युष्णिहाविति त्रिपात्सारूप्यात्समासः[2] । अनुष्टुब्बृहत्याविति चतुष्पात्सामान्यात्[3] । त्रिष्टुब्जगत्याविति च । आनुपूर्व्यं छन्दसामिति छन्दश्छन्दसश्चत्वारिंशतं चत्वारिंशतं मरुत्वतीय इत्यत्रोपयोगः[4] । चतुर्विंशत्यक्षरादीनां चतुरुत्तराणामिति वचनान्मा[5] प्र गामेत्येवमादीनामत्रानादरो ऽनुपयोगात् ।

द्विरभ्यासो ऽध्यायपरिसमाप्तौ शिष्टाचारस्तदाचरणं चायुष्यमिति ।

इति शाङ्खायनसूत्रभाष्ये सप्तमो ऽध्यायः समाप्तः ।

शाङ्खायनकसूत्रस्य समं शिष्यहितेच्छया ।
वरदत्तसुतो भाष्यमानर्तीयो ऽकरोन्नवम्[6] ॥

---

[1] C om. योज्यम् । [2] C समासस्त्रिपात्सामान्येन । [3] B समासेन । [4] C उपयोगि । [5] ऋग्वे॰ १०. ५७. १ । [6] om. in A (B?) ।

अथ अष्टमो ऽध्यायः ।

१.

१. होत्रकशस्त्रान्तं माध्यन्दिनमपि सवनं परिसमाप्य यथा मध्यन्दिनाय प्रसृप्ताः पश्चिमेन सदोद्वारेणैवमूर्ध्वं मध्यन्दिनात्प्रसर्पन्ति ।

२. आदौ प्रारम्भे तृतीयसवनस्यादित्यग्रहेण यज्ञं कुर्वन्ति । तद्यदादित्यग्रहेण तृतीयसवनं प्रतिपद्यत इति (कौ॰ ब्रा॰ १६.१) श्रुतेः ।

३. आदित्येभ्यो ऽनुब्रूहीत्येवमध्वर्युणोक्तो यदर्थं तस्य ।

४. आदित्यानामवसा नूतनेनेत्यादित्यग्रहस्य पुरोनुवाक्या । त्रिष्टुभमादित्यग्रहस्य पुरोनुवाक्यामन्वाहेति (१६. १) श्रुतेः ।

५. होता यक्षदादित्यान्प्रियधाम्न इत्येवमादिकः प्रैषो भवति । अस्मै सुन्वते यजमानायेत्यस्य विकारेषूहः ।

६. आदित्यासो अदितिर्मादयन्तामित्येतया यजति । त्रिष्टुभा यजतीति श्रुतेः ।

७. आदित्यग्रहसंबन्धिनीमाहुतिं[1] हूयमानां होता नेक्षते । नापि ग्रहशेषं भक्षयति ।

८. लाघवार्थं प्रसङ्गेनेहैवोक्तम् । सावित्रग्रहे वीक्षणमाहुतेः[2] प्रतिषिध्यते । भक्षणं च ग्रहशेषस्य ।

९. आर्भवाख्येन पवमानेन स्तुते छन्दोगैः मनोतादीष्टान्तं पशुकर्म कृत्वा । तद्यथा । मनोतासूक्तं प्रधानयागः सवमाहोमो

---

[1] C चाहुय॰ । [2] C वीक्षमाणम् ।

वनस्पतिः स्विष्टकृदिलामार्जनं चेत्येतत्पशुकर्म[1] कृत्वातः पुरोलाशैः सवनीयैश्चरन्ति । इत्ययं पदार्थक्रमः । अथ स्तुते पवमाने पशुना चरन्तीत्येवमादि प्रदर्शितं श्रुतौ ।

२.

१. तृतीये धानाः सवने पुरुष्टुतेति सवनीयपुरोलाशानां पुरोनुवाक्या भवति । होता यक्षदिन्द्रं हरिवानित्येवमादि यथासमाम्नातं यथासवनं वितारयति । तेनैव यजतीत्युक्तम् ।

२. अग्ने तृतीये सवने हि कानिष इति स्विष्टकृतः पुरोनुवाक्या भवति । प्रैषो याज्या च पूर्वोक्ता ।

३. इहोप यात शवसो नपात इत्युन्नीयमानसूक्तं भवति । वामदेव्यात्तृतीयसवन उन्नीयमानेभ्यो ऽन्वाहेति श्रुतेः ।

४. होता यक्षदिन्द्रं तृतीयस्य सवनस्य ऋभुमतो विभुमतो वाजवत इत्येवमादिकः प्रैषो भवति ।

५. इन्द्र ऋभुभिर्वाजवद्भिः समुक्षितमित्येतया होता यजति ।

६. इन्द्रावरुणा सुतपाविमं सुतमित्येतया मैत्रावरुणो यजति ।

७. इन्द्रश्च सोमं पिबतं बृहस्पत इत्येतया ब्राह्मणाच्छंसी यजति ।

८. आ वो वहन्तु सप्तयो रघुष्यद इत्येतया पोता यजति ।

९. अमेव नः सुहवा आ हि गन्तनेत्येतया नेष्टा यजति ।

१०. इन्द्राविष्णू पिबतं मध्वो अस्येत्येतयाच्छावाको यजति ।

---

[1] om. इलामार्जनं च ।

११. इमं स्तोममर्हते जातवेदस इत्येतयाग्नीध्रो यजति। अन्धस्वत्यो मद्वत्यः पीतवत्यो जगत्यो याज्या इत्येतासु श्रुत्युक्तं यथासंभवं लिङ्गम्।

१२. अयाळग्नीदित्येवमादि यदिह नोक्तं तत्प्रातःसवनेन समानं द्रष्टव्यम्।

१३. वक्ष्यमाणस्यावध्यर्थानुवादः।

१४. पुरोळाशस्य परिवापमिश्रस्येति। परिवापः सारस्वतं[1] दधि। तेन मिश्रस्य पुरोळाशस्य त्रींस्त्रीन्पिण्डानत्र पितर इत्येवमादिना मन्त्रेण। प्रतिपिण्डं मन्त्रमावर्तयन्ते। नाराशंसानां सन्नानां चमसानां यथाचमसं चमसिनो दक्षिणत उपास्यन्ति। औपासनांस्तृतीयसवन उपास्यन्ति पितॄनेव तत्प्रीणन्तीति (१६.१) श्रुतेः।

३.

१. देवाय सवित्रेऽनुब्रूहीत्यध्वर्युणोक्तः।

२. यदर्थं प्रेषितस्तस्याभूद्देवः सविता वन्द्यो नु न इति पुरोनुवाक्या भवति।

३. होता यक्षद्देवं सवितारं परामिवां मात्विषदित्येवमादिकः प्रैषो भवति। अस्मै सुन्वते यजमानाय तस्य विकारेषु यथार्थमूहः।

४. दमूना देव इत्येवमादिकया यजति। त्रिष्टुभं सावित्रग्रहस्य पुरोनुवाक्यामनूच्य जगत्या यजतीति (१६.२) श्रुतत्वात्।

---

[1] B सारस्वत्यं।

५. सावित्रग्रहानन्तरं वैश्वदेवं शस्त्रं वक्तव्यम् । तत्प्रसङ्गेनाहावमाह । अध्वर्यो शोंशोंसावो३ इत्ययमाहावः शस्त्रादौ तृतीयसवने । वैश्वदेवाग्निमारुतयोरित्यभिप्रायो ऽग्निष्टोमे शस्त्रान्तरस्यासम्भवात् । सन्ति च संस्थान्तरेषु उक्थाख्यानि शस्त्राणि तृतीयसवन एव । तेषामप्याहावो ऽयमिष्यते तदर्थं सोक्थ इत्याह ।

६. तृतीयसवने ऽन्तःशस्त्रं प्रातःसवनिक आहावः । पूर्वसूत्रोक्तेषु शस्त्रेषु शोंसावो इत्ययं भवति ।

७. तृतीयसवने प्रातःसवनिकः शस्त्राधिकारश्चानुवर्तते । न चान्तःशस्त्रमिति[१] । षोलशिप्रभृतौ च तृतीयसवने [२]शस्त्रादावन्तरविशेषेण प्रातःसवनिक आहावो भवति ।

८. तत्सवितुर्वृणीमहे ऽद्या नो देव सवितरित्येतौ तृचौ प्रतिपदनुचराख्यौ वैश्वदेवाख्यस्य शस्त्रस्य भवतः । वैश्वदेवाधिकारो हतस्य यजेत्युक्त इति यावत् ।

९. अभूद्देवः सविता वन्द्यो नु न इति सावित्रं सूक्तं सनिवित्कं शंसेत् । सावित्रं शंसतीति (१६.३) श्रुतत्वात् ।

१०. एकया चेत्येवमादिकां शंसति । वायव्यां शंसतीति श्रुतत्वात् । श्रुत्युक्ता चास्याः शास्त्रसंव्यवहारार्था वायव्येति संज्ञा द्रष्टव्या ।

११. प्र द्यावा यज्ञैः पृथिवी ऋतावृधेत्येतद्द्यावापृथिवीयाख्यं सूक्तं सनिवित्कं शंसेत् । द्यावापृथिवीयं शंसतीति श्रुतत्वात् ।

१२. अस्मिन्सूक्ते मदशब्दवानध्वर्युणा प्रतिगरः कार्यः । तस्मिन्नध्वर्युर्मदवत्प्रत्यागृणातीति श्रुतेः । श्रुत्यनुकरणार्थं च सूत्रमसम्मोहाय ।

---

[१] C (orig.) सचान्तः । [२] B शस्त्रेषु instead of शस्त्रादावन्तर ।

१३. सुरूपकृत्नुमूतय इत्येतां शंसेत्। एकाग्रहणं सूक्तनिवृत्त्यर्थम्। एकेति प्रथमानिर्देशः संज्ञाभिप्रायेण। सुरूपकृत्नुमित्येषैवास्याः शास्त्रसंव्यवहारार्था संज्ञा भवति।

१४. तक्षन्रथं सुवृतं विद्मनापस इत्येतत्सूक्तमार्भवाख्यं सनिविल्कं शंसेत्। आर्भवं शंसतीति श्रुतत्वात्।

१५. अयं वेनश्चोदयत्पृश्निगर्भा इत्येका। येभ्यो माता मधुमत्पिन्वते पय इत्येका। एवा पित्रे विश्वदेवाय वृष्ण इत्येका। एता एकपातिन्यो नाम शंसेत्। अथ वै नामादित्यां बार्हस्पत्यामिति शंसतीति (१६.२) श्रुतत्वात्।

१६. आ नो भद्राः क्रतवो यन्तु विश्वत इत्यस्य वैश्वदेवाख्यस्य सूक्तस्योत्तमे द्वे ऋचौ शिष्ट्वा निविदं दध्यात्। आनोभद्रीयस्य धर्मविधानसंबन्धानुवादेन शंसनविधिः। वैश्वदेवं शंसतीति श्रुतत्वात्। अवध्यर्थो निविदनुवाद उत्तमाः परिशिष्य तृतीयसवन इति प्राप्ते[1]।

१७. आ नो भद्रा इत्येतस्य सूक्तस्योत्तमा वैश्वदेवस्य शस्त्रस्य परिधानीया भवति। तस्या धर्मविशेष उच्यते।

१८. पच्छो द्विःशंसनमर्धर्चशस्तृतीयं कार्यम्। तस्य द्विः पच्छः परिधानीयां शंसत्यर्धर्चशस्तृतीयमिति श्रुतत्वात्।

१९. [2]उक्थवीर्यं भूतममीत्येवमादिकं जपित्वा विश्वे देवाः शृणुतेमं हवं म इत्येतया यजति। षोळशाहावं वैश्वदेवं शंस-

---

[1] C प्राप्तं। [2] C (in marg.) वक्ष्यति।

तीति प्रकृत्य तत्सप्तदशविधं भवत्येकादश देवतास्तस्रो निविद उक्थवीर्यं याज्येति (१६.४) श्रुतत्वात् ।

४.

१. घृतस्य यजेत्यध्वर्युणोक्तः घृतं मिमिक्षे घृतमस्य योनिरित्येतयोपांशु यजति ।

२. सौम्यस्य यजेत्यध्वर्युणोक्तस्त्वं सोम पितृभिः संविदान इत्येतया यजति ।

३. परीज्यार्थम् ।

४. उरु विष्णवित्यादिकयोपांशु यजति । यागत्रये यथासंख्यमग्निः सोमो विष्णुरिति देवताः श्रुतिमन्त्रलिङ्गाभ्याम् ।

५. परीज्या सौम्यस्योभयत उपांशुविशिष्टो घृतयागाख्य आज्यद्रव्यको यागः । एषो ऽन्यतरतो[1] वा कर्तव्य उभयतो वेति ।

६. सौम्यं चरुं [2]यागावशेषमाज्यमिश्रं सदो नयन्त्यध्वर्यवस्तं होतावेक्ष्य तत्र यत्सर्पिस्तदङ्गुलिभ्यामुपस्पृशेत् । शाखान्तरात् । स्वशाखायां तु हरन्त्येतं सौम्यं सदस्तं होता प्रतिगृह्योपनिधत्ते ऽथास्य सर्पिष्यात्मानं पर्यवेक्ष्याङ्गुलिभ्यां सर्पिरुपस्पृशतीति (१६.५) श्रुतिदृष्टैः प्रतिग्रहोपनिधानात्मावेक्षणैः सह विकल्पः ।

७. यत्तदङ्गुलिभ्यां सर्पिरुपस्पृष्टं तेन चक्षुषी विमार्ष्टि ।

---

[1] A स श्रुत्यन्तरत एकतो वा कर्तव्या, C यागः स श्रुत्यन्तरत एकतो in marg.

[2] B यागविशेषं।

चक्षुष्या इत्येवमादिना मन्त्रेण संस्कारो ऽपि सन् वचनाद्धोतुर्भवति न यजमानस्य। तमुद्गातृभ्यः प्रयच्छतीति वैकल्पिकत्वाच्च सूचितम्। तथा च कात्यायनः। आज्यमासिच्योद्गात्रे सौम्यं प्रयच्छतीत्याह।

५.

१. अग्नीत्पात्नीवतस्य यजेत्यध्वर्युणा संप्रेषित आग्नीध्र ऐभिरग्ने सरथं याह्यर्वाङित्येतयोपांशु यजति। अथ पात्नीवतग्रहेण चरन्तीत्युपक्रम्य पात्नीवतस्य श्रुतौ (१६.३) सर्वमाम्नातम्।

२. वषट्कृते आग्नीध्रो हुतशेषमभक्षयित्वा ग्रहपात्रमादाय पूर्वया द्वारा सदः प्रपद्य वक्ष्यमाणकं करोतीति वाक्यशेषः।

३. नेष्टा ऋत्विक्स्य समीपे उत्तरत उपविश्य।

४. उपस्थे वा नेष्टुरुपविशेत्। अग्नीन्नेष्टुरुपस्थमासीदेति संप्रेषितत्वात्।

५. नेष्टुरुपह्वयस्व इत्युपहूय नेष्टारं ततः।

६. तं पात्नीवतं ग्रहं भक्षयित्वोपस्पृश्य तत उरोऽभिमर्शनादि कुर्यात्।

७. यथेतमिति यथागतं प्रत्येत्य प्रत्यागच्छेत्पूर्वयैव द्वारा।

६.

१. स्तोत्रवदेतच्छस्त्रमाग्निमारुताख्यमित्यस्यार्थस्य ज्ञापनार्थमेतत्सूत्रम्।

२. वैश्वानराय पृथुपाजसे विप इत्येतत्सूक्तं वैश्वानरीयाख्यं

सनिविल्कमाग्निमारुतस्य शस्त्रस्य प्रथमं भवति। वैश्वानरीयं शंसतीति (१६.७) श्रुतेः।

३. आ ते पितर्मरुतां सुम्नमेत्वित्येका। रौद्रीं शंसतीति श्रुतत्वात्।

४. प्रत्वक्षसः प्रतवसो विरप्शिन इति मारुताख्यं सनिविल्कं सूक्तं शंसेत्। मारुतं शंसतीति श्रुतत्वात्।

५. यज्ञा यज्ञा वो अग्नय इति स्तोत्रियः। देवो वो द्रविणोदा इत्यनुरूपः। एतौ स्तोत्रियानुरूपौ प्रगाथौ यज्ञायज्ञीयस्य भवतः। अथ यज्ञायज्ञीयस्य स्तोत्रियानुरूपौ तौ वै मध्ये भिया एव शंसतीति श्रुतेः।

६. प्र तव्यसीं नव्यसीं धीतिमग्नय इति जातवेदसीयाख्यं सनिविल्कं सूक्तं भवति। जातवेदसीयं शंसतीति श्रुतत्वात्।

७. आपो हि ष्ठा मयोभुव इत्येतास्तिस्रः शंसति।

८. तिस्र इति प्रकृतं पूर्वसूत्रे तत्संदेहनिवृत्त्यर्थमेकाग्रहणम्।

९. देवानां पत्नीरुशतीरवन्तु न इत्येते द्वे भवतः।

१०. राकामहं सुहवां सुष्टुती हुव इत्येते द्वे भवतः।

११. अविदद्दक्षं मित्रो नवीयानित्येतास्तिस्रोऽक्षरपङ्क्तिसंज्ञाः शंसेत्।

१२. उदीरतामवर उत्पराम इत्येताः पैत्रीसंज्ञिकास्तिस्र शंसेत्।

१३. इमं यम प्रस्तरमा हि सीदेत्येका। मातली कव्यैर्यमो अङ्गिरोभिरित्येका। अङ्गिरोभिरा गहि यज्ञियेभिरित्येका। एतास्तिस्रः शंसेत्। संज्ञाकरणं शास्त्रसंव्यवहारार्थम्।

१४. स्वादुष्किलायं मधुमाँ उतायमित्येतास्तिस्रः स्वादुष्किलीयाः शंसेत्। संज्ञाकरणमापोहिष्ठीयानां देवानां पत्नीनां राकायाश्चाक्षरपङ्क्तीनां पैत्रीणां यामीनां स्वादुष्किलीयानां चेत्येवमाद्यर्थम्।

१५. शाखान्तरात्[1]।

१६. ययोरोजसा स्कभिता रजांसीत्येवमादिकां शंसेत्। वैष्णुवारुणीं शंसतीति श्रुतत्वात्। विष्णोर्नु कं वीर्याणि प्र वोचमित्येका। तन्तुं तन्वन्रजसो भानुमन्विहीत्येका। वैष्णवीं चाग्नेयीं च शंसतीति (१६.८) श्रुतत्वात्। एकपातिन्य इति शास्त्रसंव्यवहारार्थं संज्ञाकरणम्।

१७. एवा न इन्द्रो मघवा विरप्शीत्येतया परिदध्यात्। ऐन्द्र्या परिदधातीति श्रुतेः। विशेषस्तु शाखान्तरात्।

१८. उक्थवीर्याख्यं तेजो ऽसि धृष्टिरसीत्येवमादिकमग्निर्जातवेदा इत्यस्या निविदो ऽनन्तरमाम्नातं तज्जपित्वा पाठक्रमात्।

१९. अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिरित्येतया यजति। उक्तानि मरुत्वतीयनिष्केवल्यवैश्वदेवाग्निमारुताख्यानि शस्त्राणि तेष्वन्यदपि किं चिद्वक्तव्यं। तदर्थमाह।

---

[1] A स्वशाखा॰, B C शाखान्तरात्। C (in marg.) नाः सर्वपृष्ठे मरुत्वत्या- म्रधातीति श्रुतत्वात्।

७.

१. आयनिगदप्रतिषेधार्था निविदां पाठ उत्तरत्र कृतस्तत्र या प्रथमा निवित्सा मरुत्वतीयस्य भवतीन्द्रो मरुत्वान्सोमस्य पिबत्वित्येवमादिका ।

२. द्वितीया निष्केवल्यस्य भवतीन्द्रो देव इत्येवमादिका ।

३. तृतीयाप्रभृतयो निविदो वैश्वदेवाग्निमारुतयोः सप्त । तत्र चतस्रो वैश्वदेवे तिस्र आग्निमारुते ।

४. उत्तमा निवित्षोलशिनो भवत्यस्य मदे जरितरिन्द्र इत्येवमादिका ।

५. यावन्ति यस्मिञ्छस्त्रे सूक्तानि तावत्य एव तत्र निविदः । एकादश देवतास्तस्रो निविद इति वैश्वदेवे दर्शनात् सूक्तदेवतासंयोगाच्च ।

६. वैश्वदेवाग्निमारुतयोरिति वर्तते । वैश्वदेवाग्निमारुतयोः प्रतिसूक्तं पुरस्तादाहावः ।

७. निविदोनिविदश्च पुरस्तादाहावः ।

८. पुरस्तात्पुरस्तादाहावः । अभ्यधिकाया अपि विकृतिष्वेकैकस्या इति यत्नात् ।

९. सकृच्चतुर्थौनिर्देशात् ।

१०. प्रत्येकमाहावः । षोलशाहावं वैश्वदेवं शंसतीति (१६.४) श्रुतेः ।

११. प्रत्येकमाहावः । संख्यानियमात् ।

१२. आग्निमारुत एवाधिकारात्। ततो न शस्त्रान्तरे वाचःस्तोमे ऽपि।

१३. आग्निमारुताधिकारात्। ततो न वैश्वदेवे हयो न विद्वानिति शंसनप्रसङ्गेन।

१४. पुरस्तादाहावः। आग्निमारुत एवाधिकारात्।

१५. पूर्ववद्व्याख्या।

१६. तस्मादेना अन्त्ये शस्त्रे शंसतीति (१६.७) श्रुतिदर्शनात्। वाचःस्तोमे ऽपि। नान्यत्र शंसनमासाम्। तस्मादाग्निमारुत एव शंसनमाहावस्य।

१७. पूर्ववद्व्याख्या।

१८. अग्निमारुत एव पुरस्तादाहावः प्रकृतत्वात्। अन्यत्र शंसने सत्यप्याहावो न भवति।

१९. वियतं विलम्बितं शंसनं वैश्वदेवस्य भवति। तस्मादेनदारतं शंसेद्रमन्ते ह्यस्मिन्पशव इति श्रुतेः।

२०. अभ्यग्रं द्रुतमाग्निमारुतस्य शस्त्रं भवति आपोहिष्ठीयावर्जम्। एवमेव श्रुतेः। तस्मादेनदभ्यग्रं शंसेदित्याग्निमारुतं प्रकृत्य (कौ० ब्र० १६, ७) तस्मादेनदारतं शंसेदित्यापोहिष्ठीयाः प्रकृत्य।

२१. अप्सु सोमान्मादयित्वेत्यवध्यर्थमुच्यते। अनुयाजादि शंय्वन्तं पशुकर्म कृत्वेत्यस्याप्सु सोममादनेन सह संबन्धो ऽस्तीति ज्ञापनार्थम्। ततो वाजपेये शस्त्रेभ्य ऊर्ध्वं हारियोजनप्राजापत्यप्रचारवनस्पतिस्विष्टकृदिलाप्सुसोममादनं ततो ऽनुयाजादि।

८.

१. हारियोजनेन चरन्तीत्युक्तम्। तस्य हारियोजनस्य तिष्ठा सु कं मघवन्मा परा गा इति पुरोनुवाक्या भवति।

२. धानाः सोमानामिन्द्राद्भिश्च पिब चेत्येवमादिकः प्रैषो भवति। अस्मिन्सुन्वति यजमान इत्यत्र द्वियजमानके बहुयजमानके च विकारे यथार्थमूहो भवति। अनयोः सुन्वतोर्यजमानयोः। एषु सुन्वत्सु यजमानेषु। तस्मै किमरास्याः[1] ताभ्यां किमरास्यास्तेभ्यः किमरास्याः। यद्यदचीकमेतां यद्यदचीकमन्त।

३. युनज्मि ते ब्रह्मणा केशिना हरी इति याज्या भवति। त्रिष्टुभं हारियोजनस्य पुरोनुवाक्यामनूच्य जगत्या यजतीति श्रुतत्वात्।

४. धानाः सोमानामित्येवमादिको ऽनुवषट्कारो भवति।

५. ननु धानाः सोमानामग्ने वीहीति वानुवषट्कार इति वक्तव्यम्। ततः पक्षे सामान्यप्राप्तो भवति[2]। सत्यम्। सोपपदेषु[3] सोमेषु सर्वत्रैवं भवतीति प्रदर्शनार्थम्। ततश्च सुराग्रहेषु सुरासोमानामग्ने वीहीत्यनुवषट्कारः। सोमस्याग्न इति वेति सिद्धं भवति।

६. अप्सु धूतस्येत्येवमादिना मन्त्रेण प्राणभक्षान्भक्षयित्वा। सर्व एवर्त्विजः शाखान्तरात्। होतृधिष्ण्यस्यादेव द्रोणकलशादुद्गृह्य

---

[1] Om. in A. C in marg. [2] E भविष्यति। ऽच्यते। C प्राप्तौ। सत्यं in marg. [3] C (by marg. alt.) सोमपदेषु।

प्राणभक्षः। तान्[1] सवषट्कृते हरतीत्यन्यत्र स्वासनस्थस्यैव वषट्कर्तुर्भक्षहरणम्[2]। इह तु भक्षं हरेदिच्छन्निति कात्यायनवचनाद्विकल्पः। प्राणभक्षादनन्तरं सर्व एव धाना व्याददते[3]।

७. तासां भूयिष्ठा धानानामाददीतेति श्रुतेः।

८. येन द्वारेण सदः प्रातःसवने प्रसर्पन्ति तेनेह निःसर्पन्ति। पूर्वेणेति नोक्तम्। पश्चिमेन प्रातःसवने ब्रह्मणः प्रवेशात्।

९. यथा ह त्यद्वसवो गौर्यं चिदित्येवमादिकयर्चा सर्व एवर्त्विजो धिष्ण्यान्समीक्ष्याग्नीध्रीयं धिष्ण्यमुत्तरेणाहवनीयमागच्छन्ति।

१०. भूर्भुवः स्वः स्वाहा स त्वं नो अग्ने ऽवमो भवोती। त्वं नो अग्ने वरुणस्य विद्वान्। तदस्तु मित्रावरुणा तदग्ने। इत्येतैर्मन्त्रैराग्नीध्रीये चतस्र आहुतीश्चतुर्गृहीतवतीः सर्व ऋत्विजो जुह्वति। अनिमित्त एव। प्रायश्चित्ताहुतीरिति वचनाच्चतुर्गृहीतसिद्धिः।

११. आपुरस्ता सेत्येवमादिकेन मन्त्रेणाहवनीयस्य भस्मान्तप्रदेशे भस्मन्येव। न बहिः। योनिर्वै[4] पशूनामाहवनीय इति दर्शनात्। धाना न्युप्य मन्त्रान्तेन भस्मान्ते धानाः प्रक्षिप्य ततः पञ्चपञ्च यूपशकलानाहवनीय एवादधते। वक्ष्यमाणैर्मन्त्रैः।

---

[1] A °क्षः। तान् स°, °C प्राणभक्ष-तान्, B °भक्षितान् सव°। [2] B °क्षणम्, A C °क्षहरणं। [3] व्याददते all mss. [4] B येनिर्वै, A C योनिर्वै।

९.

१. एतैरस्यन्तैर्मन्त्रैस्तिष्ठन्तः शकलाञ्जुह्वति ।

२. शकलाधानादनन्तरं सव्यं बाहुमन्वावृत्योत्तरेणाहवनीयमप्सु सोमान्सन्नान्यथास्वं चमसान् पश्चादुपोपविश्य दर्भपवित्रैर्वक्ष्यमाणेन मन्त्रेण चेष्टयन्ते चालयन्तीत्यर्थः ।

३. समाप इत्येवमादिना मन्त्रेण दर्भपिञ्जूलैश्चमसस्थद्रव्यचेष्टनं कुर्वन्ति ।

४. चेष्टयितार उच्चैर्मन्त्रमाहुरकर्मकरणत्वात् ।

५. अप्सु धूतस्येत्येवमादिना मन्त्रेण प्रतिचमसं प्राणभक्षान् भक्षयन्ति ।

६. अच्छायं वो मरुतः श्लोक एतु । ययोरोजसा स्कभिता रजांसीत्याभ्यां मन्त्राभ्यां प्रतिचमसमापो यास्ताः प्राचीर्निनयेयुः । उदीचीर्वा ।

७. समुद्रं वः प्र हिणोमीत्येवमादिना मन्त्रेण ता एवाभिमन्त्रयेयुः ।

८. शं नो देवीरभिष्टय इत्येवमाद्याभिस्तिसृभिरुरो ऽभिमृश्य ।

९. उक्तार्थमेतदर्घकर्मणि । ननु निनयनप्रभृति मुखविमार्जनान्तं पूर्ववदिति लाघवार्थं वक्तव्यम् । उच्यते । यजमानस्यैव केवलस्य मा भूदिति पुनरुक्तम् ।

१०. दक्षिणावृत ऋत्विज आग्नीध्रीयसमीपमागत्य दधिभक्षणं

कुर्युः। यथा दधिभक्षमित्यनेन दधिक्राव्णो अकारिषमिति मन्त्रसिद्धिः।

११. सौत्ये ऽहनि सावनस्य पशोः शाखान्तरे प्रविभागेन कर्म चोदितम्। वपया प्रातःसवने चरन्ति पुरोलाशेन माध्यन्दिने ऽङ्गैस्तृतीयसवन इति। तच्चाप्येकत्र मनोतादीलान्तम्। अपरत्रानुयाजादि शंय्वन्तम्। इह तृतीयसवने पत्नीसंयाजान्संस्थाप्य कृतेषु नवसु समिष्टयजुःष्वस्मिन्नवसरे ऽवभृथाख्यं कर्म कर्तुमपो ऽभ्यवैति।

१०.

१. पुनर्मामैत्विन्द्रियमित्येवमादिना मन्त्रेण यजमानो धिष्ण्यांस्तत्समीक्षते तस्यात्रावसरः।

२. ऋत्विजो वानूबन्ध्यायां संस्थितायां यजमानः समीक्षेतोभा कवी युवाना सत्येत्येवमादिना मन्त्रेण। वाशब्दो धिष्ण्यसमीक्षणेन सह विकल्पार्थः।

३. उरुं हि राजा वरुणश्चकारेत्येवमादिकं मन्त्रमनुसंयञ्जपति।

४. सर्वे कर्तारो ऽवभृथसाम्नो निधनमुच्चारयेयुः।

५. नमो वरुणायेत्येवमादिना मन्त्रेणाप्सु यजमानः पादमवदध्यात्।

११.

१. अप्स्ववभृथेन चरन्तीति श्रुतेरर्थवादादप्सु वारुणीष्टिर्भवति।

२. वार्त्रघ्नावाज्यभागौ भवत इति श्रुतत्वात् ।

३. अप्स्वग्ने सधिष्टवेत्याग्नेयः । अप्सु मे सोमो अब्रवीदिति सौम्यः । अप्सुमन्तौ हैके कुर्वन्तीति (१८.१०) श्रुतत्वात् । अप्सु मे सोमो अब्रवीदिति परापि सती गायत्री परिगृह्यते प्रायोवचनात्।

४. सर्वमवभृथकर्म तिष्ठन्करोति । शाखान्तरात् ।

५. उदुत्तमं वरुण पाशमस्मत् । अव ते हेळो वरुण नमोभिरिति प्रधानस्य याज्यानुवाक्ये ।

६. स त्वं नो अग्ने ऽवमो भवोती । त्वं नो अग्ने वरुणस्य विद्वानिति स्विष्टकृतो याज्यानुवाक्ये स्थानान्तरे कुर्यात् । अग्नीवरुणावादिष्टतीति वचनात् । प्राकृतस्याग्निं स्विष्टकृतमित्यस्य निवृत्तिः ।

७. स्विष्टकृन्निगदम् । प्रकरणात् ।

८. स्विष्टकृन्निगदमेव वेति विकल्पार्थः ।

९. बर्हिःसंज्ञकवर्जितान् प्रयाजानुयाजान्यजति ।

१०. वारुणीष्टिरेतावती भवति ।

११. स्विष्टकृदन्ता वेयमिष्टिर्भवति शाखान्तरात् ।

१२. षडाकृतिपक्षे[१] प्रयाजचतुष्टयं । वरुणः[२] अग्नीवरुणौ वेता-

---

[१] C षडाकृति. । [२] B C (orig) वरुणम्, A व । णा॰ ।

वक्ष्यति । अथ याः षड्वा अष्टौ वा वषट्कृतय इति (१८. १०) श्रुतत्वात् । पक्षत्रयं सूचितम् ।

१३. येन स्त्रियावित्येवमादिना मन्त्रेण होतात्मानमभ्युङ्क्ते । होतृवचनं यजमाननिवृत्त्यर्थम् ।

१४. उपेच्छिवेत्येवमादिकं मन्त्रं यजमान आगच्छञ्जपति ।

१५. इहो सहस्रदक्षिण इत्येवमादिना मन्त्रेण यजमानः स्वासन उपविशति ।

१६. आहवनीये यजमानः स्वासनोपवेशनात् ऊर्ध्वं समिधावादधाति । देवानां समिदसीत्यनेन मन्त्रेण पूर्वाममन्त्रिकामुत्तराम् ।

१७. द्विरेवादधाति[1] । पूर्वामुत्तरामिति प्रकृतत्वात् ।

१२.

१. प्रायणीयया उदयनीया तुल्येत्यर्थः ।

२. याः प्रायणीयायां पुरोनुवाक्यास्ता उदयनीयायां याज्याः करोति या याज्यास्ताः पुरोनुवाक्या इति (७-८) श्रुतेः ।

३. अयं चोदयनीयायां विशेषः ।

४. अग्निं प्रथममुदयनीये यजत्यथ सोममथ सवितारमथ पथ्यां स्वस्तिमथादितिमिति श्रुतौ यागक्रमनियमात् ।

[1] C इरेवा० ।

५. उदयनीयाया अनन्तरं मित्रावरुणदेवताका वशा बन्ध्या[१] गौरनूबन्ध्याख्या कर्तव्या ।

६. पयस्या वा मैत्रावरुणी भवति । न गौरेवानूबन्ध्येति । एवं नु यदि पशुरनूबन्ध्या भवति यद्यु वै पयस्येति (१८. १२) श्रुतत्वात् ।

७. आ वां मित्रावरुणा हव्यजुष्टिमिति वपायाः । तत्सु वां मित्रावरुणा महित्वमिति पुरोळाशस्य । आ नो मित्रावरुणा हव्यजुष्टिमिति हविषः । अप्रथमापि त्रिष्टुप्प्रायात् ।

८. युवं वस्त्राणि पीवसा वसाथे इति वपायै याज्येति श्रुतेः । यद्बंहिष्ठं नातिविधे सुदानू इति पुरोळाशस्येति श्रुतेः । प्र बाहवा सिसृतं जीवसे न इति हविष इति (१८.१२) श्रुतेः ।

९. दीक्षणीयात आरभ्य यावदनूबन्ध्यासमाप्तिः तावद्दर्शपूर्णमासविकारेषु कर्मसु न वेदे पत्नीं वाचयति न च वेदं स्तृणाति ।

१०. स्तरणप्रदेशविशेषार्थः सूत्रारम्भः ।

११. मापो मौषधीरित्येवमादिना मन्त्रेण हृदयशूलोपस्थानं कुर्यात् । हिंसिष्टं शुचौ स्थ इति द्वयोः सतोः । हिंसिष्ट शुचः स्थ इति बहुषु । तं वां शुचावृच्छताम् । तं वः शुच ऋच्छन्तु । एवं यथार्थमूहः ।

१२. सुमित्रिया न इत्येवमादिना मन्त्रेणाप उपस्पृश्य ततः ।

१३. दुर्मित्रिया इत्येवमादिना मन्त्रेण ता अपो दक्षिणा क्षिपन्ति पशुकर्तारः ।

---

[१] A om. बन्ध्या, गौर् C अनूबन्ध्या instead of बन्ध्या ।

१४. शाशब्दात्सकलाङ्गकलापा वा ।

१५. वृधन्वन्तावाज्यभागावित्यर्थः ।

१६. स्विष्टकृन्निगदरहितेलान्ता कर्तव्या ।

१३.

१. देवयजनप्रदेशादुदङ्ङवस्थानं कृत्वा तस्मिन्प्रदेशे वैष्णव्यर्चा न तूष्णीं शम्येतिकर्तव्यतया पूर्णाहुतिं केवलां हुत्वोदवसानीयाख्ययेष्ट्या यजति ।

२. उदवसानीयाख्या आग्नेयीष्टिः सद्यःकाला भवति ।

३. वार्त्रघ्नावाज्यभागावित्यर्थः ।

४. याः पुनराधेये प्रधानहविषः स्विष्टकृतश्च याज्यानुवाक्या उक्ता अग्ने तमद्येति व्यतिषक्ता इहापि तास्तथैव भवन्ति ।

५. पञ्चकपाले क्रियमाणे पौनराधेयिकीष्टिर्भवति ।

६. समाप्तायामुदवसानीयायां सायंतनहोमविधिना यजमानोऽग्निहोत्रं जुहोति । संस्थितायामिति वचनादनन्तरमेव । अथ यत्रैवैषोदवसानीयेष्टिः संतिष्ठते ऽथ सायमाहुतिं जुहोति काल एव प्रातराहुतिमिति शतपथे श्रुतत्वात् ।

१४.

१. उक्तानि सवनानि । धर्मविशेषाः केचिन्नोक्तास्त उच्यन्ते । मन्द्रया वाचा मन्द्रेण स्वरेण प्रातःसवनं प्रयुञ्जीत ।

२. आज्यादुच्चैस्तरां प्रउगं प्रयुञ्जीत ।

३. मध्यमया वाचा कण्ठस्थेन मारुतेन माध्यन्दितं सवनं प्रयुञ्जीत ।

४. ईषदर्थे तरप्शब्दः । स्वस्थानादप्रच्यवन्नुच्चैस्तरां मरुत्वतीयान्निष्केवल्यं प्रयुञ्जीत ।

५. तारस्थानप्रयोगेण ।

६. उच्चैस्तरामाग्निमारुतमित्यर्थः ।

७. कल्पान्तरमेतत् । नात्रोच्चैस्तरां निष्केवल्यमिति विशेषः ।

८. सर्वमेवाविशेषात् ।

९ तृतीयसवनमेवानन्तर्यात् ।

१५.

१. यस्मै प्रयोजनाय कश्चित्प्रेष्यति स तस्यापवर्गाद्वाग्यमनं करोति ।

२. वाचं यच्छतीति वर्तते । शस्त्रादौ य आहावस्तत्प्रभृत्यानुवषट्काराच्छंसितुर्वाग्यमनम् ।

३. प्रातरनुवाकेऽनूच्यमाने ब्रह्मा वाग्यतो भवति ।

४. चमसभक्षादनन्तरमा स्तोत्रप्रसवाद्वाग्यमनम् ।

५. प्रसवप्रभृति च यावदनुवषट्कारस्तावद्वाग्यमनम् ।

६. इह मद एव मघवन्नित्येवमादिकोऽतिप्रैषस्तदन्तं श्रुत्वा ब्रह्मणो वाग्यमः । आग्नीध्रेणाप्युक्त आ वसतीवरीणां परिहरणात् । प्रायणीये वा यथासमाम्नातमिति तद्वदतिप्रैषः स्यात्तत आ पत्नीसंयाजेभ्यो वाग्यमनं वसतीवरीणां परिहृतत्वात् ।

७. यस्ते द्रप्सः स्कन्दति यस्ते अंशुः द्रप्सश्चस्कन्द प्रथमाँ अनु द्यूनित्याभ्यामृग्भ्यामृचमृचं विप्रुषां संबन्धी होमः। या एवास्याच विप्रुषः स्कन्दन्ति ता एवैतदाहवनीये स्वाहाकरोतीति श्रुतेः। न चैतत् सोमस्कन्दमप्रायश्चित्तं[1] नित्यत्वादस्य पुरस्तात्पवमानानामिति प्रतिपवमानम्।

८. समन्वारब्धान्सर्पतस्तथैव ब्रह्मानुसर्पति।

९. अन्वारब्धो ऽनुसर्पति। न च होमं करोति। पृथग्योगकरणात्।

१०. चानुकृष्टमुत्तरत्र नानुवर्तत इति न्यायाद् ब्रह्मेत्येतदनुवर्तते। अग्निचित्यायामिष्टकास्थले यदग्निप्रणयनं तस्मिन्नग्नौ प्रणीयमाने ब्रह्मा जपत्यप्रतिरथाख्यमाशुः शिशान इति सूक्तम्।

११. होमार्थं नीयमानं महावीरमनुमन्त्रयन् ब्रह्मा जपति विश्वा आशा इत्येवमादिकं मन्त्रम्।

१२. अश्विना घर्मं पातं हार्द्वानमहर्दिवा इत्येवमादिकं मन्त्रं वषट्कृते महावीरद्रव्ये हूयमाने ब्रह्मा जपति।

१३. अपातामित्येवमादिकं मन्त्रं ब्रह्मानुवषट्कृते जपति। प्रधानशेषो ऽयं जपो ऽनुवषट्कृते कालः।

१४. दक्षिणतोन्यायं ब्रह्मकर्मेत्येवमादि यदिहानिर्दिष्टं तत्समानं तुल्यमिहापि द्रष्टव्यं ब्रह्मकर्म। ऋत्विक्साधारणं यत्कर्म धिष्ण्योपस्थानरक्षणाधारणादिकं तदपि ब्रह्मणो भवत्येवाविशेषात्।

---

[1] C in marg. समपचे च सो।

चतुर्थे ऽध्याये ब्रह्मत्वं विधाय सोमे चेति नोक्तम्। यजमानप्रकरणे ऽवान्तरप्रकरणेन ब्रह्मत्वविधानात्। सोमे चेत्युच्यमाने याजमानमपि चतुर्थविहितं सोमे स्यात्। तन्निवृत्त्यर्थं तत्र सोमे चेति नोक्तम्। प्राप्ते ऽपि को दोषः स्यात्। सोमानां प्राग्घोमाद्भुवा असदन्नित्यभिमर्शनमग्ने वायो विद्युदित्येवमादिकमभिध्यानमनुपदस्येत्यादिनाकाशादिध्यानं[1] निष्केवल्यशस्त्रहोमान्ते च स्यात्[2]। तत्प्रधानत्वात्सोमस्य।

१५. निर्दिष्टानिर्दिष्टमेतत्सोमे ब्रह्मकर्म। नान्यत्। ततस्त्रयोदशाध्यायविहितमनष्टमे[3] निर्दिष्टं महावीरभिश्रानुमन्त्रणादि ब्रह्मणो न भवतीति। सोमे ब्रह्मकर्मेति परिसङ्ख्यानात्।

निविदामनन्तरं पाठः [4]पदच्छेदविज्ञानार्थं ऐतरेयिपाठव्युदासार्थश्च। उक्थवीर्याणां च न स्वस्थाने पाठः।

अनुकृष्टस्तु यः कश्चित्कल्पे ऽथ ब्राह्मणे ऽपि वा।
मन्त्रः पद्यो ऽथ गद्यो वा वामदेवं निबोधत॥ इति।

वामदेवार्षता मा भूत्। निविदां तु मध्ये पाठादुक्थवीर्याणामपि विश्वामित्र ऋषिर्भवति। तन्मध्यपठितत्वात्। निवित्पुरोरुचः प्रैषा विश्वामित्रस्य सर्वत्र इति। प्रयोगकाले च ऋषेरभिध्यानं श्रुत्यन्तरदर्शनात्।

---

[1] B °विद्युक्रमाकाशा°। [2] B C om. च स्यात्। [3] B चसप्तमे।
[4] B पाद°।

१६.

अवद्वृष्ण्याष्यावसा गमदित्येवमन्ता मरुत्वतीये निविद्विंशत्यवसाना। प्रेमं सुन्वन्तं यजमानमवत्वित्यस्य यथार्थमूहो यजमानद्वित्वबहुत्वयोः।

१७.

निष्केवल्यस्येयं निवित्सह पूर्वैः पञ्चभिः प्रेमां देवो देवहूतिमवतु देव्या धियेत्याद्यैरूनविंशत्यवसाना।

१८.

सावित्री निविदियं सह पूर्वैः पञ्चभिः विंशत्यवसाना।

१९.

द्यावापृथिवीयेयं निवित्त्रयोदशावसाना। ऊहः प्रेमं सुन्वन्तं यजमानमिति यजमानद्वित्वबहुत्वयोः।

२०.

आर्भवीयेयं निवित्सप्तदशावसाना। अस्यां प्रेमं सुन्वन्तं यजमानमिति यथार्थमूहो विकारेषु।

२१.

वैश्वदेवीयं निवित्सह पूर्वैः पञ्चभिरूनत्रिंशदवसाना।

२२.

वैश्वानरीया इयं निवित्सह पूर्वैः पञ्चभिः पञ्चदशावसाना ।

२३.

मरुत्वतीयं निवित्पूर्वैः पञ्चभिः सह चतुर्दशावसाना ।

२४.

जातवेदसीयं निवित्पूर्वैः पञ्चभिः सह षोडशावसाना अस्यां निविदि समेद्धारमित्येतत्पदं यजमानाभिधायि तस्य विकृतिषु यथार्थमूहः ।

२५.

१. षोडशिन इयं निवित्पूर्वैः पञ्चभिः सह षोडशावसाना सर्वासु निवित्स्ववसाने प्रणवः प्लुतः ।

२. नाक इत्येकारान्तं शाखान्तरदृष्टत्वात् ।

द्विरभ्यासो ऽध्यायपरिसमाप्तौ शिष्टाचारस्तदाचरणं चायुष्यमिति ।

शाङ्खायनकसूत्रस्य समं शिष्यहितेच्छया ।
वरदत्तसुतो भाष्यमानर्तीयो ऽकरोन्नवम् ॥

इति शाङ्खायनसूत्रभाष्ये ऽष्टमो ऽध्यायः समाप्तः ।

15904

ROYAL ASIATIC SOCIETY OF BENGAL LIBRARY

Author Srauta Sutra .

Title Sānkhāyana Srauta Sutra_ (V.2.)

Call No.

Date of Issue	Issued to	Date of Return

Library of the
ROYAL ASIATIC SOCIETY OF BENGAL
Call No. 294.1/S227S.4. vol-2
Accession No. 15904